मर्यादा। मर्यादामुल्लङ्घ्य गच्छन्तो रावणलीलामपि प्रवर्तयेयुः कंसकीचकलीलामपि। अस्यैव परिपाकमिदानीं प्रत्यक्षमीक्षामहे। त्यागी नेता चेति लोकैः प्रशस्तोऽद्य शासनसूत्रं विच्छेदयितुं 'द्विजानाम् उपवीतं सूत्रं विच्छिन्धि शिखां कर्तयेति' लोकान् यथेच्छं प्रेरयति। इदानीमासीदेतादृशी स्थितिर्देशस्य। अस्तु यथा तथा वा। इदन्तु निश्चप्रचं वक्तुं शक्यते —यद् इदानीं तदानीमिति विश्लिष्य संस्कृतिपरिवर्तनमामूलचूडं जातमिति। इदानीं गमनागमनसाधनीभूतेष्वध्वसु जनपदनगरसम्बन्धिषु दृढस्य कन्दुकस्य उत्पततः कन्दुकस्य वायुपूरितकन्दुकस्य च क्रीडनं बाला युवानश्च कुर्वन्ति। तदानीन्तु गृहाद् बहिर्वेदिकासु समवेता बालाः कल्पितं पुरोडाशं चरुं वादाय दर्शपूर्णमासचातुर्मास्यादिक्रीडनमकुर्वन्त। कश्चन '**आश्रावय**' इति वदति, अपरश्च '**अस्तु श्रौषट्**' इति, तृतीयः '**ये यजामहे**' इति, चतुर्थः '**वषट्**' इति, पत्नीत्वेन कल्पितं बालं योक्त्रेण सन्नह्यति, अन्ते च तत्तद्-गृहादानीतं पुरोडाशं सर्वे भक्षयन्ति। एतादृशं क्रीडनम्। तदानीं दण्डाल्लोका बिभ्यति स्म, इदानीन्तु लोकेभ्यो दण्डस्ससाध्वसो दृश्यते। तदानीमाचार्यवशंवदश्छात्रः, इदानीं छात्रवशंवद आचार्यः। तदानीमेकश्शासकः, इदानीं सर्वे शासकाः। सत्यमिदानीं वैज्ञानिकी समुन्नतिर्देशस्य जायमाना वर्तते, तदानीमाध्यात्मिकशक्तिसमुन्नतिरासीत्। '**न हि भूते भाविनि वा तादृशी प्रीतिर्यादृशी वर्तमाने**' इति मीमांसान्यायेन 'आसीत्' 'भविष्यति' इत्यत्र लोकानां कथं प्रीतिरुत्पद्येत, वर्तमान एव द्रढीयसी सा स्यात्, तथापि भूत-भविष्यत्कालिकवस्तु-परिज्ञानन्त्वावश्यकमेव भवति। भूतोपयुक्तानां भाव्युपयोक्ष्यमाणानाञ्च संस्कारेषु वयं श्रद्दधामहे। भूतोपयुक्तयोः पित्रोः केनापि रूपेण संस्कारः क्रियत एवास्माभिः। वर्तमाने तयोः कोऽप्युपयोगो नास्तीति ताव-नाथालयेषु न प्रेषयामः। इयं भारतीया संस्कृतिः। भाव्युपयोक्ष्यमाणः पुत्रादिरुच्चा-वचैस्संस्कारैः संस्क्रियते, सम्प्रति तस्योपयोगो नास्तीति धात्रीणां कुलेषु न प्रेषयामः। यावन्मातुः स्तन्यं न पिबति तावत्स हृदयवान् कथं भवेदिति गृह एव तं पालयामः। एवञ्च वर्तमाने प्रीत्यतिशये सत्यपि भूते भाविनि च दृष्टेः प्रसारणं भारतीया संस्कृतिः।

तत्रास्माकं मातेव श्रुतिः बाल्यकौमार-यौवन-वार्द्धकास्ववस्थासु विभिन्नमधि-कारिभेदेन ज्ञानस्तन्यं पाययन्ती विलसति। ईदृशस्य स्तन्यस्य पातारो मातृहृदयवन्तो भवन्ति। आसीन्मङ्गलमयः कश्चन कालः, यत्र च स्वस्वाधिकारानुसारेण ऐहिकानि ऐहिकसंवलितामुष्मिकाण्यामुष्मिकाणि च फलान्युपभोक्तुं तदनुकूलानि मात्रा श्रुत्योप-दिष्टानि श्रौतानि स्मार्तानि च कर्माण्याचरन्तो जनास्सुखेन जीवनमनयन्। यथा महाक-विभिः प्रवर्तितानि विविधानि नाटकानि दर्शनेन रसास्वादनाय भवन्ति, तथैव श्रुतिबो-धितान्युच्चावचानि कर्माणि यथायथमनुष्ठानेन तत्तज्जन्यफलानुभवाय भवन्ति स्म। तत्रैष्टिकानि पाशुकानि सौमिकानि चेति त्रिधा विभागः कर्मणाम्। चरुपुरोडाशपयो-

दधिप्रभृतिभिर्विहितैर्द्रव्यैः क्रियमाणान्यैष्टिकानि, पशुना (छागेन) क्रियमाणानि पाशुकानि, सोमलतया क्रियमाणानि सौमिकानीति व्यपदिश्यन्ते । तत्रैष्टिकद्रव्याणां व्रीहियवनीवारादीनां पाशुकद्रव्यस्य पशोश्च पाको विहितः, सोमस्य तु न पाकः । पाकेन संस्कृतं द्रव्यं तत्तद्देवताभ्यो द्वयवदानक्रमेण दत्त्वा प्रतिपत्तिकर्माणि च समाप्यावशिष्टं द्रव्यं तैस्तैर्यजमानैरुपयुज्यते । पशोस्त्ववशिष्टं द्रव्यं भूमौ निखन्यते । अनेनाचारेणेदमभ्यूहितव्यं भवति—आहिताग्नीनां गृहेषु पाको यज्ञार्थः, तदवशिष्टस्यैव बह्वल्पं भोजनम् । स्वात्मार्थं पाकः स्वेनैव च भोजनं सर्वथा निन्दितमिति । अत एव **'मोघमन्नं विन्दते अप्रचेताः । सत्यं ब्रवीमि वध इत् तस्य । नार्यमणं पुष्यति न सखायम् । केवलाघो भवति केवलादी ।** (तै० ब्रा० २।८।८।३) **'नात्मार्थं पाचयेदन्नम्'** मनु०··· **'भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्'** इति श्रुतिस्मृतिगीतादिषु स्वात्मार्थपाकस्य केवलादिनश्च निन्दा दृश्यते । तत्र देवताभ्यो दत्तावशिष्टस्य भोजनं वा, भोज्यस्य वस्तुनो देवताभ्यः पूर्वं दानं वेति यद्यपि सहसा न निर्णेतुं पार्यते, तथापि गूढतरे विचारे क्रियमाणे पूर्वं स्वोपभोगाय यजमानः पुरुषः तदनुगुणं वस्तु यतः कुतश्चिद् अर्जयति, तच्च भोजनयोग्यं करोति, भोजनकाले चोपस्थिते तदन्नं स्वस्मादर्हत्तमेभ्यो देवेभ्यः किञ्चिद्दत्त्वा स्वोदरमवशिष्टेन पूरयति । अस्मिन् पक्षे स्वोदरकुहरपूरणं मुख्यं देवेभ्यः प्रदानञ्चानुषङ्गिकम् । अथवा पक्षान्तरमिदम्—यत्, तेषु तेषु कालेषु पर्वसु विहितानां कर्मणां तैस्तैर्द्रव्यैरवश्यानुष्ठानं, तदवशिष्टस्य च द्रव्यस्य भक्षणमिति । अस्मिन् पक्षे कर्मानुष्ठानं मुख्यम्, तदवशिष्टद्रव्य-भक्षणञ्च गौणम् । प्रथमपक्षे भोजनार्थं जीवनमिति सिध्यति, द्वितीयपक्षे च जीवनार्थं भोजनमिति । अस्मिन् प्रसङ्गे जैमिनेर्न्यायद्वयं ध्यानमर्हति । प्रथमो न्यायो **'लिप्साधिकरणसिद्धः'** (४. १. १) । तत्र हि पुरुषेण सनियममर्जितं द्रव्यं किं क्रत्वर्थम् ? उत पुरुषार्थम् ? इति सन्दिह्य पुरुषार्थमिति सिद्धान्तितम् । स्वोपभोगाय द्रव्यमर्जयेत् तस्यैकदेशं क्रतुष्वपि विनियोजयेत्, क्रतूनामपि दर्शपूर्णमासादीनां पुरुषार्थत्वात् । द्रव्यार्जने ये नियमाः प्रतिग्रहादयः तेऽपि पुरुषार्थाः । तदतिरिक्तोपायैरर्जितस्य द्रव्यस्यैकदेशः क्रतुषु विनियोगेऽपि न क्रतूनां वैगुण्यम्, किन्तु पुरुषः प्रत्यवायभाग्भवति । तेन क्रतौ तदितरस्मिंश्च पुरुषकार्ये सर्वत्रानिषिद्धोपायार्जितद्रव्यस्य विनियोगः, नियमलोपे च पुरुष एव प्रत्यवेति न क्रतोर्वैगुण्यमिति सिद्धान्ते फलं सम्पद्यते । द्वितीयस्तु न्यायः षाष्ठः **'अपि वा शेषभाजां स्यात्'** इत्यधिकरणसिद्धः । अत्र हि शेषकार्याणां स्विष्टकृदिडाभक्षाणादीनां कर्मणां तदीयात्तहविर्नाशे किं द्रव्यान्तरमुत्पाद्य तानि कर्माण्यनुष्ठेयानि ? उत तेषां लोप इति सन्दिह्य द्रव्यान्तरं नोत्पादनीयम्, स्विष्टकृदादि-प्रतिपत्तिकर्माणि आज्येन **'आज्येन ता देवताः प्रतिसंख्याय यजेत्'** इति वाक्यानुसारेण कर्तव्यानि, इडाभक्षणस्य लोप एवेति सिद्धान्तितम् । अनेन न्यायेन न भोजनाय जीवनमिति सिध्यति । एवञ्च न्यायद्वयेन जैमिनिर्भारतीयां संस्कृतिं जीवनाय भोजनं न तु भोजनाय जीवनमिति

समुपदिशति । अतश्च पुरुषेण सताऽवश्यं कानिचन विहितानि कर्माणि तत्तद्देवताभ्यो हविर्दानरूपाणि कर्तव्यानि, तदैव स पुरुषो देवर्णेन मुच्यते । तत्र देवर्णाद् आत्मानं मोचयितुम् इष्टि-पशुयज्ञापेक्षया सोमयज्ञानुष्ठाने विभिन्नः प्रकार आदृतो वैदिकेषु वचस्सु । तत्र प्रागल्भ्यं प्राधान्यं बहुकालव्यापिता बह्वायाससाध्यता व्ययबाहुल्यञ्च सोमयागमधितिष्ठन्ति । अपि च तदीयद्रव्यावाप्तौ महान् परिश्रमोऽपि कर्तव्यो भवति । अत एव तमधिकृत्य वेदेषु स्मृतिपुराणादिषु चातिमहतीः स्तुतीः तत्र तत्रोपलभामहे । तत्रैकदिनसमाप्यं सोमयागमारभ्य सहस्रसंवत्सर-साध्ययागपर्यन्तास्सोमयागा यजुर्वेदे सामवेदे च विहिताः तदनुरोधेन बौधायनकात्यायनापस्तम्बादिभिः श्रौतसूत्रकारैश्च यथा बहुरूपेण वर्णिताः, पुराणेषु च तैस्तैर्महर्षिप्रवरैश्चानुष्ठिततया निरूपिताः । तेष्वेवोच्चावचेषु सामयागेषु स्तोत्रशस्त्रतया याज्यादिरूपेण च विनियुक्ता ऋग्वेदीयास्सर्वेऽपि मन्त्राः । केचन विपश्चितः प्रथमं मन्त्रा आसन् तदनन्तरं तेषां कर्मभिस्साकं स्तोत्रशस्त्रयाज्यारूपेण सम्बन्ध आपादित इत्याशेरते । वयन्तु ब्रूमः— सहैव संहितया कर्मणां विवेचनं तत्र च मन्त्राणां विनियोग आसीद् शिष्टाचारेष्विति । इममाचारं पर्यवेक्ष्यापस्तम्बकात्यायनादयः सूत्ररूपेण ग्रन्थानकार्षुः । सूत्राणां मूलं ब्राह्मणभाग आचारश्च । आचारश्च ब्राह्मणभागमूलकः । ब्राह्मणभागश्च सहैव संहितया सम्बद्ध आसीत् । अत्र च कारणं पश्यामः— ऋग्वेदे तत्र तत्राध्वर्युप्रभृतीनामृत्विजां नामान्युपलभ्यन्ते ।[1] अध्वर्व्वादयो यज्ञकर्मकराः । तेषां कार्याणि ब्राह्मणभाग उपदिष्टाः । तत्र ब्राह्मणभागप्रवृत्तेः पूर्वं केवलेन संहिताभागेन किमप्याचरितुमशक्नुवाना लोका अतिष्ठन् इति वक्तव्यम् नेदं समीचीनम् । **'न कदाचिदनीदृशं जगत्'** इति न्याये वर्तमाने । अत उभावपि भागौ सहैवास्ताम्, प्रकरणाधिकरणन्यायेन च सम्बद्धावभवताम् । न हि कार्यं विना किमपि तेषां तन्नामप्रवृत्तिः । किञ्च अथर्वा नाम कश्चिदृषिः यज्ञानुष्ठानेनैव स्वीयं यशः प्रथयामास[2] । देवा यज्ञानुष्ठानेनैव [3]वाग्वैभवमवाप्नुवन् । यज्ञ एवेन्द्रस्य सर्वप्रकारां वृद्धिमजनयद् इत्यादीनि यज्ञप्रशंसापराणि यज्ञानुष्ठानबोधकानि च वचनानि बहूनि ऋग्वेद एव सन्ति तदात्वेऽपि यज्ञानुष्ठान-प्रचारं बहुधाऽऽवेदयन्ति । तादृशाश्च मन्त्रा यज्ञानुष्ठानावेदका न केवलमेकत्र, द्वित्रेषु वा स्थलेषु, किन्तु सर्वाण्यभिव्याप्य मण्डलानि दाशतयीसम्ब[4]द्धानि विद्यन्ते । कृष्णयजुर्वेदस्तु यज्ञानुष्ठान-

---

१. अध्वर्युः, नेष्टा, होता, प्रशास्ता, ग्रावस्तुत्—ऋ० सं० १. १६२. ५; १०. ९१, १०, ब्रह्मा—अग्नीत्, पोता, १०.९१.१०; ब्राह्मणाच्छंशी २. ४२. २, उद्गाता —२. ४३. २; प्रस्तोता ८. १३. १९ ।

२. ऋ० सं० १. ८३.५ ।

३. १०. ७१. ३.

४. ऋ० सं० १.१५.७., २.२६.१., ३.२८.१., ४. ५०.६, ५.४.५, ६. १५.१६, ७. ४२.५, ८. ३८. ४. ९. १०७. ६. १०.१५७.१ ।

मधिकृत्यैव प्रवृत्तः प्राधान्येनेति न तिरोहितम् । पाश्चात्यविद्वत्समाजोऽथर्ववेदस्यार्वाचीनकालिकत्वमभिप्रैति, किन्तु अथर्वनामाङ्किताः केचन मन्त्रा ऋग्वेद एव परिदृश्यमानाः कथमपलपितुं शक्यन्ते । ऋग्वेदकालिकः कश्चिदथर्वा, एक एव वा कालद्वयमभिव्याप्य जीवन्नासीदित्यभ्युपगमे न कामप्यनुपपत्तिं पश्यामः । एवञ्च वैदिकैरेव मन्त्रजातैरिदं सुस्पष्टमवगम्यते यद् भारते कदाचिद्यज्ञियं युगं वा भारतभूमिमभिव्याप्य विराजमानमासीत् । सर्वे देवा यज्ञैरेव तर्प्यन्ते स्म । सर्वाणि च फलानि यज्ञानुष्ठानादेव प्राप्यन्ते स्म । सर्वाणि च दुरितानि अरिष्टानि च यज्ञैरेवापाक्रियन्ते स्म । यज्ञपरितुष्टा दिवौकसो यजामानाभिलषितं सर्वमपि फलं प्रदातुमुद्यता आसन् । किं बहुना ? मानुष्यं जीवनं सर्वमपि यज्ञानुष्ठानमेवोपजीवदासीदित्यपि कथनं नातीवोत्पथं गच्छतीति विभावयामः ।

इतरद्रव्यापेक्षया सोमरसस्यैव प्राधान्यं यागेषु

एवं बहुविधं प्रसरमुपयातेषु यागेषु साधनभूतानां व्रीहियवादिद्रव्याणां मध्ये सोमलतैव प्रामुख्यं प्राप्नोत् । तयैव च क्रियमाणो यज्ञः श्रेष्ठतमः पर्यगण्यत । अनेकवर्षसाध्यत्वमप्यस्यैव सोमयागस्य । तादृशाश्च सोमयागाः पारेसहस्रमिति पूर्वमुक्तम् । एतेषां क्रमस्वरूपविवरणादिकं ताण्डयमहाब्राह्मणभूमिकायां वाराणसीमुद्रितायामस्माभिरुपवर्णितं तत एवावगन्तव्यम् ।

सोमयागमननुतिष्ठंस्त्रैवर्णिकः न दैवाद्[1] ऋणान्मुच्येतेति भगवती श्रुतिरवबोधयति । अननुष्ठातुः प्रत्यवायमपि प्रायश्चित्तापनोद्यं स्मृतयो विदधति । भगवदाराधनादिकमद्यत्वे आस्तिकैः पृथक् क्रियमाणं सर्वमपि तत्रैवान्तर्भावयन्ति स्म तत्तद्युगीनाः परमर्षयः पूर्वे । एवं सर्वोत्कृष्टस्सोमः, तन्निर्वर्त्यश्च यागस्तथाविध आसीत पुरा वैदिके युगे ।

कस्सोमो यज्ञाङ्गभूतः ?

इदमिदानीं विचार्यते—कोऽसौ सोमः सर्वोत्कृष्टः सर्वैः श्लाघनीयः, सर्वगुणगणगुम्फितश्चासीदिति । तत्र **'क्षीरिण्यां लतायां सोमशब्दः प्रसिद्ध'** इति मीमांसासूत्र[2] भाष्ये आचार्यशबरस्वामी ।

श्यामलाऽम्ला च निष्पत्रा क्षीरिणी त्वचि मांसला ।
श्लेष्मला वमनी वल्ली सोमाख्या छागभोजनम् ।। इति भावप्रकाशो [3]वैद्यकग्रन्थः ।

---

१. एष वा अनृणो यः पुत्री यज्वा । (तै० स० ६. ३.१०.५)
२. द्रष्टव्यम्—मी० सू० शाबरभा० २. २.१७ ।
३. ,, ११४ सोमलता पृ० ३६४, मिश्र प्रकरण, पूर्वखण्ड, भावप्रकाश, वाराणसी सस्करण (हिन्दी), सोमलता दिव्यौषधि इत्यादि ।

सोमवल्ली कटुश्शीता मधुरा पित्तदाहकृत् ।
कृष्णा विषोपशमनी पावनीयज्ञ-साधनी'' ॥ इति—राजनिघण्टुः

प्रमाणैरेभिरन्यैश्चैतादृशैः सोमो नाम कश्चिल्लताविशेषः, यस्य रसोऽम्लकटुमधुरैः शबलितः, त्वग्भागे मांसलः, छागप्रियः, वमनसाधनं चेत्यवगम्यते । नैतावानस्य महिमा । अतोऽपि च ज्यायानुपवर्ण्यते ग्रन्थेषु श्रुतिपुराणेतिहासादिषु । औषधरूपेण चास्य पानमपि महते फलाय कल्पते । पीतमात्रोऽयं सोमरसः शारीराननल्पानपि रोगान् सद्योऽपनुद्य दिव्यरूपं दिव्यचक्षुषं च करोति पातारं पुरुषमनल्पायुषञ्च ।

सोम-महिमा

स कोऽप्यवर्णनीयस्सोमस्य राज्ञो महिमा । वेदेष्वयं राजा कथ्यते । प्रायेण[1] राजपदविशेषितमेव सोमं कथयन्ति वैदिकानि वचांसि । यथाकथञ्चित् प्राप्येमं पुरुषः पीत्वाऽमृतत्वं भजते । मुमूर्षुरपि दैवात् प्राप्येमं मृत्योरात्मानं मोचयति । पातुरस्य दिव्या दृष्टिरुदेति । बलमप्रतिममभिवर्द्धते । अवाप्तकामा अमरा अपि चिराय कांक्षन्ति रसमस्य पानाय । पीत्वा चानितरसाधारणं प्रमोदमप्रतिमं च बलमवाप्नुवन्ति । कृतकृत्यमात्मानं मन्वते । युद्धे जयमश्नुवते । एवमन्ये च बहवो गुणा उपवर्णिता वेदेषु सोमस्य । ऋग्वेदे[2] पावमानं मण्डलं समग्रमपि महिमानमेतस्यैव वर्णयति । सामवेदे तु कैव कथा ? सौम्यं गुणगणं गौरवं च वर्णयितुमेव स प्रवृत्त इत्यपि वक्तुं शक्यते । अत एव सामवेदः सोमवेद इति शब्देऽपि नातिभेदमुपलभामहे । अतो वेदेषु सोममहिमा नितरां परां कोटिमाटीकत इति कथनं तथ्यमेव, नासत्योक्तिः ।

सोमे चन्द्रोपमा

एवं ज्योतीरूपस्य चन्द्रमसो गुणास्सोमे बहवो विद्यन्त इति तेन सहोपमिमते बुधाः सोममिमम् । एतस्य हि क्षयवृद्धी दृश्येते चन्द्रमस इव । यथा हिमांशोः शुक्ले पक्षे वृद्धिः, मेचके च पक्षे क्षयो दृश्यते, तथैव सोमस्याऽपि शुक्लपक्षे पत्राण्युद्भवन्ति कृष्णे च पक्षे जायते पत्रशातनम् । अतो योऽयं चन्द्रमा नभसि स एव सोमो भूतल इति तयोरभेदमेव वाऽत्यन्तसादृश्यमेव वा ते ब्रुवते ।

वेदेऽपि च क्वचिद् भेदकथनं, क्वचिच्चाभेदकथनमिव च प्रतिभाति । प्रायो

१. सोम राजन् मृळयानः (ऋ. ८. ४८. ८.) सोम राजन्नेहि तै० सं० १.३.१३.१
सोमो राजा प्रथमः (,, १०.१०९.२ अथर्व ५. १७. २)
सोमेन सह राज्ञा (,, १०.९७.२२ तै० सं० ४, २. ६. ५)
सोमं राजानमवसे (,, १०.१४१.३., तै० सं० १.७.१०.३ अथर्व० ३.२०.४)

२. ऋग्वेदसंहितायां नवमं मण्डलं समग्रमपि पवमानसोमस्तावकत्वात् 'पावमान-' मुच्यते ।

यजुर्वेदसंहितासु सोमापेक्षया चन्द्रमसः पृथग् ग्रहणं दृश्यते।[1] तत्र नक्षत्राणामधिपतिश्चन्द्रमाः, ओषधीनामधिपतिस्सोम इत्युक्तम्। एवं सोमयागीयदीक्षाप्रकरणेऽपि सोमचन्द्रमसोः पृथक् पाठेन भेदः प्रदर्शितः[2]। तत्रैव च स्थलान्तरे द्रव्यरूपस्य सोमस्य देवतारूपस्य च तस्याऽभेदः[3] प्रदर्शित इव। एतेनेदमनुमातुं शक्यते— वैदिके समये ज्योतीरूपस्य सोमस्य लतारूपेण तेन अत्यन्तसादृश्यमभेद एव वा मन्यते स्म। एवं सोमस्य चन्द्रमसश्च कश्चन भेद आसीत्। सोऽपि कालान्तरे विलीन ऐक्ये पर्यवसायित इति। परमिदमभ्यूहमात्रमन्तरा बलवत्प्रमाणोपलम्भं न सहसा किञ्चिदध्यवसातुं शक्यते। परमिदन्तु निश्शङ्कमध्यवसायपथमारोढुं प्रभवति पवित्रतमः गुणगणमण्डितः दैवैरपि प्रार्थनीयः दोषलेशासंस्पृष्टः, क्षीरी, कश्चन लताविशेषो यो देवभूमिष्वेव प्ररोहतीति।

सोमः कुत्र लभ्यते ?

एवं विविधविशिष्टगुणगणालङ्कृतो देवानामपि प्रियतमस्सोमोऽयं न पुरा सुलभसम्पादनीय आसीत्। क्वचिदेव तु स्थलविशेषेषु पुण्यभूभागेषु तस्य प्ररोहः प्रसृत आसीत्। तत एव स्थानविशेषादतिमहता प्रयासेन स आनेतव्य आसीत्। तत्राऽपि व्रीहियवादिवत् स्वयमानीय संस्कृत्य यष्टुं न शक्नोति यजमानः। किन्तु अन्येन केनचिदानाय्य, ततस्तं तदुदितैर्द्रव्यैः क्रीत्वा, संस्कृत्य ततो यजेत तेन। अतोऽन्यथाकरणे यागादृष्टमेव नोत्पद्येत। अन्यथाकृतस्य प्रायश्चित्तमपि आप्नुयात्। अतस्सोमयागमनुतिष्ठता पुरुषेण यागारम्भद्वितीयदिने यज्ञप्रयोगमध्य एव सोऽवश्यं क्रयणीयः। क्रयार्थद्रव्याण्यपि श्रुतावेवोक्तानि गोवासःप्रभृतीनि। तैरेव च क्रेतव्यः। न तु स्वेच्छागृहीतेन येन केनचित्। आनयनमप्यस्य दूराद् देशात्। न ह्ययमितरवल्लीवद् भूमौ समदेशे प्ररोहति। किन्तु क्वचिदेव पर्वतविशेषेषु स्थलविशेषेषु च। अस्ति हि मूजवान् नाम कश्चित् पर्वतो हिमवतः प्रान्ते। तत्रैव चास्योत्पत्तिविशेषेण श्रूयते[4] श्रुतिपुरा-

---

१. चन्द्रमा नक्षत्राणामधिपतिः (तै० सं० ३. ४. ५. १) सोम ओषधीना (मधिपतिः) तै० सं० ३. ४. ५. १)

या ओषयधस्सोमराज्ञीः (तै० सं० ४. २. ६. ५.) या ओषधीस्सोमराज्ञीः (ऋ० सं० १०. ९७. १९) सोमो वा ओषधीनां राजा (तै० सं० ६. १. ९. १)

२. तथा चन्द्रमा दीक्षया दीक्षितः। तया सोमो राजा दीक्षया दीक्षितः (तै० ब्रा० ३. ७. ७. ५. ६.)

३. एष ह वै हविषा हविर्यजति योऽदाभ्यं गृहीत्वा सोमाय जुहोति (तै०सं० ३.३.४.२) अत्र लतायास्सोमस्य चाऽभेदेन हवीरूपत्वमुक्तम्।

४. भवस्य दयितः श्रीमान् पर्वतो मेघसन्निभः। मूजवान् स महादिव्यो दुर्गशैलो हिमाञ्चितः॥ तस्मिन् गिरौ निवसति गिरिशो धूम्रलोचनः॥ (ब्रह्माण्डपु० १९) इत्यादि। तथा—तस्योद्देशेषु चाप्यस्ति मूजवानंशुमानपि। अत्र सन्त्यपरे चाऽपि सोमास्सोमांशुसम्भवाः॥

णादौ। मूजवान्[1] पर्वतस्तु यजुर्वेदे[2] श्रूयते। स च कैलासनिकटवर्ती। ते च प्रदेशा देवावासभूमय इति कृत्वा स्वर्गसाम्यं तेषां स्वर्गत्वमेव वा स्मृतिपुराणादिषूपवर्ण्यंते[3]। अतः कारणात् स्वर्गलोकादेव सोमस्यानयनं श्रुतयो विब्रुवते ऐकमत्येन। प्रायस्सर्वेष्वपि ब्राह्मणग्रन्थेषु द्युलोकादेव सोमलताया आनयनमुपवर्ण्यते। तदनुसारिणी चेयं कथा किञ्चिदिव न्यूनाधिकतयाऽनुबद्धा सर्ववेदीयानि सर्वाण्यपि ब्राह्मणान्यनुप्रविश्यास्ते —सा[4] च सङ्क्षिप्तरूपेत्थम्।

श्रुतिषु सोमाहरणकथा —

कद्रूः सुपर्णी चेति कश्यपस्य प्रजापतेर्द्वे भार्ये आस्ताम्। तयोर्द्वयोः स्वस्वसौन्दर्यविषये कदाचिद्विवादो महानजनिष्ट। पणबन्धपूर्वकं विवदमानयोरनयोः कद्रूः जेत्री संवृत्ता। जिता च सुपर्णी जैत्र्या दासीभावमवाप। आत्मनो दासीभावान्मोक्षमीहमानया तया सुपर्ण्या प्रार्थिता कद्रूः त्रिदिवस्थस्य सोमस्याहरणेन दानेन च तस्या दास्यान्मोक्षमभिदधे। सर्पाणां माता कद्रूः। तार्क्ष्यमाता सुपर्णी (विनता) सा स्वयं सोममानेतुमशक्नुवाना वृत्तमिदं स्वसुतेभ्यश्छन्दोभ्यः कथयामास। गायत्र्यादीनि[5] सप्त छन्दांस्येव तत्सुताः। ते च श्रुत्वैवैतत् सोमस्याहरण उद्यता अभूवन्। तत्र जग-[6] तीत्रिष्टु (छन्दसी) क्रमशः सोमानयनाय दिवं गच्छन्त्यौ तत्र तमन्विष्य बहुधा श्रान्ते, अन्ततस्तमलब्ध्वैव प्रत्यावृत्ते। एकैकस्याः द्वे द्वे अप्यक्षरे क्वचित् पतिते। ततो गायत्री चतुरक्षरा सती अजामेकां स्वसाह्यायेतो गृहीत्वा, सोमस्थानं गत्वा, तत्र-

---

१. कैलाश एव वा पूर्वं मूजवत्पदेनाऽभिधीयते स्म इत्यस्ति विचारस्याऽवसरोऽत्र।

२. परो मूजवतोऽतीह्यवततधन्वा पिनाकहस्तः कृत्तिवासाः, तै० सं० १.८.६. १. तथा द्रष्टव्यमयन्त्रापि मै० सं० १. १०. २७ कठ. सं० ९. ७. ३३. माध्य० सं० ३. ६१, काण्व सं० ३. ७० तथा श० ब्रा० २. ५. ३. १७।

३. द्रष्टव्यम्— कुमारसम्भवे—
दिवं यदि प्रार्थयसे वृथा श्रमः पितुः प्रदेशास्तव देवभूमयः। (कु० ५.४५.)

४, कद्रूश्च वै सुपर्णी चाऽऽत्मरूपयोरस्पर्द्धेताम्। सा कद्रूस्सुपर्णीमजयत्' इत्यादि, तै० सं० ६. १. ६. १.।

५. गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पंक्तिः, त्रिष्टुप्, जगती, इति सप्त च्छन्दांसि। तत्र गायत्री षडक्षरा लोके एकस्मिन् पादे, चतुष्पादा च; वेदेऽष्टाक्षरा त्रिपदा च। उष्णिहि सप्त, अनुष्टुभि अष्टौ, बृहत्यां नव, पंक्तौ दश, त्रिष्टुभि एकादश, जगत्यां द्वादश चाक्षराण्येकस्मिन् पादे।

६. जगत्युदपतत्, त्रिष्टुगुदपतत्, गायत्र्युदपतत् इत्यादि द्रष्टव्यम्।

त्यमन्धं तमः स्वानीतयाऽजयाऽपवार्य, तत्रैव सोमसमीपे परिपतितानि जगतीबृहत्योश्चत्वार्यक्षराणि गृहीत्वा स्वेन संयोज्य, अष्टाक्षरा भूत्वा द्युलोकात् सोममाहृतवती। आहरणकाले सा खगरूपं धृत्वा सोमं त्रिधा विभज्य, एकैकेन पादेनैकैकं भागं, मुखेन चैकं गृहीत्वाऽऽनयन्ती मुखगतभागस्य रसं चूषति स्म। ततस्स भागो नीरसो जातः। एवमानीयमानस्स सोमः मध्येपथं विश्वावसुनाम्ना गन्धर्वेण केनचित् प्रबलेन बलान्मुषितः स्वगृहेऽवस्थाप्यते स्म। दिनत्रयं यावत् स तत्रैवाऽन्तर्हित आसीत्। ततो देवा वृत्तमिदमवगत्य, चिरात् सोमं पिपासवः वाग्देवीमेकहायनीं गां विधाय तया तं गन्धर्वेभ्यो निरक्रीणन्। पुनस्सा गायत्री तार्क्ष्यरूपधरा सोमं तं देवेभ्यो गृहीत्वा भुवमानीय कद्र्वै दत्त्वा तेन स्वमातुर्दास्यमूमुचत्" इति। एवं सोमलता प्राप्ता देवैः ततो मनुष्यैरिति"।

सोमागमनप्रकारेऽल्पीयान् भेदः श्रुतिषु

सोमागमनप्रकारे श्रुतिष्वेवाल्पीयान् भेदो दरीदृश्यते। ऐतरेये[1] सोमस्य गन्धर्वसमीपावस्थितिमारभ्यैव प्रवृत्ता कथा। [2]तैत्तिरीयमाध्यन्दिनशाखयोः कद्रूसुपर्णीविवादमारभ्य। तथैव[3] काठकसंहितायामपि। तैत्तिरीयसंहितागता सैवानुपूर्वी प्रायेण काठकेऽप्युपलभ्यते। तैत्तिरीयेऽन्यत्रापि[4] कथेयं प्रासङ्गिकतया सूचिता। सत्यप्येवमल्पीयसि क्वचित् क्वचित् सन्दर्भभेदे सामान्यस्वरूपं न भिद्यते। एतेनास्माकं भारतदेशे निकटप्रदेशेषु सोमलता नासीत्। परं जातायामावश्यकतायां प्रदेशान्तरादेव हिमवतः प्रान्तादेः सोढ्वाऽपि महत् कृच्छ्रं, यागाद्यर्थमानीता सेति प्रतीयते। अनन्तरस्मिन् कालेऽपि साऽत्र समभूमौ न प्ररोहतीति दौर्लभ्यमितो नापगतं तस्याः। यतोऽर्वाचीनकालिका वैद्यकग्रन्था अपि चरकसुश्रुतादयः पुराणानि च सोमस्य समभूमा-

---

१. **सोमो वै राजा गन्धर्वेष्वासीत्।** (ऐ० ब्रा० ५. २. १३. ३.)

२. **कद्रूश्च वै सुपर्णी चात्मरूपयोरस्पर्द्धेताम्।** (तै० सं० ६. १.६.१)

३. स एव पाठः (कठसं० २३. १०)। **दिवि वै सोम आसीत्। ते देवा एते माये असृज्यन्त सुपर्णी च कद्रूं च** (मा० श० ३. २. ४. १) **सोमो वा अमुत्रासीत्। ते देवा गायत्रीं प्राहिण्वन्।** इत्यादि (मैत्रायणीयसंहितायाम् ३. ७. ७.)

४. तृतीयस्यमितो दिवि सोम आसीत्, तं गाव्याहरत् (तै० सं० ३.५.७.२, तै० ब्रा०) ३. २. १. १.) कठसंहितायां विस्तृततरमिदमितिवृत्तम् (कठ० २४.१०) एते वा एतं गन्धर्वा अगोपायन्नमुष्मिन् लोके। तं गायत्र्याहरत्। इत्यादि (कठ० २४. ६.)

वनुत्पत्तिं क्वचिदेव तु पर्वतविशेषेषु तस्य प्ररोहं[1] कथयन्ति । एवं सत्यपि तस्य तादृशे दौर्लभ्ये तेन यागानुष्ठानं परमेकैकस्याऽपि त्रैवर्णिकस्य नितरामावश्यकमासीत् । यस्य गृहे पूर्वे त्रयः पुरुषाः सोमयागं नान्वतिष्ठन् स दुर्ब्राह्मणो मन्यते स्म । स सामाजिकेभ्यो धार्मिकेभ्यश्च व्यापारेभ्यो बहिष्कारं प्राप्नुवान आसीत् । यदि च स सोमयागमनुतिष्ठासति मध्ये काले सोमपानविच्छेदजनितमघं प्रायश्चित्तेन[2] वेदोदितेन पूर्वमपाकृत्यैव यागमनुष्ठातुमधिकुर्यात् । नाऽन्यथा ।

सोमयाग-विलोपः

कृच्छ्रेणाऽपि सम्पाद्य सोमं समग्रे भारतदेशे यागा अनुष्ठिता इति जानीमो वयमार्षग्रन्थेभ्यः, प्राचीनतमकाव्यादिभ्यः ऐतिहासिकग्रन्थेभ्यश्च । परं वैदिकयज्ञाना-मनुष्ठानपरिपाटीयमल्पानां महतां वा विन्ध्यस्योत्तरदेशेषु सर्वथा विलोपमुपगता । विन्ध्यस्य दक्षिणतोऽपि क्वचित् गोदावर्यास्तटेषु वैरल्येन, कावेरीतीरे चाऽत्यल्पशश्च द्वि-चतुरानुष्ठानरूपेण कथं कथञ्चिदात्मानं धारयन्त्यास्ते । न जाने कालस्य कुटिला गतिः किमितः परं कीदृशं च फलं प्रसोष्यत इति ।

पूतीकेन सोमयागानुष्ठानम्

एवमेतादृशानुष्ठानैकपरा विबुधा अपीदानीन्तनाः न मुख्यस्य सोमस्य स्वरूपं जानन्ति । पूतीकाख्यं लताविशेषमेव सादृश्यात् तत्स्थाने कुर्वाणास्तेनैव सोमयागमनु-तिष्ठन्ति सर्वमपि सौमिकं व्यवहारं तत्रैव कुर्वन्तः । तत्र च 'सोमाभावे[3] पूतीकानभिषु-णुयात्' इति वचनं प्रमाणयन्तः सौमिका गुणाः केचनांशतोऽपि तत्र सन्तीत्यवगच्छन्तः सोमसदृशेऽपि सोमबुद्धिं कृत्वाऽनुतिष्ठन्ति । स तु लताविशेषः पूतीकाख्यो नातिकठिनतया

---

१. हिमवत्यर्बुदे सह्ये महेन्द्रे मलये तथा । श्रीपर्वते देवगिरौ गिरौ देवसहे तथा ॥ पारियात्रे च विन्ध्ये च देवसुन्दे ह्रदे तथा । उत्तरेण वितस्तायाः प्रवृद्धा ये महीधराः । पञ्च तेषामधो मध्ये सिन्धुनामा महानदः । हठवत् प्लवते तत्र चन्द्रमास्सोमसत्तमः ॥ (सुश्रुतनि० चिकि०. अ. २९)

२. ऐन्द्राग्नं पुनरुत्सृष्टमालभेत य आतृतीयात् पुरुषात् सोमं न पिबेत्, विच्छिन्नो वा एतस्य सोमपीथो यो ब्राह्मणस्सन् आतृतीयात् पुरुषात् सोमं न पिबति । (तै० सं० २.१.५ ४)

३. 'सोमाभावे पूतीकानभिषुणुयात्' इति वचनं वैदिकमेव मन्वते सर्वेऽपि प्रामा-णिकाः । परं वचनमिदमिदानीमुपलभ्यमानसंहिताब्राह्मणग्रन्थेषु कुत्रापि नोपल-भामहे । पूतींको नाम लताविशेषः यत्र पत्राणि न सन्ति ।

दक्षिणदेशे सर्वत्रोपलभ्यते । उत्तरदेशे तु नान्विष्टमवसराप्राप्तेः । तत्र सोमयागमनुतिष्ठासुस्त्रैवर्णिकः सोमयागसङ्कल्पात् पूर्वमेव पूतीकोत्पत्तिस्थानमवगत्य, ततस्तमानीय, अन्येन वाऽऽनाय्य, ततो यागं सङ्कल्पेत । सोमयागसङ्कल्पात् द्वितीयस्मिन् दिवसे यागमध्ये एकहायन्या गवा, अन्यैश्च वस्त्रादिभिर्नवभिः द्रव्यैः तं कस्माच्चित् पुरुषात् क्रीणीयात् । क्रीत्वा च क्रयणादारभ्य दिनत्रयं यावत् राजाहायामवस्थाप्य तमासन्द्यां, प्रतिदिनं सायं प्रातर्जलेनाऽऽसिच्य[1] यथा स शुष्को न भवेत् तथा संरक्षेत् । चतुर्थदिनस्यापररात्रे सोमस्य तस्याऽभिषवोपायिकानि पूर्वाङ्गाव्यनुष्ठाय, ततः प्रातःकाले यथोक्तमभिषुत्य सोमं[2] ग्रहेषु चमसेषु तमापूर्य तत्सम्बद्धा देवताः स्तोत्रशस्त्रादिभिः स्तुत्वा, अनन्तरं तस्यै तस्यै देवतायै तमाहवनीये हुत्वा, होमावशिष्टं रसैकदेशं ऋत्विजो यजमानश्च भक्षयेयुः । एवं[3] सवनत्रयेऽपि क्रियत इति साधारणो विधिः । अयमेकदिननिर्वर्त्यव्यापारसमूहयुतो याग एकाह इत्युच्यते । एवमनेकदिनसाध्या न केवलम्, अनेकवर्षसाध्या अपि सोमयागाः श्रुतिषु चोदिता इति पूर्वमुक्तम् ।

सोमरसो मादको वा ?

(अत्र पाश्चात्यानां केषाञ्चन विदुषामाशयः)

सोऽयं सोमरसः पीतमात्रस्सन् मदमुत्पादयति पातुः । यजमानेन दत्तं सोमरसं पीत्वा मत्तास्सन्तो देवाः तदा तदा युद्धे स्वशत्रूनसुरानजयन् । यष्टारमन्वगृह्णंश्च बहुभिर्दानैरिति बहुशः शृणुमो वैदिकवचोभ्यः[4] । सोमरसं पीत्वैव मदेनाऽऽविष्टः

---

१. इदं च जलासेचनं सोमाप्यायनमित्युच्यते याज्ञिकसम्प्रदाये ।

२. उपरि बिलः मध्ये तनूकृतः अल्पोलूखलाकारः ऊर्ध्वपात्रविशेषो ग्रहः । चतुरस्रो गर्तवान् ग्रहणार्हमुष्टियुतः पात्रविशेषश्चमसः । उभयमपि दारवमेव ।

३. प्रातः, मध्यन्दिनम्, सायमिति भागत्रयमह्नः । तत्र यस्मिन् समये सोमलतां पाषाणेन कुट्टयित्वा रसं निष्पीड्य, तस्य होमभक्षणादिकं क्रियते स सर्वोऽपि व्यापारस्तत्तत्सवनपदेन व्यवह्रियते । यथा— प्रातःकाले क्रियमाणो व्यापारः प्रातस्सवनमिति । सायंकालिकस्य तु तस्य तृतीयसवनमित्येव व्यवहारः न तु सायंसवनमिति । सोमः सूयते अभिषूयते रसरूपेण निष्कास्यतेऽस्मिन्निति व्युत्पत्तिरत्र बोध्या । षुञ् अभिषवे इति धातुः ।

४. ते त्वा मदा अमदन् तानि वृष्ण्या ते सोमासो वृत्रहत्येषु सत्पते ।
(ऋ० सं० १.५३.६.)

अर्वाङ्हि सोमकामं त्वाहुः अयं सुतस्तस्य पिबा मदाय । (ऋ०सं०१.१०४.५.)
इन्द्रो मदाय वा वृधे शवसे वृत्रहा नृभिः । (१.८१.१.) मदे मदे हि नोददिः (१.८१.७.)

अस्य पीत्वा मदानां देवो देवस्यौजसा । विश्वाभिभुवना भुवत् । (ऋ०८.९२.६.)

शक्रः स्वशत्रूनायोधने पराजेतुमुत्सहते स्म। रीतिरियमेवाऽऽद्रियते स्म मनुजैरपि तदा तदा। अत आर्यावर्तनिवासिनामार्याणां प्राचीनानां किमप्यपूर्वमिदं मादकं मोदकं वा पानमासीत्, येन मत्तास्सन्त आत्मानमपि विस्मृत्य दुःसाध्यमसाध्यं वा कार्यं सुखेनासाधयन्। अतो मदजनिका पानपरिपाटिरियं पूर्वमार्येषु सर्वसाधारणी सुप्रसृता चाऽऽसीदिति पाश्चात्याः पण्डितवराः साटोपमात्मीयमाशयमाविश्चक्रुर्ग्रन्थरूपेण लेखरूपेण च। तेषु केषाञ्चिद्वचनान्युद्ध्रियन्तेऽधो विषयविवेचनाय[1]। तस्याऽयं सारभूतोंऽशः। सोम-

---

1. (a) The essence of Soma sacrifice is the gift to Indra and the gods of the strong intoxicating liquor which impels them to be mighty and richly to reward their votaries and this is the conclusion reached by Victor Henry in his careful study. (—A. B. keith, Taittiriya Sanhita, Vol II, Introduction, P. 121)

(b) It is an accepted fact with each people thot Soma was an intoxicating drink, and that it was regarded as the tipple of the gods, inspiring them to those valorous deeds which men craved of them.(—Bloomfield, Religion of the Veda, P. 143)

(c) The intoxicating power of Soma is chiefly and very frequently, dwelt on in connection with Indra whom it stimulates in his conflict with the hostile demons of the air.(—A.A.Macdonell,History of Sanskrit Literature,P.98)

(d) The Indians of the Rigveda were acquainted with at least two kinds of spirituous liquor. Soma was the principal one. Its use was, however, restricted to occasions of a religious character such as sacrifices and festivals. (—A. A. Macdonell, History of Sanskrit Literature, p. I65)

(e) That intoxicating drinks were in common use in vedic times cannot be questioned. In Hymn No. 1.191.10 we read the words : 'I deposit the poison in the solar orb like a leather bottle in the house of a vendor of spirits' which clearly proves that wine was, kept in leathern bottles and sold in the bazaar. Dr. Rajendra Lal Mitra is very decided upon the fact that the earliest Brahman settlers were a spirit-drinking race and indulged largely in Soma beer and strong spirits, in the sense of intoxica-

यागानुष्ठानस्य मुख्यमिदमुद्देश्यम्—यदिन्द्रादयो देवा यजमानेन किञ्चिन्निमित्तीकृत्य

---

ting drinks. (Vedic Religion by K. S. macdonald, p. 62)

(f) The drink so often spoken of in the Vedic times as Soma or Soma juice is now admitted; we believe, by the best sanskrit scholars to have been intoxicating. The numerous references to it in the Rigveda Sanhita are consitant only with such as interpretation····· the Soma juice the part of hops in beer. Its effects on gods and men were those of alcohol(K. S. Macdonald, Vedic Religion, p. 66)

(g) Canon Rawlinson writes in the Sunday at Home thus : No doubt the origin of the Soma ceremony must be referred to the exhilarating properties of the fermented juice and to the delight and astonishment which the discovery of them existed in simple minds. But exhilaration is a very differcnt thing from drunkenness; and though orientals do not often draw distinction, we are scarcely justified in concluding without evidence than any which has been aduced as yet, that the soma ceremony of the Hindus was in the early ages a mere Bacchenalian orgy, in which the worshippers intoxicated themselves in honour of approving deities. Exhilaration will sufficiently explain all that is said of the Soma in the Rigveda and it is charitable to suppose that nothing more was aimed in the Soma ceremony (K.S. macdonald, Vedic Religion, pp. 70-71)

[अत्र एकेन महाशयेन योऽभिप्रायः प्रकाश्यते तमेव सर्वेऽन्येऽपि पण्डिता अनुमोदन्तेऽनुवदन्ति च । तत्र वेदेषु सर्वत्राऽपि मदशब्दः प्रयुज्यमानो हर्षपरक एव । न तु मदप्रतिपादकः । सोमरसस्य मदोत्पादकता नैवास्ति इति सप्रमाणोदाहरणं निरूपितमस्माभिर्मूले । तेनैवेदं समाहितं भवति, नाऽधिकं वक्तव्यमपेक्षत इत्युत्पश्यामः । उदाहरणविशेषे परं किञ्चिद्वक्तव्यम् । तदुच्यते—ऋग्वेदे विषहरणमन्त्रोऽयं श्रूयते—**सूर्ये विषमासजामि दृतिं सुरावतो गृहे** (ऋ०सं० १.१९१.१०) इति । अत्र भाष्यं सायणीयम् —अहं विषावृतोऽगस्त्यः सूर्ये सूर्यमण्डले विषमावृत्य आसजामि आसक्तं करोमि । तत्र दृष्टान्तः— सुरावतो गृहे सुरानिर्मातृसदने दृतिमिव चर्ममयं सुरापात्रमिव । यथा तत्कर्तुर्न दोषाय भवति तद्वदादित्यस्य विषं न बाधकमित्यर्थः । इति । अनेन सुरानिर्मातुर्गृहे दृतेरवस्थितिमात्रमनूद्यते । स च स्वजीवनार्थं निन्दितं कर्म करोति । एतावता सर्वे भारतीयास्तदेव कर्म कुर्वन्त आसन् । सुरानिर्माणमेषां प्रतिगृहं प्रचलतिस्मेत्यादिकथनं कथं नोपहासाय भवतीति सुधिय एव विभावयन्तु ।]

सोमरसं पाययन्ति । पीतमात्रश्च स तानिन्द्रादीन् मादयति । मत्ताश्च ते देवा यजमानाभिलाषमापूरयन्ति । अतश्च सोमपानमिदं सुरापानवन्मदोत्पादकमित्येव परिनिष्ठित आशयो हेन्रीमहाशयस्य, अन्येषामपि केषाञ्चन ।

परमिदं वस्तुतत्त्वापलापे प्रयतनमेव। यतो हि सोमरसस्य मदजननस्वभाव एव नास्ति । सपीतस्सन्नुत्साहं पातुस्तत्तत्कार्येषूपजनयति । कवयितुः कल्पनाशक्तिमुपचिनोति । शारीरं बलपुष्टि-सौष्ठवादिकमभिवर्द्धयतीत्येतावन्मात्रम्, न तु बुद्धिविकाररूपमदोत्पादकता तस्य । परमन्ये बह्वो गुणाः श्रूयन्ते सोमे । अनेकशतवर्षजीवित्वम्, जरतोऽपि तारुण्योत्पत्तिः, बुद्धिपाटवोत्पादनम्, कृच्छ्रसहनशीलता इत्यादिभिर्गुणगणैस्सह परमपवित्रतासम्पादनमपि तस्य मन्त्रेषु शतशः श्रूयते । तेषु च द्वित्रा मन्त्रा भाष्येण सहाऽधोनिर्दिष्टाः[1] ।

यदि तु पीतस्य सोमस्य मदजनकता स्यात् तर्हि तस्य पापापनोदकता न कदापि अश्रोष्यत । नहि श्रुतिषु स्मृतिषु वा सुरायाः पापनिवर्तकता श्रुता कुत्राऽपि । यतस्सा पीतमात्रैव सती पातुर्विकलयति बुद्धिम् । न केवलं बुद्धेर्वैकल्यमुत्पादयति प्रायस्सर्वेषामिन्द्रियाणां विवशतामापादयति । सुरापः पुरुषः कृत्याकृत्यविवेकशून्यो भवति । सुरापानं तु सर्वथा निषिद्धं निन्दितं च त्रैवर्णिकस्य श्रुतिषु स्मृतिषु च । कदाचित्कस्यचिदेवं शङ्कोदियात्—रागप्राप्तस्य स्वतन्त्रस्य सुरापानस्य श्रुतिस्मृत्यादिषु सत्यपि निषेधे यज्ञसम्बन्धिनस्तस्य (यज्ञे देवताभ्यो हुत्वाऽवशिष्टस्य) पानं[2]

---

१. (a) त्रिभिष्ट्वं देव सवितः+अग्ने दक्षैः पुनीहि नः॥ (ऋ० सं० ९. ६७. २६) अत्र सायणभाष्यम्—हे देव स्तुत्य सोम ! पवमानगुणविशिष्ट त्रिभिर्धामभिः अग्निवायुसूर्यात्मकैः त्रिभिः शरीरैः नः अस्मान् पुनीहि परिशुद्धान् कुरु ।

(b) **उभाभ्यां देवसवितः पवित्रेण सवेन च । मां पुनीहि विश्वतः** ॥ (ऋ० सं० ९. ६७. २५) हे देव द्योतमान सोम ! त्वं पवित्रेण पापशोधकेन त्वदीयेन तेजसा सवेन सोमाभिषवेण च एताभ्यामुभाभ्यां विश्वतः सर्वतः मां पुनीहि पूतं कुरु (सायणभाष्यम्) ।

(c) **पवमानरुचा रुचा** (ऋ० ९. ६५. २) हे पवमान शुद्ध सोम !

(d) **अर्कः पवित्रं रजसो विमानः पुनाति देवानां भुवनानि विश्वा । पवित्रं वै सोमः**, इत्यादयो मन्त्रा अप्यत्रानुकूलाः ।

२. (a) **अर्द्धं वै प्रजापतेरात्मनो धैर्यमासीत्, अर्द्धं माल्व्यम्, यद्धैर्यमासीत् तत् पुरस्तादकुरुत, यन्माल्व्यं तत् पश्चात् पर्यौहत, यद्धैर्यं सोमो वै सः ततो ब्राह्मणमसृजत तस्मात् ब्राह्मणस्सर्व एव ब्रह्माभिधीरो यन्माल्व्यं सुरा वै सा······ पाप्मा वै माल्व्यं तस्मात् ब्राह्मणस्सुरां न पिबेत् पाप्मनाऽऽत्मानं नेत्संसृजा इति (मै० सं० २. ४. २)** ।

श्रुत्यैव चोदितमिति, तदपि विविच्यमानं क्षणमात्रमपि नावस्थातुं शक्नोति। यतो हि यज्ञेऽपि हुतावशिष्टायास्सुराया अन्यस्मा एव कस्मैचिदृत्विग्यजमानव्यतिरिक्ताय परिक्रीताय निन्दिताय दानं विधीयते। तथाहि —

सन्ति वेदेषु विहिता लक्षाधिकाः पवित्रतमा यागाः। तेषु वाजपेयाख्यमेकं सोमयागम् एकं च सौत्रामणीसंज्ञकं पशुयागं मुक्त्वा, यागान्तरे क्वचिदपि न सुरासम्बन्धः श्रुतः। तत्रापि सौत्रामण्यां तावत् तेन यागमात्रम् अग्नौ हविःप्रक्षेपयुक्तं विहितम्। न तु तस्य भक्षणं यागान्तरवदृत्विजां यजमानस्य वा। किन्तु भक्षणाय कञ्चित् ब्राह्मणं धनेन परिक्रीणीयादिति तत्र विधिः।[1] तत्र भक्षणजन्यं पातकमङ्गीकृत्यापि धनलोभाद्यः प्रवर्तते ब्राह्मणब्रुवः तं परिक्रीणीयात्। तादृशस्याऽपि तस्याऽलाभे यागावशिष्टायास्सर्वस्या अपि सुरायाः वल्मीकच्छिद्रेषु शतच्छिद्रयुतायां[2] कुम्भ्यां च क्षारणस्य विहितत्वेन तत्र शेषस्यैवाभावात् पानस्याप्रसक्तेः।

एवं वाजपेयेऽपि सोमग्रहैस्साकं सुराग्रहान् यागार्थं विधाय, यागानुष्ठानानन्तरं अवशिष्टस्य सोमस्य ऋत्विग्भिर्यजमानेन च भक्षणं, सुरायास्तु वैश्येभ्य[3] एव निन्दितेभ्यो

(b) **अर्द्धं वै प्रजापतेर्माल्व्यमासीत्'''सुरा वाव सा पाप्मा वैमाल्व्यं तस्मात् ब्राह्मणस्सुरां न पिबति पाप्मना नेत्संसृज्या इति (काठसं० १२. १२)**

(c) अस्या एव श्रुतेरर्थं श्लोकेनानुवदति मनुः—

सुरा वै मलमन्नानां पाप्मा च मलमुच्यते।

तस्माद् ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत्॥ इति(म०स्मृ०११.९३.)

(d) **अन्नस्य वा एतच्छमलं यत्सुरा पाप्मैव खलु वै शमलम्**।(तै०ब्रा०१.३.३.६)

(e) **अशिव इव वा एष भक्षो यत् सुरा ब्राह्मणस्य**। (श०ब्रा० १२. ८. १.६)

माल्व्यं=मलरूपम्। शमलम्=मलमेव।

१. (a) **ब्राह्मणं** परिक्रीणीयादुच्छेषणस्य पातारम्। यदि **ब्राह्मणं न विन्देत्**। **वल्मीकवपायामवनयेत्** (तै० ब्रा० १.८.६.२)। उच्छेषणं होमशेषः।

(b) ब्राह्मणं+पातारम् (आप० श्रौ० १९.९.३) अत्र **कपर्दिभाष्यम्**—ब्राह्मणं ग्रहशेषस्य पातारं परिक्रीणीत। तस्याऽपि सुरां पिबतः पातकम्। न तु यजमानस्य तमत्र कार्ये नियुञ्जतः। ब्राह्मणं परिक्रीणीयादुच्छेषणस्य पातारमिति श्रुतेः॥

२. **शतातृण्णायां समवनयति** (तै०ब्रा० १.८.६.२) शतातृण्णा च्छिद्रशतयुता कुम्भी।

३. **वाजसृद्भ्यस्सुराग्रहान् हरन्ति, अनृतेनैव विशं संसृजति** (तै०ब्रा०१.३.३.७) वाजसृतः अन्नस्यार्जयितारो वैश्याः, तेभ्यः सुराग्रहान् सोमरहितान् दद्युः (सा०भा०)।

दानं विहितम् । तत्रैवैतस्या निन्दा[1]ऽपि कृता बहुधा सोमप्रशंसया सह । अतश्च महत्यपारे वेदार्णवे उच्चावचयज्ञजातानां लक्षाधिकानां विधायके द्वित्रेष्वेव यागेषु सुराया विधानम्, तदपि च देवतोद्देश्यकत्यागमात्रे, न तु भक्षणे, भक्षणार्थं तु कश्चित् ब्राह्मणाधमो वैश्याधमो वा आनाय्य पाय्यते, तस्याऽप्यलाभे वल्मीकच्छिद्रे प्रासनम्, अग्नौ होमो वा, तत्राऽपि सौत्रामण्यां विकल्पः इत्येवमादिकं निर्बन्धं पश्यन्तो वयं— कथं वेदे सुरापानं यागेषु निराबाधं प्रसृतमासीत्— इत्यभ्युपगन्तुं प्रभवामः । अतः पाश्चात्यानां कथनमिदं विदुषां कियदवधि सत्यतां भजत इति सुधिय एव विभावयन्तु वैदिकवाङ्मयपरिशीलिनः पौरस्त्याः पाश्चात्या वा । किमधिकलेखनेन ?

वेदस्थो मदशब्दो हर्षवाचकः

एवमेव सोमरसस्य मदोत्पादकता कदाऽपि नास्तीति निरूपितं पूर्वमस्माभिः । सति चैवं तेषु तेषु मन्त्रेषु यो मदशब्दः प्रयुक्तः स सर्वोऽपि[2] हर्षपरकः स्तुतिपरो वा । न तु बुद्धिविकाररूपावस्थाविशेषपरक इत्येव निश्चेतव्यं भवति । अत एव यत्र यत्र वेदेषु सोमरसपानेन मदोत्पत्तिः श्रूयते स सर्वोऽपि हर्षविशेष एव । निरतिशयतृप्तिर्वा इत्येव सुवचम् । एवमेव वेदभाष्यकारः आचार्यः सायणोऽपि सर्वत्राऽपि वेदभाष्येषु व्याचष्टे । 'सोमपानेनातितरां हृष्टा इन्द्रादयोऽमराः यजमानाभिलषितं पूरयन्ति' इत्येव तन्मन्त्राणां हृदयम् । मदशब्दस्तु वैदिकसाहित्ये हर्ष एव प्रयुज्यते । 'मदी हर्षग्लेपनयोः' 'भ्वादिः', 'मदिस्तुतिमोदमदस्वप्नकान्तिगतिषु', भ्वादिः, 'मदी हर्षे' दिवादिः' 'मद तृप्तियोगे' चुरादिः । एते चत्वारो मदधातवः । अत्र सर्वत्रापि हर्षरूपोऽर्थोऽनुगतो वर्वर्ति । क्वचित् सत्यपि प्रयोगे मनोविकाररूपार्थे स्थलविशेषमनुसृत्य अन्यत्र सर्वत्र हर्षरूपार्थे एव प्रयोगं पश्यामो वयम् । अतश्च भाष्यानुसारेण तत्तत्प्रकरणानुसारेण च सोमपानस्थले सर्वत्र हर्षरूप एवार्थो मदपदस्य स्वीकर्तव्यो भवति । सायणाचार्यस्येवान्येषामपि

---

१. **पाप्मा वै सुरा** । (काठ० १२.१०.) अनृतं सीसम् । अनृतं सुरा । (का० १२.१०) **अन्नस्य वा एतच्छमलम्, यत्सुरा । पाप्मैव खलु वै शमलम्** ।। (तै० ब्रा० १.३.३.६, **प्राणभक्षमेके** (कात्या० श्रौ० १९.३.१८) आघ्राणं प्राणभक्ष इत्युच्यते । परिक्रीतो वा वैश्यराजन्ययोरन्यतरः । अङ्गारेषु वा बहिष्परिधि दक्षिणतो जुहुयात् ।। प्रथमसूत्रे पानकर्ता राजन्यो वैश्यो वा विधीयते । द्वितीयसूत्रेऽङ्गारेषु होम एव ।

२. **प्रमन्दिने पितुमदर्चता वचः** (ऋ० १.१०१.१) **अत्र सायणभाष्यम्-मन्दिने मदि**-स्तुतिमोदमदस्वप्नकान्तिगतिषु । तदुक्तं यास्केन-मन्दी मदयतेः स्तुतिकर्मण इति । मन्दिने स्तुतिमते स्तोतव्यायेन्द्राय ।

इन्द्रादयो देवा मदान्विता वर्ण्यन्ते । सोमरसपानेनाऽऽलस्यमपगच्छति । उत्साहः प्रवर्द्धते कार्येषु । बुद्धेर्विकासः कश्चनाऽन्यादृशो भवति । अत एवेन्द्रादीनां सोमपानेन प्रवृद्धबलपुष्टिधैर्यवीर्याणां युद्धेषु तत्र तत्र जयः श्रूयत इति कथनमेव युक्ततरं सङ्गच्छते । न तु निषिद्धस्य, सभ्यसमूहानर्हस्य, पातित्यावहस्य, चित्तविकृतिं विसंज्ञतारूपामुत्पादयितुः सुराद्रव्यस्य पूततमानां देवानां तेषु तेषु पवित्रतमेषु यज्ञेषु प्रियतमपानार्हताकल्पनमिति ।

सोमामृतयोरभेदः

तत्र श्रुतिस्मृतिपुराणादिषु देवानामन्नतया पेयतया वा (देवानां भोजनं) यदुपवर्णितममृतं तदिदं सोमरसान्नातिरिक्तमिति प्रतीयते । सोऽयमाशयः महाभारतेन पुराणान्तरैश्च पोपुष्यते । तथाहि—महाभारते आदिपर्वणि अमृताहरणकथोपवर्णिता । संक्षिप्ता सा कथेत्थम्— देवा[1]सुरयुद्धे पराजिता देवा स्वस्वस्थानात् प्रच्याविताः पुनः स्वस्थानलाभाय, असुरैस्सह सन्धाय क्षीरोदधिं मथित्वा, ततोऽमृतमुद्धृत्य, पानकालेऽसुरानतिसन्धाय, यथेष्टं तत् पीत्वा, अवशिष्टमिन्द्रसमीपेऽस्थापयन्निति, तच्च तत्रैव सुरक्षितं वर्तत इति च पूर्वकथा ।

ततः कदाचित् कद्रूर्नागमाता, विनता च गरुडमाता सायं समुद्रस्य तीरं गते, तत्र दूरे चरन्तमुच्चैःश्रवसं तुरगमवलोक्य तत्पुच्छवर्णविषये (पुच्छः श्वेतः कृष्णो वा) विवदमाने अभूताम् । विवादावसाने अन्यतरपराजये पराजितया स्वापत्यैस्साकं जैत्र्या दासीभूयाऽवस्थेयमिति पणबन्धं कृत्वा द्वे अपि तदा स्वगृहं प्रत्यैताम् । रात्रौ च कद्रूः स्वसुतानवोचत्—विनतया सह मया पणबन्ध एवं कृतः । यद्युच्चैःश्रवसो वालधिः श्वेतः स्यात् तर्हि श्वःप्रभृति मया युष्माभिस्साकं विनतायाः दास्या भाव्यम् । अतो रात्रावेव गत्वा वाजिनस्तस्य पुच्छस्समग्रोऽपि यथा कृष्णीभवेत् तथा कर्तव्यमिति । तैश्च तथा कृते सति प्रातः कद्रूरसितमश्ववालं विनतायै प्रदर्श्य ससुतां तां दासीं चकार । तां तत्सुतं च साऽतिमात्रमक्लेशयत् । तदसहमानो वैनतेयः अमृतप्रदानेनात्मनो मातुश्च दास्यान्मोचनं सम्प्रार्थ्य, इतः स्वर्गं गत्वा, तत्रत्यैः सोमरक्षिभिस्सह महद्युद्धं कृत्वा तान् पराजित्य, ततोऽमृतमानीय नागमात्रे दत्त्वा, आत्मानं मातरं च दास्यान्मोचयामासेति[2] ।

सोमाहरणकथया सह बहुष्वंशेषु संवदतीयं कथा । तथाहि—

---

१. देखिए महाभारत आदि पर्व १६-२९. Calcutta Edition by M. M. Sidhanta Bagish and Bombay edn. of Krishnacharya 20-35.

२. शातपथीं सोमाहरणरीतिमनुसरतीयम्, (देखिए श० ब्रा० ३. ६. १)

सोमानुबद्धायां कथायां कद्रुसुपर्ण्यौ कर्त्र्यौ। जयपराजयावपि तावेव। पणबन्धोऽपि तादृशः। (विनता सुपर्णी इति पर्यायपदे) ये सोमरक्षिणस्त एवामृतरक्षकाः। गायत्र्या सोमाहरणकाले सोमस्य पत्रमेकं मार्गे पतितमित्युक्तं श्रुतौ।[1] गरुडेनामृताहरणकाले स्वेच्छयैव पत्रमेकमात्मन उत्सृष्टमित्युक्तं[2] भारते। गायत्र्यपि पक्षी भूत्वैव (सुपर्णो=गरुडो भूत्वा) सोममाहरदिति श्रुतौ प्रसिद्धम्। अमृतार्थं गतो गरुडः सोमहरणार्थमागत इति देवैः[3] व्यवहृतम्। किञ्च कथायामत्र सोमशब्दः अमृत-

---

१. **गायत्रिया ह्रियमाणस्य यत्ते। पर्णमपतत् तृतीयस्यै दिवोऽधि। सोऽयं पर्णस्सोमपर्णाद्धि जातः।** (तै० ब्रा० २.१.५.)। तृतीयस्यामितो दिवि सोम आसीत्। तं गायत्र्याहरत्। तस्य पर्णमच्छिद्यत तत् पर्णोऽभवत्॥ (तै० सं० ३. ५. ७. १)

२. वज्रस्य च करिष्यामि तवैव च शतक्रतो।
एतं पत्रं त्यजाम्येकं यस्यान्तं नोपलक्ष्यसे॥
(म० भा० आदि०. २८. २१.)

३. a. कश्यपस्य मुनेः पुत्रो विनतायाश्च खेचरः।
हर्तुं सोममभिप्राप्तो बलवान् कामरूपधृक्॥
समर्थो बलिनां श्रेष्ठो हर्तुं सोमं विहङ्गमः।
सर्वं सम्भावयत्यस्मिन् असाध्यमपि साधयेत्॥
[महाभा० आ० २५.४१,४२. कलकत्ता सं०]

b. श्रुत्वैतद्वचनं शक्रः प्रोवाचामृतरक्षिणः।
महावीर्यबलः पक्षी हर्तुं सोममिहोद्यतः॥ ४३॥
तच्छ्रुत्वा विबुधा वाक्यं विस्मिता यत्नमास्थिताः।
परिवार्यामृतं तस्थुः वज्री चेन्द्रः प्रतापवान्॥ ४५॥

c. इन्द्रवचनम् गरुडं प्रति अमृतमधिकृत्य—
न कार्यं यदि सोमेन मम सोमः प्रदीयताम्।
अस्मांस्ते हि प्रबाधेरन् येभ्यो दद्याद् भवानिमाम्॥

गरुडः—किञ्चित् कारणमुद्दिश्य सोमोऽयं नीयते मया।
न दास्यामि समादातुं सोमं कस्मैचिदप्यहम्॥
अथ सर्पानुवाचेदं सर्वान् परमहृष्टवत्।
इदमानीतममृतं निक्षेप्स्यामि कुशेषु वः॥
स्नात्वा मङ्गलसंयुक्ताः ततः प्राश्नीत पन्नगाः।
ततस्स्नातुं गतास्सर्पाः प्रत्युक्त्वा तं तथेत्युत॥
शक्रोऽप्यमृतमाक्षिप्य जगाम त्रिदिवं पुनः।
अथागतास्तमुद्देशं सर्पास्सोमार्थिनस्तदा॥

शब्दश्च पर्यायेणैव पौनःपुन्येन परस्परं प्रयुक्तौ। तादृशाश्च केचन श्लोका अधष्टिप्पण्यामुद्धृताः।

एवं श्रीमद्भागवते देवासुराणाममृतोत्पादनानन्तरं तत्पानकाले विष्णुना स्त्रीवेषधारिणा छलेन देवेष्वेवामृतं पाययत्सु ज्ञात्वैतत् स्वर्भानुः देवैस्सह मिलित्वा विष्णुना दीयमानममृतं पपावित्यस्ति कथा प्रसिद्धा। तत्रामृतपदस्थाने सोमशब्दः प्रयुक्तः[1]।

सोमस्यामृतरूपत्वं वेदेऽपि बहुधा श्रुतम्[2]। अमृतनिष्ठा गुणा एव सोमेऽपि श्रूयन्त इत्युक्तमेव पुरस्तात्। एकमेव देवीभागवतविष्णुपुराणपद्मपुराणादिषु अमृतानयनकथायामानुपूर्वीं समानां पश्यामो वयम्। अतो वैदिकपौराणिककालयोरमृतस्य सोमस्य चाभेद एव मन्यते स्मेत्यवगम्यते।

उपसंहारः

तदयमत्र निर्गलितस्सारांशः— सृष्टितः कियतश्चन कालादारभ्य भारते देशे याज्ञिकी प्रथा प्रचलिता प्रथिता चासीत्। स्वापेक्षयोत्कृष्टतमान् देवान् स्वाभिलषितफलदातॄन् निश्चित्य विशिष्टकालदेशादिषु तानाराधयन्ति स्म भारतीयाः। यत्किञ्चित् स्वभोजनार्हं यथार्हं संस्कृत्य प्रथमं देवताभ्यो दत्त्वैवावशिष्टं भुञ्जते स्म। सत्यां प्रसक्तौ तान् स्तुवन्ति च। स्वाभिलषितफलदानाय तान् प्रार्थयामासुः। तैर्दत्तं फलं परिप्राप्य नितरां मोदन्ते स्म। तेषां तत्तद्देशकालादौ अग्नौ तत्तद्धविःप्रक्षेपणमेव यागो देवपूजारूपो मुख्यकर्तव्यतया परिगणित आसीत्। तेषु सोमयागः प्रधानतमं स्थानमलभत। सोमयागस्याननुष्ठाता त्रैवर्णिको व्रात्यस्सामाजिककार्यानर्हो मन्यते स्म। तादृशयागाङ्गभूतस्सोमो लताविशेषः। नैकविधा अतिशयिततमा अनेके गुणा-

---

परस्परकृतद्वेषाः सोमप्राशनकर्मणि।
यत्र तदमृतं चापि स्थापितं कुशसंस्तरे॥ इत्यादि।
सोमस्थानमिदं चापि दर्भास्ते लिलिहुस्तदा॥ इति च।
महाभा० आ०२९.९-२६॥ (Cal. Edition in Bangali Script)

१. देवलिङ्गप्रतिच्छन्नः स्वर्भानुर्देवसंसदि।
प्रविष्टस्सोमममपिबच्चन्द्रार्काभ्यां च सूचितः॥
(श्रीमद्भाग०-८. ९. २४)

२. सोमो राजाऽमृतं सुतः+इदं पयोऽमृतं मधु। तै० ब्रा० २.६.२.१. तथा द्रष्टव्यं–– काठ० सं० ३८.१; मै० सं० ३.११.३९; काण्व० सं० २१.७२; माध्यं० सं० १९. ७२. तथा तै० सं० ३. ३. ३. ३.

शून्य-निरालम्बनवादयोर्भट्टपादीया दृष्टिः

[द्वितीयं व्याख्यानम्]

दार्शनिकानां मल्लयुद्धक्षेत्रमिदम्— यत्ख्यातिस्वरूपपरिशीलनं नाम । एकस्य पन्थानमपरो नानुसरति । स्वस्वसिद्धान्तव्यवस्थायै सर्वोऽपि दार्शनिकः प्रथमत एव कञ्चन पन्थानं निश्चित्य गच्छति । गच्छंश्च मध्येमार्गमन्यैः प्रक्षिप्यमाणं मार्गावरोधकं प्रस्तरखण्डादिकं दूरीकुर्वन्नग्रे यातीति दार्शनिकानां स्वभावः । तत्रैक एव यदि सर्वेषां मार्गान् अवरुरुत्सुः शिलाखण्डान् प्रक्षिपति तर्हि सर्वे तमपाकुर्वन्तोऽपि निराकरणप्रक्रियायां न सर्वे एकीभावमवाप्नुवन्ति । न हीमे यौधिष्ठिरं न्यायम्—**'अन्यैस्सह विरोधे तु वयं पञ्चोत्तरं शतम्'** इत्यवलम्बन्ते । एतेषामीदृशमनैक्यं प्रेक्ष्यैव मार्गावरोधका अपि पृथक्पृथगेव मार्गमवरुन्धन्त्येव । नेयं रीतिर्दोषाय भवेद्दार्शनिकानाम् । ओदनस्य सूपस्य च भक्षणे समानेऽपि चुल्लिभेदेनौदनिका विप्राः पृथगेव भवन्ति । सत्यपि प्रकारभेदे तृप्तिस्तु सर्वत्र समाना । सूपयुतमोदनमुपभुज्य सर्वस्योद्गारस्तुल्य एव । तत्र मीमांसक आत्मानं भिन्नं मन्यमानोऽपि वैदिकत्वेन सर्वानेकीकर्तुं चेष्टते । भिन्नमार्गावलम्बिनोऽपि दार्शनिकाः त्रिषु वादेषु समावेशयितुं शक्यन्ते— सर्वं शून्यमिति वाद एकेषाम्, एक एवास्ति नान्य इत्यपरेषाम्', भेदेनानैव वर्तत इत्यन्येषाम् । यदि किमप्येकमस्ति अथवा नाना सन्ति तर्हि भीतेरवसरः स्यादिति सर्वं शून्यमित्यङ्गीकारे न भीतेरवसर इति प्रथमे वक्तारः । एकस्यैव वस्तुनोऽस्तित्वे द्वितीयस्याभावान्न साध्वसस्यावसरः **'द्वितीयाद्धि भयं भवति'** इति द्वितीये वक्तारः । नानात्वे विद्यमानेऽपि न भयस्यावसरः, करचरणाद्यवयवेषु विभिन्नेषु सत्सु न तेभ्यो भीतिरुत्पद्यते । **'अतो भेदेन नानावर्तन्ता'-मिति** तृतीये वक्तारो भवन्ति। दार्शनिकेषु न चतुर्थः कश्चन प्रकारो मौलिकः परिदृश्यते । तत्रास्तिनास्त्योः कलहः भेदेनानैव वर्तत इति पक्षप्रसाधनेन स्वयमुपशमितो भवतीति तमेव मीमांसकसम्मतं पक्षं गृह्णीमः ।

तत्र सर्वं निरालम्बनं शून्यं वेति वादः प्रत्यक्षमनुमानञ्चेति प्रमाणद्वयमूलकः। प्रमेयसिद्धिं प्रति प्रमाणस्यावश्यकत्वेन द्वे प्रमाणे स्वीकृत्य स्वीयं वादं स्थापयतीति तस्य प्रकारः । तत्र द्वाभ्यां प्रमाणाभ्यामतिरिक्तेन प्रमाणेन यद्यस्तित्वम् इतरस्साध-

स्सन्ति सोमे । स देवानामतितरां प्रीतिजनक आसीत् । विशेषतश्चेन्द्रस्य । यत्र सोमयागः प्रचलति तत्रेन्द्र अनाहूतोऽपि गत्वा बलाच्चौर्येण वा सोमं पिबतीत्यत्र सन्ति वेद एव बहून्याख्यानानि ।

स च सोमो भारतदेशे समभूमौ न प्ररोहति स्म । पर्वतप्रदेशेभ्य एव स आनेतव्य आसीत् । पूर्वं स त्रिदिवे देवेष्वेवासीत् । गायत्री (च्छन्दः) सुपर्ण-रूपं धृत्वा तं भुवमानयत् । तेन च सोमेन इन्द्रादीन् देवानुद्दिश्यानुष्ठेयतया लक्षाधिका यागा वेदेषु निरूपिता विहिताश्च । तेषु जीवता पुरुषेणाधिकारिणा केचित् फलार्थमनुष्ठेयाः केचिद् अवश्यकर्तव्या अननुष्ठानजन्यदोषाप्राप्तये । सेदानीं यज्ञानुष्ठानपरिपाटी भारतदेशे विलुप्तप्रायैव । दक्षिणापथे क्वचित् कोणे कदाचिदत्यन्तविरलतया प्रचलति । तत्रापि न सोमलतया यागोऽनुष्ठीयते, तस्या अप्राप्यतयैव । तत्स्थाने पूतीकाख्यं लताविशेषं सोमस्य मन्दसदृशं गृहीत्वा तेनैव यागमनुतिष्ठन्ति याज्ञिकाः ।

सोऽयं लताविशेषस्सोमो न केवलं यागौपयिकं द्रव्यम् । किन्तु दिव्यौषधिरपि । स सुतरां पवित्रतमः न तस्य मदजनकता कदापि यथा वैदेशिकाः कथयन्ति । परं बलपुष्टिहर्षादिसम्पादकः । अनेकशतवर्षाणि जीवयति पातारम्, अरोगिणं दीर्घदृष्टिं च करोति । वेदेषु सर्वत्राऽस्योत्साहजनकता हर्षवर्द्धकतेत्येव श्रूयते । अतः श्रुतिषु सोमसम्बन्धेन श्रूयमाणा मदशब्दास्साकल्येन हर्षवाचका एव । विषयेऽत्र पाश्चात्यानां पण्डितानामुक्तिः—सोमो मदजनकः । स सुरावद् यज्ञेषु निरर्गलं पीत आसीत् —इत्यादिका सर्वथा निर्मूलैव ।

किञ्च वेदेषु गायत्र्या यत् द्युलोकात् सोमाहरणमुक्तं तदेव (गरुडेन) सुपर्णेन कृतं स्वर्गादमृताहरणं प्रकारान्तरेणोक्तं महाभारते पुराणेषु च । अतोऽमृतमेव सोमः । अत एवेन्द्रादयो देवास्तं सादरं सानुरागं च प्रतीक्षन्ते यज्ञेषु स्वेभ्यो दीयमानम् । अतश्च यज्ञेष्वधिकृता जनाः पवित्रतमेन सोमेनेन्द्रादीन् देवानिष्ट्वा स्वकर्तव्यपरिपालनात् प्रच्युताः, स्वाभिलषितं यज्ञियं फलं प्राप्नुवन्तो वा, सुदीर्घकालजीविनः, अन्ते च निरतिशयं स्वर्गसुखमप्यनुभवन्तः, कृतकृत्याः सर्वथाऽऽत्मानं परिरक्षेयुरिति भगवत्याः श्रुतिमातुर्मातृसहस्रेभ्योऽपि गरीयस्या आशयः ।

विवादविषयस्सोमो यथामति विवेचितः ।
अनेन प्रीयतां देवस्सोमः सोमार्द्धभूषणः ॥

॥ इति शम् ॥

स्सन्ति सोमे। स देवानामतितरां प्रीतिजनक आसीत्। विशेषतश्चेन्द्रस्य। यत्र सोमयागः प्रचलति तत्रेन्द्र अनाहूतोऽपि गत्वा बलाच्चौर्येण वा सोमं पिबतीत्यत्र सन्ति वेद एव बहून्याख्यानानि।

स च सोमो भारतदेशे समभूमौ न प्ररोहति स्म। पर्वतप्रदेशेभ्य एव स आनेतव्य आसीत्। पूर्वं स त्रिदिवे देवेष्वेवासीत्। गायत्री (च्छन्दः) सुपर्ण-रूपं धृत्वा तं भुवमानयत्। तेन च सोमेन इन्द्रादीन् देवानुद्दिश्यानुष्ठेयतया लक्षाधिका यागा वेदेषु निरूपिता विहिताश्च। तेषु जीवता पुरुषेणाधिकारिणा केचित् फलार्थमनुष्ठेयाः केचिद् अवश्यकर्तव्या अननुष्ठानजन्यदोषाप्राप्तये। सेदानीं यज्ञानुष्ठानपरिपाटी भारतदेशे विलुप्तप्रायैव। दक्षिणापथे क्वचित् कोणे कदाचिदत्यन्तविरलतया प्रचलति। तत्रापि न सोमलतया यागोऽनुष्ठीयते, तस्या अप्राप्यतयैव। तत्स्थाने पूतीकाख्यं लताविशेषं सोमस्य मन्दसदृशं गृहीत्वा तेनैव यागमनुतिष्ठन्ति याज्ञिकाः।

सोऽयं लताविशेषस्सोमो न केवलं यागौपयिकं द्रव्यम्। किन्तु दिव्यौषधिरपि। स सुतरां पवित्रतमः न तस्य मदजनकता कदापि यथा वैदेशिकाः कथयन्ति। परं बलपुष्टिहर्षादिसम्पादकः। अनेकशतवर्षाणि जीवयति पातारम्, अरोगिणं दीर्घदृष्टिं च करोति। वेदेषु सर्वत्राऽस्योत्साहजनकता हर्षवर्द्धकतेत्येव श्रूयते। अतः श्रुतिषु सोमसम्बन्धेन श्रूयमाणा मदशब्दास्साकल्येन हर्षवाचका एव। विषयेऽत्र पाश्चात्यानां पण्डितानामुक्तिः—सोमो मदजनकः। स सुरावद् यज्ञेषु निरर्गलं पीत आसीत्—इत्यादिका सर्वथा निर्मूलैव।

किञ्च वेदेषु गायत्र्या यत् द्युलोकात् सोमाहरणमुक्तं तदेव (गरुडेन) सुपर्णेन कृतं स्वर्गादमृताहरणं प्रकारान्तरेणोक्तं महाभारते पुराणेषु च। अतोऽमृतमेव सोमः। अत एवेन्द्रादयो देवास्तं सादरं सानुरागं च प्रतीक्षन्ते यज्ञेषु स्वेभ्यो दीयमानम्। अतश्च यज्ञेष्वधिकृता जनाः पवित्रतमेन सोमेनेन्द्रादीन् देवानिष्ट्वा स्वकर्तव्यपरिपालनात् प्रच्युताः, स्वाभिलषितं यज्ञियं फलं प्राप्नुवन्तो वा, सुदीर्घकालजीविनः, अन्ते च निरतिशयं स्वर्गसुखमप्यनुभवन्तः, कृतकृत्याः सर्वथाऽऽत्मानं परिरक्षेयुरिति भगवत्याः श्रुतिमातुर्मातृसहस्रेभ्योऽपि गरीयस्या आशयः।

विवादविषयस्सोमो यथामति विवेचितः।
अनेन प्रीयतां देवस्सोमः सोमार्द्धभूषणः॥

॥ इति शम् ॥

शून्य-निरालम्बनवादयोर्भटट्पादीया दृष्टिः

[द्वितीयं व्याख्यानम्]

दार्शनिकानां मल्लयुद्धक्षेत्रमिदम्— यत्ख्यातिस्वरूपपरिशीलनं नाम। एकस्य पन्थानमपरो नानुसरति। स्वस्वसिद्धान्तव्यवस्थायै सर्वोऽपि दार्शनिकः प्रथमत एव कञ्चन पन्थानं निश्चित्य गच्छति। गच्छंश्च मध्येमार्गमन्यैः प्रक्षिप्यमाणं मार्गविरोधकं प्रस्तरखण्डादिकं दूरीकुर्वन्नग्रे यातीति दार्शनिकानां स्वभावः। तत्रैक एव यदि सर्वेषां मार्गान् अवरुरुत्सुः शिलाखण्डान् प्रक्षिपति तर्हि सर्वे तमपाकुर्वन्तोऽपि निराकरणप्रक्रियायां न सर्वे एकीभावमवाप्नुवन्ति। न हीमे यौधिष्ठिरं न्यायम्—**'अन्यैस्सह विरोधे तु वयं पञ्चोत्तरं शतम्'** इत्यवलम्बन्ते। एतेषामीदृशमनैक्यं प्रेक्ष्यैव मार्गविरोधकाअपि पृथक्पृथगेव मार्गमवरुन्धन्त्येव। नेयं रीतिर्दोषाय भवेद्दार्शनिकानाम्। ओदनस्य सूपस्य च भक्षणे समानेऽपि चुल्लिभेदेनौदनिका विप्राः पृथगेव भवन्ति। सत्यपि प्रकारभेदे तृप्तिस्तु सर्वत्र समाना। सूपयुतमोदनमुपभुज्य सर्वस्योद्गारस्तुल्य एव। तत्र मीमांसक आत्मानं भिन्नं-मन्यमानोऽपि वैदिकत्वेन सर्वानेकीकर्तुं चेष्टते। भिन्नमार्गावलम्बिनोऽपि दार्शनिकाः त्रिषु वादेषु समावेशयितुं शक्यन्ते— सर्वं शून्यमिति वाद एकेषाम्, एक एवास्ति नान्य इत्यपरेषाम्', भेदेनानैव वर्तत इत्यन्येषाम्। यदि किमप्येकमस्ति अथवा नाना सन्ति तर्हि भीतेरवसरः स्यादिति सर्वं शून्यमित्यङ्गीकारे न भीतेरवसर इति प्रथमे वक्तारः। एकस्यैव वस्तुनोऽस्तित्वे द्वितीयस्याभावान्न साध्वसस्यावसरः **'द्वितीयाद्धि भयं भवति'** इति द्वितीये वक्तारः। नानात्वे विद्यमानेऽपि न भयस्यावसरः, करचरणाद्यवयवेषु विभिन्नेषु सत्सु न तेभ्यो भीतिरुत्पद्यते। **'अतो भेदेन नानावर्तन्ता'-मिति** तृतीये वक्तारो भवन्ति। दार्शनिकेषु न चतुर्थः कश्चन प्रकारो मौलिकः परिदृश्यते। तत्रास्तिनास्त्योः कलहः भेदेनानैव वर्तत इति पक्षप्रसाधनेन स्वयमुपशमितो भवतीति तमेव मीमांसकसम्मतं पक्षं गृह्णीमः।

तत्र सर्वं निरालम्बनं शून्यं वेति वादः प्रत्यक्षमनुमानञ्चेति प्रमाणद्वयमूलकः। प्रमेयसिद्धिं प्रति प्रमाणस्यावश्यकत्वेन द्वे प्रमाणे स्वीकृत्य स्वीयं वादं स्थापयतीति तस्य प्रकारः। तत्र द्वाभ्यां प्रमाणाभ्यामतिरिक्तेन प्रमाणेन यद्यस्तित्वम् इतरस्साध-

यति तर्हि प्रथमो न स्वीकुर्यात् प्रमाणान्तरम् । कलहस्तु स्वस्थान एव तिष्ठेत् । अतः कलहोपशमनाय किञ्चिद् दूरं प्रत्यक्षमनुमानञ्चेति प्रमाणद्वयमेव स्वीकृत्य गन्तव्यं भवति । तमिमध्वानं जैमिनिः—'**तस्य निमित्त-परीष्टिः**' '**सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षम्**' '**औत्पत्तिकस्तु शब्दास्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणास्यानपेक्षत्वात्**' इति त्रीणि सूत्राणि रचयन्नुद्धारयति । भाष्यकारश्च श्रीशबरस्वामी स्वमतेन त्रीणि सूत्राणि प्रथमं व्याख्याय तत्रापरितुष्टो वृत्तिकारोपवर्षमतेन सूत्रत्रयव्याख्यानं प्रदर्शयामास । अपरितोषस्येदमस्ति कारणं-यन्निमित्तसूत्रेण सूत्रकारः प्रतिज्ञातधर्मस्य निमित्तपरीक्षां प्रतिज्ञाय धर्मे प्रत्यक्ष प्रमाणं भवितुमर्हति न वेति परीक्षायै प्रत्यक्षस्वरूपं चतुर्थसूत्रेण प्रदर्शयति । तच्च प्रत्यक्ष लौकिकं विद्यमानोपलम्भकम्, धर्मस्त्वलौकिकः तत्र प्रत्यक्षस्य नावसर इति धर्मे प्रत्यक्ष न प्रमाणमिति बोधयन्ननन्तरम् प्रत्यक्षपूर्वकत्वादनुमानादीनामपि धर्मे नावसर इति व्यञ्जयद् अनुपलब्धिप्रमाणगम्यत्वे धर्मस्य प्राप्ते तन्निरासाय '**औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः**' इत्यादि सूत्रं प्रवर्तयामासेति भाष्यकारो व्याख्याय मनस्तृप्तिं नावापत् । शब्यगम्यत्वे धर्मस्य साध्यमाने यो नाम शब्दं प्रमाणं न स्वीकुरुते तन्मते धर्मत्वरूपावगमकं प्रमाणं किं स्यादिति प्रश्नस्तथैव स्यात् । अतो वृत्तिकाराभिमतां सूत्रत्रयीव्याख्यां प्रदर्श्य पूर्वोत्थं प्रश्नं समाधत्ते—'वृत्तिकारस्तु' इत्यादिना । एतन्मते निमित्तसूत्रं नञ्पदमध्याहृत्य व्याख्येयं भवति—प्रतिज्ञातस्य धर्मस्य निमित्तपरीक्षा न कर्तव्या प्रसिद्धत्वात् प्रत्यक्षादीनाम् इति । प्रत्यक्षादीनि हि प्रसिद्धप्रामाण्यविशिष्टानि, अतस्तेषां परीक्षणं कुतः ? एवञ्च निमित्तसूत्रेण पूर्वं प्रतिज्ञातस्य चोदनाप्रामाण्यस्य हेतुभूतं प्रामाण्यस्य स्वतस्त्वं स्फोरितं भवति । यदि प्रसिद्धप्रामाण्यविशिष्टान्यपि परीक्ष्यन्ते—प्रत्यक्ष प्रमाणं न वा ? अनुमानं प्रमाणं न वा ? शब्दः प्रमाणं न वेति, तर्हि कारणान्तरेण तत्परीक्षितव्यम् । एवं सति कारणान्तरं प्रमाणं न वेति परीक्षणमावश्यकं स्यात्, तेनानवस्थापातः । अतः प्रामाण्यस्य स्वतस्त्वमभ्युपेत्य प्रत्यक्षादिवत् शब्दस्यापि प्रामाण्यं प्रसिद्धमिति तदपि न परीक्षितव्यमिति सिद्धे शङ्का समुदेति-कथं न प्रत्यक्षं परीक्षितव्यम् ? शुक्तिरजतादौ प्रत्यक्षस्य व्यभिचारो दृश्यत इति । अस्याः शङ्काया निराकरणपरं प्रत्यक्षसूत्रं 'सत्' 'तत्'—पदव्यत्यासेन वृत्तिकारो व्याख्याति— यद्विषयकं ज्ञानं तेन विषयेण पुरुषस्येन्द्रियाणां सम्प्रयोगे जाते यद्विज्ञानं तत् सत्प्रत्यक्षमिति । शुक्तिकारजतस्थले विज्ञानं रजतविषयकम्, तेनेन्द्रियाणां न सम्प्रयोगः किन्त्वन्येन, अतो नात्र प्रत्यक्षस्य व्यभिचारः । अत्रैव ख्यातिवादस्योदयः— इन्द्रियन्त्वन्यसंयुक्तम्, ख्यानन्तु रजतस्येति कथं सङ्गच्छताम् ? इति प्रश्ने समुत्पन्ने इन्द्रियदौर्बल्येन वा बाधकप्रत्ययेन वा अन्यथा विद्यमानमन्यथा ख्यायत इति पुरो विद्यमानं विपरीतेन वा ख्यायत इति वक्तव्यं भवति । एवञ्च यस्य च दुष्टं करणं यत्र च मिथ्येति प्रत्ययः स एवासमीचीनः प्रत्यय इति सिध्यति ।

एवं ख्यातेर्भ्रमस्य स्वरूपे स्थिते निरालम्बनवादो भाष्यकारेणोत्थापितः— यत्र कारणदोषज्ञानम् उत्तरकाले बाधकज्ञानं तत्रैव मिथ्यात्वं कुतः ? सर्वेषामेव ज्ञानानां मिथ्यात्वे का हानिः ? ज्ञानसामान्यमेव निरालम्बनं भवतु । बाह्यमर्थं कञ्चन स्वीकृत्य करणदोषेण वा बाधकज्ञानेन वा सोऽन्यथा वा विपरीतेन वा ख्यायत इति सरणिः कुत इति । यदा क्वचित् स्वप्नादौ ज्ञानानां निरालम्बनत्वमनुभवामस्तदा सर्वजाग्रज्ज्ञानानां तथात्वे का हानिः ? नात्र दृष्टान्तासिद्धिः नाप्यंशतस्सिद्धसाधनं वा । एवञ्च सर्वोऽपि प्रत्ययः, निरालम्बनः प्रत्ययत्वात् स्वप्नप्रत्ययवदित्यनुमानं प्रमाणमुपन्यस्तं भवति । ज्ञानानां निरालम्बनत्वञ्च बाह्यार्थाभावप्रयुक्तम् । स्वप्ने ज्ञानानां निरालम्बनत्वस्वभावोऽनुभूयते, तत्र बाह्यार्थासद्भावेऽपि प्रत्ययो दृश्यते, तथैव जाग्रत्प्रत्ययेऽपि भवितव्यम् । एवं पक्षसाध्यहेतूदाहरणानि निर्दिश्य भाष्यकारः **'स्तम्भ इति जाग्रतो बुद्धिस्सुपरिनिश्चिता कथं विपर्यसिष्यतीति'** इत्यादिना सिद्धान्तपक्षम् उपक्षिप्तवान् ।

अयमत्र पूर्वोत्तरपक्षयोस्सङ्ग्रहः— स्वप्नप्रत्ययेषु यथावगम्यमानबाह्यार्थाभावेन कालान्तरदेशान्तरवर्तिनां संन्निहितकालदेशतया प्रतिभासासम्भवात् कदाचिदप्यसम्भवतां स्वशिरश्छेदादीनां स्वप्ने प्रतिभासाच्च स्वात्मांशा एव बहिर्वद् गृह्यन्त इत्यवश्यं वक्तव्यम् । अतश्च तत्सामान्याज्जाग्रज्ज्ञानानामपि स्वांशमात्रपर्यवसायित्वान्मिथ्यात्वमेव स्वीकर्तव्यमिति पूर्वपक्षिण आशयः । सिद्धान्तिनस्तु— प्रत्यक्षोपजीव्यं तावदनुमानमिति पक्षद्वयेऽपि सिद्धम् । जाग्रदवस्थायां 'अयं घटः, इदं नीलम्' इति जायमानानां प्रत्ययानां कालान्तरे बाधज्ञानं नोदेति, स्वाप्नप्रत्ययेषु तु प्रबुद्धस्य तदुपजायते । तेन जाग्रज्ज्ञानानां सुपरिनिश्चितत्वं स्वाप्नज्ञानानाञ्च तदभाव इति कथमनुमानेन प्रत्यक्षबाध इति ।

अत्र वार्तिककाराः पक्षसाध्यहेतूदाहरणानि प्रत्येकं परिशोध्य विवेचितवन्तः । वार्तिककारविवेचनसरणेः प्रदर्शनात्पूर्वं किञ्चिदहं विवक्षामि—नास्तिको वा भवत्वास्तिको वा दार्शनिकः सर्वोऽपि स्वस्वदर्शनानुगुण्याय कांश्चन पदार्थान् निश्चित्य तदुपपादनाय कञ्चन मार्गं परिकल्प्य गच्छति । गमनावसरे यदि किञ्चिदवरोधकं पश्येत् तदपसार्याग्रे गच्छतीति पूर्वमवोचम् । तत्र तत्तद्दर्शनस्य मूलप्रवर्तकस्सूत्रकारः स्वीयेषु सूत्रेषु यान् विषयान् यथोपन्यभान्त्सीत् तथा तान् तदुत्तरवर्तिन उपबृंहयितुं यतन्त इति दार्शनिकानां स्वभावः । सूत्रकारात् परवर्तिनां समये खण्डनाय मण्डनाय वा विषयबाहुल्यं कालक्रमेण समापतेदेव, सूत्रासंस्पृष्टा अपि कदाचिद्विषया आपतेयुः, येषां पर्यालोचनं परवर्तिभिः स्वस्वदर्शनसिद्धान्तानुगुणमक्रियत । एवमपि सम्भाव्यतेयन्मूलसूत्रकाराभिमतमविज्ञायान्यथैव स्वदर्शनतत्त्वं विस्तारयितुं परवर्तिनां प्रवृत्तिरजा-

यत इति । ईदृशं तद्दर्शनसाहित्यं पश्यन्तोऽन्ये दार्शनिकाः तत्खण्डनाय लेखनीं व्यापारयामासुरिति । अस्तु यथा तथा वा । मीमांसासूत्राणि वयं पश्यामः— किं जैमिनिमहर्षेस्समये प्रत्ययानां निरालम्बनवाद उत्थितो वा न वा ? उत्थितश्चेत्तदुत्थापकः कः ? नोत्थितश्चेत्तत्परवर्तिभिस्तत्खण्डनाय कथं प्रवृत्तम् ? तैः क्रियमाणं खण्डनं सौत्रं वा स्वबुद्धिप्रभवं वा ? यदि सौत्रम्, तर्हि सूत्रेणाभिधीयमानं वा तत् उताभिव्यज्यमानं वा ? यदि वा स्वबुद्धिप्रभवं तर्हि मूलसूत्रकारानभिमतखण्डनप्रकारः कथं प्रामाण्यमर्हति ? इतीदं सर्वं परिशीलनीयम् । मम तु प्रतिभातियत्, सर्वञ्चेदं मीमांसाशास्त्रं बाह्यार्थसद्भावप्रतिपादनाय प्रवृत्तमिति । यद्यपि धर्मतत्त्वप्रतिपिपादयिषया धर्मतत्त्वावबोधकवेदवाक्यार्थनिर्णयाय केवलं प्रवृत्तमिदं शास्त्रम्, न प्रत्यक्षादिप्रमाणानां द्रव्यादिप्रमेयाणाञ्च तत्त्वनिरूपणाय, तथापि प्रमाणप्रमेयनिरूपणस्य शास्त्रान्तरविषयत्वेऽपि निरूप्यमाणस्वविषयस्य धर्मस्य प्रतिपादनाय लौकिकप्रमाणानां प्रमेयाणाञ्चावश्यकतायां सत्यां तत्रापि प्रवृत्तिरेष्टव्या सूत्रकारस्य । वैदिकोऽपि जैमिनिर्नालौकिकः । लौकिकं पन्थानमनुसरन्नेव गच्छतीति तदीयसूत्राध्ययनेन विस्पष्टं भवेत् । प्रथमसूत्रेण जिज्ञासितस्य धर्मस्य **'चोदनालक्षणोऽर्थो धर्मः'** इति द्वितीयसूत्रेण लक्षणमभिधाय न तावता शास्त्ररचनात उपरमं जैमिनेः पश्यामः । प्रतिज्ञातस्य लक्षितस्य च धर्मस्यालौकिकत्वेन लौकिकप्रमाणाविषयत्वात्परीक्षणस्य नावसरः, तथापि परीक्षते, अपरीक्ष्यैव निर्णीयमाने धर्मे श्रद्धामात्रविजृम्भितत्वं स्यादिति । अथवा वृत्तिकारमतेन प्रसिद्धत्वाल्लौकिकप्रमाणानां परीक्षाऽपि न कर्तव्येति स्वीकारे औत्पत्तिकसूत्रप्रणयने जैमिनेरन्तर्निहितः कश्चनाशय उन्नेतव्यो भवति— यज्जैमिनेः काले केनापि रूपेण निरालम्बनवादः प्रचलन्नासीत् यस्य निराकरणमनेन सूत्रेण क्रियते । कथमन्यथा शब्दतदर्थयोस्सम्बन्धं नित्यं प्रतिपादयेत् ? पुनश्च कथं वा शब्दनित्यत्वाधिकरणे **'कर्मैके तत्र दर्शनात्'** इत्यादिना पूर्वोक्तसम्बन्धासम्बन्धिनश्शब्दस्य नित्यत्वप्रतिपादने प्रवृत्तिः ? अतो वृत्तिकारभाष्यकार-प्रतिपादितदिशा निरालम्बनवादस्सूत्रारूढ इति । जैमिनेः जैमिनिसूत्रेष्विदमेकं वैचित्र्यं—यत्क्वचित्क्वचित् पूर्वपक्षमनुल्लिख्यैव सिद्धान्तमात्रं निर्दिश्यत इति । तत्रोत्सूत्रं पूर्वपक्ष इति भाष्यकारः कथयति । तथा चौत्पत्तिकसूत्रे यावन्तो विषयाश्चर्चिता भाष्यकारेण, ते सर्वेऽपि सूत्रारूढा एवेति स्वीकारे न काचिद्धानिः । किञ्च जैमिनिः प्रायस्स्वसूत्रेषु 'अपि वा' 'तु' 'वा' इति प्रयुङ्क्ते । तत्रेमे प्रायः पक्षव्यावर्तकत्वेन नीयन्ते भाष्यकारेण ।

औत्पत्तिकसूत्रगतोऽपि तुशब्दश्शङ्कानिवर्तकत्वेन नेतुं शक्यते । भाष्यकारमतानुसारेण प्रत्यक्षादीनां धर्मेऽकारणत्वे निश्चिते पारिशेष्यन्यायेनानुपलब्धिगम्यत्वमेव धर्मस्येत्यायाति, तन्निरासाय तुशब्दः । वृत्तिकारमतानुसारेण प्रसिद्धत्वात्प्रत्यक्षादीनामपरीक्ष्यत्वे सिद्धे व्यभिचारात्परीक्षितव्यानि प्रत्यक्षादीनीति शङ्कायां तन्निराकरणाय

प्रत्यक्षसूत्रे तत्सत्पदयोर्व्यत्यासस्वीकृतः । तत्रैव निरालम्बनवादशून्यवादादीनां समुत्थितिः । तत्समाधायानुमानाद्यनुपलब्ध्यन्तानां प्रमाणानां प्रसिद्धत्वादपरीक्ष्यत्वं प्रतिपाद्य चित्राक्षेपपूर्वकं चोदनालक्षणत्वं धर्मस्याक्षिप्तम् । तस्यास्याक्षेपस्य निवर्तकस्तु-शब्दः । धर्मस्य चोदनालक्षणत्वमाक्षेप्तुं त एव प्रभवन्ति ये वेदबाह्याः । निरालम्बन-वादप्रभृतिशब्दस्याप्रामाण्यसाधनान्तो यो भागो भाष्यस्य स सर्वोऽपि वेदबाह्यैः कृतानां शङ्कानामवद्योतकः । देवासुरसङ्ग्राम इव अस्तिनास्त्योर्विवादः पुरातनः । जैमिनिर्वाद-कथासु श्रुत्वैवेमानाक्षेपान् निराकर्तुं महदिदं शास्त्रं प्रणिनाय । तत्र समग्रस्य शास्त्रस्य बाह्यार्थसद्भावप्रतिपादनतात्पर्ये परिकल्प्यमाने न कश्चन दोषस्स्यात् । सर्वेऽप्यमी वादा बाह्यार्थसद्भावमाश्रित्यैव प्रवृत्ताः । निरालम्बनवादः, शून्यवादः, सम्बन्धाक्षेप-वादः, चित्राक्षेपवाद इत्यादयः तदा समुत्पन्नाः प्रतिभान्ति यदा विश्वस्मिन् जगति वैदिकानामेकच्छत्राधिपत्यमासीत् । तदसहमाना वेदवादविरुद्धान् पक्षानुपस्थापयाम्बभूवुः । तन्निरसनाय महान् प्रयासो महर्षिभिरवलम्बितः । तत्र जैमिनिः विरुद्धानिमान् पक्षानपाकर्तुं बाह्यार्थसद्भावव्यवस्थापनं मुख्यं मन्वानः शब्दतदर्थसम्बन्धानां नित्यत्वं प्रथमं पञ्चमसूत्रेण निर्दिदेश । इदमवलम्ब्यैव साक्षात्परम्परया सर्वोऽपि प्रपञ्चश्शबर-स्वामिना कुमारिलभट्टेन च व्यधायि ।

तत्र भाष्यकारेण प्रत्ययानां निरालम्बत्वे प्रतिज्ञा-हेतूदाहरणोपनयनिगमाः प्रतिपादिताः **'सर्व एव निरालम्बनः प्रत्ययः'** इत्यादिना । अनुमानमिदं परीक्षितुमारभमाणो वार्तिककारः प्रथमं बौद्धैः प्रयुज्यमानं संवृतिशब्दं परिगृहीतवान् । ते हि संवृतिसत्यं पारमार्थिकं सत्यम् इति सत्यद्वयं समाश्रित्य प्रमाणप्रमेयादिव्यवहारः संवृतिसत्येन सिध्यति, परमार्थसत्येन च प्रत्ययानां निरालम्बनत्वसिद्धिरिति वदन्ति । तैरपि सर्वोऽपि लौकिकव्यवहार उपपादनीयः । स च व्यवहारस्संवृतिसत्यत्वप्रयुक्तः, परमार्थतस्तु निरालम्बन एव प्रत्यय इति । इयञ्च सरणिरद्वैतिनामप्यस्ति— ते हि त्रिविधं सत्यं मन्यन्ते व्यावहारिकसत्यम्, प्रातिभासिकसत्यम्, पारमार्थिकं सत्यञ्चेति । इमामेव सरणिमनुकर्तुं बौद्धचेष्टितमिति भाति । किन्तु शब्दमात्रस्यानुकरणं न त्वर्थतः । व्यावहारिकावस्थायां वा प्रातिभासिकावस्थायां वा ज्ञानानां पदार्थालम्बनत्वमद्वैतिभिर्न निषिध्यते, बाह्यपदार्था ब्रह्मविवर्तरूपेण तिष्ठन्त्येव । बौद्धप्रक्रियायान्तु संवृतिसत्यस्थले ऽर्था न सन्त्येव । दर्शनान्तरे सत्यपदविशेषणतया व्यावहारिकपदं प्रयुञ्जते, इदञ्च विशेषणं युक्तम् । संवृतिसत्यस्थले तु सत्यस्य विशेषणं संवृतिर्भवति । संवृतिर्नाम मिथ्या । सत्यस्य मिथ्यात्वं कीदृशं भवेत् ? विरुद्धाविमौ सत्यं मिथ्येति, कथं विशेष्य-विशेषणभावं प्राप्तुं शक्नुतः । संवृतिसत्यमित्यस्य किं संवृतिरूपं सत्यमित्यर्थो वा ? उत संवृतेस्सत्यमित्यर्थो वा ? नाद्यः; सत्यस्य मिथ्यारूपत्वं न सङ्गतम् । न द्वितीयः, द्वैतसिद्ध्यापत्तेः । अतः प्रतारणपरोऽयं संवृतिशब्दः ।

इदानीमनुमानं पश्यामः— सर्व एव प्रत्ययो निरालम्बनः, प्रत्ययत्वात्, स्वाप्नप्रत्ययवदिति । अत्र पक्षः— सर्वः प्रत्ययः । अनेनानुमानेन यज्ज्ञानं जायते तदपि पक्षान्तर्गतं भवति । सर्वे प्रत्यया निरालम्बनत्वेन विशिष्टास्साध्यन्ते । अत्र यो विशेष्यविशेषणभावग्रहः सोऽपि निरालम्बनः । अर्थात्—विशेष्यविशेषणभावग्रहस्य मिथ्यात्वे सिद्धेऽनुमानेन जायमानग्रहस्यापि मिथ्यात्वं सिद्धं भवेत् । तदा विशेष्यविशेषणयोर्विवेको न सिध्येत् इति अप्रसिद्ध-विशेषणविशेष्यः पक्षो भवेत् । प्रत्ययस्य निरालम्बनत्वं वदतः श्रोतुश्च यज्ज्ञानं तदपि प्रत्ययत्वान्निरालम्बनमिति पक्षस्य सिद्धिः कथम्, यदीदं सालम्बनं तर्ह्यनुमानमनैकान्तिकं भवेत् । इदं विशेषणम् इदं विशेष्यमिति विकल्पो वस्तुनि भवति नावस्तुनि । निरालम्बो नाम न किञ्चिद् वस्त्वस्माकम्, अतः कथममी विकल्पा इति कथनेनापि न निस्तारः, यतो ह्यवस्तुनः क्वापि न बुद्धिविषयत्वादर्शनेन न त्वया बोधयितुं शक्यते, नाप्यस्माभिश्शक्यते बोद्धुम् । असतः कल्पनापि न प्रसिध्यति यदि कल्पयित्वा सत्त्वमनुमानव्यवहारः क्रियत इत्युच्यते । सत्त्वस्य कल्पना ज्ञानोत्पत्तये भवता स्वीकर्त्तव्या, तथा सति तस्या वस्तुत्वमेव स्याद् नावस्तुत्वम् । कामं मीमांसकैर्मेधाभावेन वृष्ट्यभावस्साध्येत, किन्तु तेषां भावातिरेकिणा रूपेणाभावः प्रख्यायते, न ह्यभावोऽवस्तुरूपः । भवन्मते तु तस्यावस्तुत्वमेव । अतः कल्पनाप्यनुपपन्ना । किञ्च योऽयं प्रत्ययशब्दो धर्मिणं पक्षं निर्देष्टुं प्रयुज्यते स किं भावे कर्तरि करणे वा कर्मणि वा प्रयुज्यते ? प्रतीयत इति प्रत्ययो वा ? प्रत्याय्यत इति प्रत्ययो वा ? न हि प्रतीतिरस्ति प्रत्येतव्यं नास्तीति भवितुमर्हति, अकर्मकप्रत्ययासम्भवात् । यदि ज्ञानमेवार्थप्रकाशे तज्जन्मनि वा कर्तृत्वेनोपचर्यते करणत्वेन वेति वः पक्षः, तथापि विना कर्मकारकेण तदनुपपत्तिस्तदवस्थैव प्रत्यय इत्युक्तमात्रेणैव प्रत्येतव्याभावः प्रतिषिद्ध इति लौकिकी सरणिः । मम मातेत्युक्ते तस्या वन्ध्यात्वं प्रतिषिध्यत इति यथा । अतः प्रत्ययं पक्षीकृत्य न निरालम्बनत्वं साधयितुं शक्यते । ज्ञानमात्रं निरालम्बनमिति प्रतीत्य भवता **'प्रत्यया निरालम्बनाः'** इति वक्तव्यम् । तथा सति धर्मधर्मिवचनाविमौ शब्दावित्यायाति । यद्यत्र किमप्यभिधेयं नास्ति तर्हि पक्षः कथं प्रसिध्येत् ? न खलु प्रत्ययशब्दोऽविभक्तावयवे रूढ इति साम्प्रतम्, एवमपि तस्य ग्राहकत्वं तावत्प्रसिद्धमेव । रूढ इति वदतो भवतो वर्णानुपूर्व्येव खलु विवक्षिता । तस्या ग्राहकत्वञ्चेत् स्वयं स्वस्य ग्राहकमित्यायातम् । तथाप्यप्रसिद्धविशेष्यः पक्षो भवेत् । अतः कथमपि न पक्षप्रसिद्धः ।

एवं निरालम्बनत्वं साध्यमप्यनुपपन्नम् । 'प्रत्यया निरालम्बनाः' इत्यत्र निरालम्बनत्वं धर्मः प्रत्ययानाम्, प्रत्ययाश्च तद्विशिष्टा धर्मिण इति सम्पद्यते । धर्मधर्मिभावेऽवगते कथं प्रत्ययानां निरालम्बनत्वं सिध्येत् ? निरालम्बना इत्यत्र बहुव्रीहिः — निर्गतमालम्बनं येभ्यो येषां वेति । पूर्वमासीदालम्बनं यच्चेदानीं तेभ्यो निर्गतम् इति वा, यच्चालम्बनं भवद्भिरुच्यते तदिदानीं तेषां निर्गतमिति वार्थस्सम्पन्नः । पूर्वमासीत्

कथम् ? इदानीं निर्गत इति च कथमित्युपपादनीयम् ? न वयमागतं निर्गतमिति ब्रूमः, किन्तु 'प्रत्ययान् सर्वथालम्बनशून्यान् वदाम' इति चेत् तर्ह्यालम्बनशून्यत्वं प्रत्ययानां धर्म इत्युक्तं भवति । एवं सति निरालम्बनत्वं प्रत्ययानां कथं साधितं स्यात्, आलम्बन-शून्यत्वस्यैव तेषामालम्बत्वात् । आलम्बनशून्यत्वं प्रत्ययानां स्वभावो न तु धर्म इत्युच्यमानेऽप्रसिद्धविशेषणः पक्षस्स्यात् । न हि सर्वथा निरालम्बनत्वं नाम जगति किञ्चिदस्ति ।

यदाकारा बुद्धिस्सा निरालम्बनेति ब्रूमः । सर्वत्र विज्ञानाकारैव बुद्धिरुदेति, न बाह्यर्थालम्बनः न हि बाह्योऽर्थः कञ्चन विज्ञानादतिरिक्तः प्रसिध्यति । इदमेवास्माकं निरालम्बनत्वमिति चेदत्र वदामः, विज्ञानाकारा बुद्धिरिति वदद्भिर्भवद्भिः विज्ञानस्याकारः कश्चन स्वीकृतः । कथं बुद्धेर्निरालम्बनता ? स्ववाग्विरोधः खलु भवेत् । बुद्धिरिति वदन्तो भवन्तः किं बाह्यमित्यनेन रूपेण बुद्धिर्नालम्बते इति साधयन्ति ? उत वस्तुतो वा बाह्यं नालम्बत इति ? नाद्यः पक्षस्समुचितः, सिद्धसाधनत्वात् । घटोऽयम् नीलमिदम् इत्यादयो बुद्धयो बाह्यतया घटादिकं नालम्बन्ते, किन्तु घटाद्याकारतयैव, आसु बुद्धिषु तत्तद्रूपसंवेदनस्य दृश्यमानत्वाद् घटाद्यनालम्बनत्वं कथं साधयितुमुचितम् ? द्विचन्द्रादिज्ञान इदमनालम्बनत्वं तुल्यमिव प्रतिभाति, किन्तु यदेव विज्ञानमिन्द्रियाप्राप्तमर्थं प्रकाशयति तदनालम्बनमिति स्वीक्रियते, न पुनर्द्विचन्द्रादि प्रतिभासोऽपह्नूयते यद्ययं प्रतिभासो नापह्नूयते तर्हि सदसद्विवेकः कीदृशो मीमांसकानामिति प्रश्नस्येदमुत्तरम्—'इदं सत् इदमसदिति विभाग इन्द्रियार्थसंयोगसदसद्भावप्रयुक्तः, यदिन्द्रियसम्प्रयुक्तमर्थं प्रकाशयति तत्सत्, विपरीतञ्चान्यत् । यथावभासमर्थस्य सत्त्वं न ब्रूमः, बाधकदर्शनात् । अतो देशान्तरस्थमिन्द्रियाप्राप्तमर्थं यद् गृह्णाति तदसद् ग्राह्यम् । तादृशविज्ञानस्यार्थो नास्तीति व्यवहारः । तथा च नेदं रजतमित्यस्य नायमर्थः यद्रजतं नास्तीति, किन्तु—इह नास्तीति यत्रेन्द्रियेण न प्राप्यते । यदेव यत्रेन्द्रियेण प्राप्यते, तदुच्यते—इरमस्तीति विभागोऽयं निरालम्बनवादिनो न भवति, तेषामिन्द्रियादीनामभावात् ।

निरालम्बनमित्यस्य ग्राहकाद् ग्राह्यमभिन्नमित्यर्थः । स एव साध्यत इति कथं साध्यप्रसिद्धिरिति चेत्—तर्हि विज्ञानस्य यच्छक्तिद्वयं स्वीकृतं भवद्भिः—ग्राह्यशक्तिः ग्राहकशक्तिश्चेति तदपलपितं स्याद् यदि ग्राहकाद् ग्राह्यमभिन्नमित्युच्येत । बौद्धैराश्रयातिरेकिणी न शक्तिरिष्यते तथापि शक्तिभेदद्वारेण द्व्यात्मकत्वस्य तैः स्वीकृतत्वान्न दोषः । 'प्रत्ययो निरालम्बनः' इत्युक्ते या बुद्धिर्निरालम्बनत्वविषयिण्युत्पद्यते, तस्या बाह्यग्राह्यविवर्जितत्वं सिद्धमेव, न तत्साध्यकोटिप्रवेशार्हम् अनर्थकत्वात् । किञ्च—अयं चैत्रः, अयं स्तम्भ इत्यादयः प्रत्ययाः बाह्यं स्वस्वविषयमवस्थापयन्ति, स निराकर्तव्यो निरालम्बनप्रत्ययेन । निरालम्बनप्रत्ययश्चार्थशून्य आत्मांशपर्यवसायी । प्रत्यययोरनयो-

विचिन्त्यमाने विरोध एव नास्ति । समाने विषये समुपनिपातिनोर्विरुद्धप्रत्यययोरेव बाध्यबाधकभाव इष्यते । यथा— इदं रजतम् नेदं रजतमिति । चैत्रादिप्रत्ययानां बाह्यो विषयो: निरालम्बनप्रत्ययानाश्च स्वात्मांशो विषयः । समानविषयत्वञ्चोभयोर्न दृश्यते । अतोऽत्र किं केन बाध्यत इति वक्तुं शक्यम् । अतो निरालम्बनत्वं साध्यं न आत्मन स्स्वरूपं लभते ।

किञ्च बुद्धेन स्वशिष्या उपदिष्टाः—'अयं धर्मः अयमधर्म' इति । अत्रोपदेशकः कश्चन, उपदेश्याश्च बहवः, उपदेशाश्च चैत्यवन्दनादयो धर्माः तद्भिन्नाश्चाधर्माः, इमे भेदाः परमार्थतो यावन्न सिध्यन्ति, तावदुपदेश एव न घटेत । सर्वमिदं बुद्धानां बुद्धानुष्ठानचेष्टादर्शनेनानुमतम् । चैत्रादिप्रत्यया निरालम्बनाः प्रत्ययत्वादिति सम्प्रति तद्विपरीतवचने सति किं बुद्धाभिप्रायविरोधो न भवति ? उपदेश्योपदेशकयोर्भेदः धर्माधर्मत्वेनोपदेशयोर्भेदः, सर्वमिदं बुद्धैरनुमन्यते, अपि च निरालम्बनाः प्रत्यया इति साध्यत इति चित्रमेतत् । स्वयूथ्यैरसौत्रान्तिकैश्च बाह्यार्थसद्भाव उल्लिखितः, तदागमबाधनं च स्यात् यदि प्रत्ययानां निरालम्बनत्वं साध्यते ।

एवं सहस्रं दोषा उद्भाव्यन्ताम् । अत्र बौद्धा एवं कथयन्तः प्रत्यवतिष्ठन्ते यत्, सर्वोऽपि धर्मधर्मिभेदव्यवहारः— अयं पक्षः, इदं साध्यम्, अयं हेतुरित्यादिः बुद्धिभेदप्रयुक्त इति तावत्सर्वैरभ्युपगन्तव्यम् । अनादिवासनोपप्लाविता हि पक्षसाध्यहेत्वादिविकल्पा भवन्ति । अतो वासनाभेदाद् बुद्धिभेदः, तद्भेदाच्च पक्षादिभेदः । बुद्ध्यारूढेनैवानुमानानुमेयव्यवहारस्सेत्स्यति । 'नित्यश्शब्दः' 'अनित्यश्शब्दः' इति भिन्नयोर्धर्मिणोः हेतुसाध्ययोर्वावगतिः बुद्धिभेदेन विना न हि भवितुमर्हति । अतो ज्ञानभेदनिबन्धनएवात्र भिन्नत्व-व्यवहारः । ज्ञानमेव सर्वत्र भेदनिबन्धनम् । सुदूरमपि गत्वा युक्तिभिरनुसंहितो भेदो ज्ञान एव पर्यवस्यति । देशतः कालतश्च भेदं ब्रुवाणा ज्ञानभेदमेवावलम्बन्ते । जात्यदिभेदेन बह्निधूमादिभेदसाधनमपि शब्दप्रयुक्तमेव । शब्दभेदेऽर्थविकल्पविलसिता एवाग्नित्वधूमत्वादयः । शब्दभेदोऽपि विज्ञानभेदाद्विना न सम्भवति एवं च सर्वोऽप्यनुमानानुमेयव्यवहारो बुद्ध्यारूढेन धर्मधर्मिन्यायेन बहिः सदसत्त्वमपेक्षत इति यावन्ति दूषणानि तान्ति विकल्पविलसितान्येवेति ।

तदत्र विचारणीयम्— बुद्धिभेदनिबन्धनत्वं शब्दभेदनिबन्धनत्वं वाऽस्तु हेत्वादिभेदानाम्, बुद्धिभेदं प्रति शब्दभेदं प्रति किञ्चिन्निबन्धनं वक्तव्यम् । न ह्यकस्माद् बुद्धिभेदो वा शब्दभेदो वा जायेत, अकारणिका कार्योत्पत्तिर्न खलु सम्भवति । शून्ये च जगति न तयोः कारणमप्युत्प्रेक्षितुं शक्यते । शब्दाभानेन भवतां शब्दभेदः कथं सिध्येत् ? भवदुक्ते प्रयोगे परोक्तानि दूषणान्यवगत्यैव तेषां दूषणानां विकल्पविलसितत्वं भवतोच्यते । अविद्यमान एव बुद्धिमात्राकल्पितस्साध्यादिभेदोऽनुमातव्य-

वहारयेति यदि कल्प्यते, तर्हि दूषणव्यवहारोऽपि तादृश एव स्यात् । किन्तु दूषणबुद्धिः हेत्वादिन्यूनतोक्त्यैव खलु भवतां जायते । तथैव भवदुक्तप्रयोगस्त्वस्माकं न सिद्धः इत्यावयोर्नाविशेषता । बाह्यार्थव्यवहारिणो वयं भवन्तश्च ज्ञानैकशरणाः । असति बाह्येऽर्थे वयं कथं बुध्यामहे ? अर्थावबोधाय निमित्तमुक्तमस्माभिः वासनाभेद इति चेत् न, वासनाभेदः किं निमित्त ज्ञानभेदनिमित्त इति वक्तव्यम् । तथा सत्यन्योन्याश्रयः । बीजाङ्कुर न्यायेन नान्योन्याश्रयः परिहर्तुं शक्यते— बीजाङ्कुरयोः प्रसिद्धिरस्ति, तत्र दोषपरिहारस्सुगमः । किन्तु वासनास्ति सा च भिन्ना इत्यत्र न किञ्चिदस्ति प्रमाणं भवताम् । वासना हि नाम सा भवति— पूर्वानुभवप्रभावितस्मरणहेतुः संस्कारः । सा च विद्यमाना विविधं ग्राहकं ज्ञानमेवोपकल्पयेत्, ग्राह्यभेदस्तु किं कृतः ? नायं वासनानिबन्धनो भवितुमर्हति । स्मृतिहेतुः खलु वासना । बहिश्च पदार्था अत्यन्तमसन्तः । न ते कदापि गृहीतपूर्वाः । तान् वासना कथं स्मारयेत् ? किञ्च भवतां ज्ञानानि क्षणिकानि परस्परमन्वयेन विना नश्वराणि । अतो वास्यवासकभावस्तेषामनुपपन्नः । व्यापारनिबन्धनः खलु वास्यवासकभावः । क्षणिकानाञ्च स न भवति । जन्मनैव व्यापारेण वासनायाः कारकत्वं न वक्तुं शक्यम्, बुद्धिस्तु जायमाना ज्ञानान्तरं वासयन्ती न दृश्यत इति जन्मना वासनायां कारणत्वं कथं भवेत् ? जन्मापि च बौद्धैर्नाङ्गीक्रियते । यद्धि स्वलक्षण एव निरुद्धं न केनचिद्रूपेणान्वेति न तत् तदीयं वास्यतीति सम्भवति । तथा वासकमपि यत् निरन्वयविनष्टं तत् केनात्मना परं वासयेत् ?

इयमत्र बौद्धानां प्रक्रिया— भङ्गुरमुत्तरञ्च ज्ञानम्, नावस्थितः कश्चिन्नित्यो ज्ञाता, पूर्वसादृश्यात् सारूप्याद्वा ततो भिन्नस्योत्तरस्य वासना युज्यते । वासना नाम पूर्वसारूप्यमुत्तरस्य । पूर्वभावादेव ज्ञानस्य कारकत्वम् नात्र व्यापारस्यावश्यकता । पूर्वभावातिरेकिणो व्यापारस्यानुपपत्तिः । पूर्वस्योत्तरकारणत्वमिदमेव वासकत्वं यत्पूर्वेणोत्तरं वास्यत इति । भङ्गुरवादिनामेव वासनोपपत्तिमती न स्थिरवादिनामिति ।

अत्रेयं मीमांसकानां दृष्टिः— यदि पूर्वमुत्तरस्य जनकमभविष्यत् तर्हि पूर्वं, स्वानुरूपं विरूपं वा अजनयिष्यत् । असतोऽनुत्पन्नस्य वा न खलु जनकता क्वचिदनुभूयते, एवं विनष्टस्यापि । निष्पन्नं ज्ञानं क्षणमपि नावतिष्ठते, कदा तज्जनयिष्यति ? यदा जनकत्वमेव नोपपन्नं तदानुरूपजननमिति कथमुपपद्यताम् । यस्य चान्वयो नास्ति, यश्च विनष्टः तस्यानुरूपमपरं कथं सम्भवेत् ? आनुरूप्यं नाम धर्मान्वयः । पूर्वधर्मान्वय उत्तरज्ञाने यद्यभ्युपगम्यते तर्हि तस्य निरन्वयो विनाशो वा कथं सम्पत्स्येत ? समानधर्ममादायैव सारूप्यघटना लोके प्रसिद्धा । पूर्वभावितैव कारणत्वं यदुक्तम्, तद् घटपटयोरपि पूर्वापरभावित्वे कार्यकारणभावस्स्यात् । अतः पूर्वभावितामात्रेण कारकत्वं वा कारणत्वं व्यापारमन्तरेण न सिध्येत् । अत आनुरूप्यवासनापक्षो न युक्त इति । बाह्यार्थवादिनां हि पूर्वज्ञानजनिता आत्मस्था वासनाः सदृशदर्शनाद्यपेक्ष्य लब्धोद्योगाः क्रमेण

कार्यं जनयन्ति । ज्ञानमात्रवादिनस्तु वासनानां न किञ्चित् कार्यजननेऽनुग्राहकमस्ति । विलम्बे कारणाभावात् युगपदेव सर्वाः सर्वं कार्यमारभेरन् । एकदैव विश्वज्ञानमुत्पन्नमिति क्षणान्तरे किमपि न स्यात् । अतः संवृत्तिसत्यमिति यत्कल्प्यते तद्वत् वासनापि कल्पिता न परमार्थतः काचिदस्तीत्येष्टव्यम् । नैतादृशं वस्तु कस्मैचित् कार्याय घटत इति ।

एवमसत्या युक्त्यनुपेताया युक्तिशून्यायाश्च वासनाया विकल्पनं तत्त्वदर्शिनां बौद्धानामिममाशयमवद्योतयति— यत् विषयेष्वास्थानिराकरणपुरस्सरमर्थनिराकरणे लोकाः प्रवर्तन्तामिति । किन्तु परवर्तिनो ग्रन्थकारास्तत्रैव सिद्धान्तप्रवाहं मन्यमाना भ्रान्ता इवेत्याभाति ।

एवं परैः प्रयुक्ते साधने प्रत्यक्षविरोधप्रदर्शनेन दूषणे समुद्भाविते स एव निरालम्बनवादी बहिः प्रत्यक्षमेव न प्रसरतीत्युपपाद्य पूर्वोक्तदूषणानि निराकर्तुं प्रत्यवतिष्ठते । एवमेव भाष्यकारः श्रीशबरस्वामी 'शून्यस्तु कथम् ? अर्थज्ञानयोराकारभेदं नोपलमामहे । प्रत्यक्षा च नो बुद्धिः । अतस्तद्भिन्नमर्थरूपं नाम न किञ्चिदस्तीति पश्यामः' इत्यादिना पक्षमुत्थाप्य परीक्षते । भाष्यस्यायमर्थः—बाह्यार्थग्राहिणो ज्ञानस्याश्रयणेन प्रत्यक्षादिविरोध उक्तः । बाह्यार्थ एव नास्ति, स च शून्यः इति प्रत्यक्षमेवोपलपामः, कथमयं पक्षो निराक्रियते ? ज्ञानस्य बहिरर्थे प्रवर्तितुं शक्तिरेव नास्ति । भवन्मतेन ज्ञानमात्मनि तिष्ठति, अर्थस्तु बहिः । कथमनयोस्सम्बन्ध उपपद्यते ? असम्बद्ध-प्रकाशने चातिप्रसक्तिः । ज्ञानप्रवृत्तिं प्रति विषय एव नास्तीति वदामः, एकस्यैव रूपस्योपलब्धेः । घटोऽयं नीलमिदं पटोऽयमिति यज्ज्ञानं प्रकाशते तदेकमेव । अर्थस्य ज्ञानस्य च विभागानवगमे विभागाभ्युपगमो न युक्तः । तदिदमुक्तम् 'अर्थज्ञानयोराकारभेदं नोपलभामहे' इति । ज्ञानमेव प्रत्यक्षम्, न तद्भिन्नमर्थरूपं किञ्चिदस्ति । अत एवानिदम्प्रथमताकात् कालाद्वासनोपप्लावितनिखिलघटाद्याकारप्रकाशः । नात्र केनचिद्ग्राहमवस्थाप्येत, येन तदपलापे प्रत्यक्षविरोधः प्रसज्येत । एतादृशमेव प्रत्यक्षमिति साध्यमाने विरोधस्य कुतो वाऽवसर इति । इदं तावदत्र परीक्षणीयम्— (किं किं प्रत्यक्षं बाह्यं प्रवर्तितुं शक्नोति ? अथवा स्वांशपर्यवसायी (यदिह्यप्रत्यक्षं बाह्यार्थग्राहि ततो दूषणसिध्या प्रत्यक्षस्य बाह्यार्थपरत्वम्) । (यदि वा सर्वसंविदामात्मांश एव ग्राह्यः ततो दूषणबाधनात् साधनसिद्धौ नास्तिकस्य बाह्यापलापस्सेत्स्यति ।

तत्र ज्ञानमेवैकमाकारवत्, तदेव च ग्राह्यमिति युक्तमुत्पश्यामः । ज्ञानन्तु प्रकाशस्वभावम् अनपेक्षितप्रकाशान्तरमेव साक्षात्कारि प्रकाशते । बाह्यस्य वस्तुन आकारवत्त्वं स्वीकृत्य तस्य जडस्य प्रकाशायोगादग्राहकान्तरं प्रकल्पनीयम् । कल्प्यमानञ्च

तन्निराकारमेष्टव्यम् । तदिदं निष्प्रमाणकम् । ज्ञानाभिधानं निराकारं वस्तु बाह्यादाकारवतः कल्पनमनुमानरूपं न भवितुमर्हति । बाह्य-वस्तुकल्प्यमानेन ज्ञानेन अविदितप्रतिसम्बन्धं सत् ज्ञानं कथमनुमापयेत् ? नित्यपरोक्षज्ञानवादिनो मीमांसकस्य क्वचिदपि न व्याप्तिसिद्धिः । किञ्च ज्ञानानुमाने किमर्थो लिङ्गम् ? उतार्थधर्मः, नाद्यः, व्यभिचारित्वाद् हेतोः । असत्यपि ज्ञानेऽर्थस्य भावात् । न द्वितीयः, स चाज्ञातुरपि साधारणः अविशेषात्परबुद्धिमप्यनुमापयेत् । अतो नाप्रत्यक्षा बुद्धिस्सिध्यति । तस्मादर्थाकाराभ्युपगमे निष्प्रमाणकं वस्त्वन्तरकल्पनम् । ज्ञानवैचित्र्यानुपपत्त्या तद्धेतुत्वेनार्थः कल्प्यते, स चार्थः निराकारस्य ज्ञानस्याकारं समर्पयतीति यद्युच्यते तदिदमनुपपन्नम्— वैचित्र्यमर्थाधीनमिति न वक्तुं शक्यम्, अत्यन्तापरिदृष्टपूर्वेण त्वर्थेन क्वचिद्वैचित्र्याधानस्या दृष्टत्वात् । समनन्तरप्रत्ययविशेषाद्वैचित्र्यं घटत एव । कार्यदर्शनबलेन कुतश्चिदेव समनन्तरप्रत्ययविशेषात् किञ्चिदाकारं ज्ञानं जायत इति किमनुपपन्नम् ? विलक्षणा ह्युपादानविशेषा विलक्षणशक्तय इति न किञ्चिद् दुष्यति । अतश्च कार्यदर्शनबलानुसारिण्येव च कारणव्यवस्था स्वीकार्या । अत एवासत्यपि बाह्य-स्वप्नादौ ज्ञानमात्रान्वयादेवाकारान्वयो दृश्यमानो ज्ञानप्रभावित एवावसीयते । न त्वेवमर्थवादिनो ज्ञानापेतमर्थस्याकारान्वयं दर्शयितुं शक्नुवन्ति— असति ज्ञाने आकारप्रतिभासायोगादिति । अतस्सिद्धं वासनानिमित्त एवायं ज्ञानाकारो नार्थसंसर्गधर्म इति । किञ्चार्थनिबन्धत्वे ज्ञानाकारस्य द्विचन्द्रादिविभ्रमेऽन्यथाऽर्थे व्यवस्थितेऽन्याकारा बुद्धिरुपजायते । कथं ह्यन्याकारोऽर्थः धियमन्याकारां जनयेत् ? तदवश्यमसत्यप्यर्थे भासमान आकारो ज्ञानस्यैवेति वक्तव्यः । तत्सामान्यादितरेषु तथात्वमिति न्यायेन सर्वत्रैव तथावधारणमुचितम् । अतस्सिद्धं भासमान आकारो ज्ञानस्यैव नार्थापेक्षः । व्यवहारसंवादापेक्षया हि प्रमाणं तद्विसंवादाच्चाप्रमाणम् इति सांव्यावहारिकी प्रमाणस्थितिः । परमार्थतया तु प्रमाणं चिन्तामयीमेव प्रज्ञामनुशीलयन्तः केचिदेव योगिनः निर्धूतनिखिलनीलाद्युपरागमभिमुखीकुर्वन्तीति तदेव तुरीयं प्रत्यक्षमिति सर्वमनवद्यम् ।

मीमांसकानां प्रक्रिया त्वत्र भिन्नैव । ते ह्यर्थं प्रत्यक्षं ज्ञानञ्चानुमेयं मन्यन्ते । संवित्प्रकाशते घटः प्रकाशत इति प्रयोगद्वयमुपलभामहे । तदत्र प्रकाशते-पदस्यार्थो विचारणीयः । परैरत्रोच्यते संवित् स्वयमेव प्रकाशते न तु प्रकाशान्तरमपेक्षत इति । तत्र धात्वर्थं प्रकाशात् संवित् किमर्थान्तरम् ? उत प्रकाश एवेति जिज्ञासायां, पदार्थान्तरमित्युक्ते संविदोऽप्यपरः प्रकाश एष्टव्यः । यदि च धात्वर्थादनर्थान्तरं संवित् तर्हि प्रकाशते-पदेनैवालम् किं संवित्पदेन प्रयुक्तेनाधिकं फलमवाप्यते ? अतः प्रतीतिकर्मतैव सविदः प्रकाशते पदार्थस्स्वीकर्तव्यः घटः प्रकाशत इति यथा । संवित् प्रकाशत इति कर्तृप्रत्यये विद्यमाने संविदः कर्मण्यनुपपन्ना, तथापि कर्तृभावस्तु वर्तते । तेनापि धात्वर्थाभेदस्सिध्यत्येव । यद्युभयमभिन्नं कथं तर्हि कर्तृभावः । न हि धात्वर्थः प्रकाश

एव संवित्पदार्थ इति वक्तुं साम्प्रतम् । अतो नाप्राप्तस्य सिद्धिरस्ति, नापि कर्मणः प्राप्तिरस्तीति सत्यास्संविदोऽवश्यं प्राप्यकर्मता भावान्तरवद्वक्तव्यैव नान्या गतिरस्ति । त्रिधाऽत्र पदार्था गम्यन्ते—अर्थः कर्म, आत्मा कर्ता, संवित्तु फलमिति, तत्र कथं संविदः कर्मत्वमिति कामं शङ्का स्यात्, किन्तु यथाऽर्थः कर्म तथा फलमपि कर्मैव स्वीकर्तव्यम् । यदि तत् स्वयं प्रकाशं तर्हि मातृमेययोरपि स्वप्रकाशापातस्स्यात् । तत्रैतावान् विशेषः प्रतीतितः संविदं कर्माभ्युपगच्छामः । प्रतीमो हि वयं मातृमेयगोचरां फलभूतां संविदम् । घटादयोऽप्रकाशात्मानः, ते प्रकाशान्तरमपेक्षन्ताम्, संवित्तु प्रकाशरूपा किमिति प्रकाशान्तरमपेक्षेत ? न हि दीपे प्रकाशमाने दीपान्तराद्दीपो जायत इति कथनं नोचितम्, सत्यं दीपे प्रकाशमाने दीपान्तराद्दीपो न ज्ञायते, किन्तु प्रकाशेन दीपो ज्ञायत एव भिन्नः । वस्तुतस्त्वत्रैवं वक्तव्यम्-दीपेन प्रकाश उत्पद्यते, उत्पन्नस्सः दीपेन ज्ञायत इति । तथैवेन्द्रियादिसंनिकृष्टाद् घटादेरर्थात् ज्ञानमुत्पद्यते, तदनु ज्ञातादर्थात् संवित् प्रतीयत इति । ज्ञातो घट इति खलु भवन्ति व्यवहर्तारः । एवं व्यवहर्तारस्संविदं प्रतिपद्यन्ते । अतस्संविदो न स्वात्मप्रकाशात्मत्वम् अर्थप्रकाशः खल्वसौ, दीपप्रकाश इति यथा । न चात्र ज्ञानार्थयोस्सम्बन्धाभावः, संयोगं समवायञ्च सम्बन्धमभिप्रेत्य सम्बन्धाभावे सत्यपि विषयविषयिभावसम्बन्धस्यात्र सत्त्वात् । येयं प्रतीतिकर्मता सोऽयं विषयपदार्थः । प्रतीतिः क्रिया, आत्मा कर्ता, इन्द्रियाणि करणम्, अर्थः कर्म, तद् येयमर्थस्य प्रतीतौ कर्मता तदेव तस्य विषयत्वम्, तद्वान् विषयी । एवं विषयविषयिभावेन सम्बन्धेन ज्ञानमर्थश्च सम्बद्धावेव भवतः । ईदृशं यद्रूपं तत् प्रतीतेः प्राङ् न भूतम्, किन्तु परस्तान्निष्पद्यते । अन्यथा ज्ञाताज्ञातयोरविशेषता स्यात् । इदमेव ज्ञातताप्रकारतादिपदेन मीमांसकैर्व्यवह्रियते, इदमेव च ज्ञानज्ञाने लिङ्गम् । ये हि ज्ञानं प्रत्यक्षमास्थिषत तेऽपि प्रथमं तत्र प्रामाण्यं नावधारयन्ति, किन्तु समनन्तरं जायमानेन घटमहमपश्यम् घटेनाहं जलमपिबम् इत्याद्यनुव्यवसायेन निश्चिन्वन्ति । ज्ञानानुमानवादी च प्रकटतादिनानुमिते ज्ञाने प्रामाण्यं स्वत इति वदति । अत्र सूक्ष्मेक्षिकया विचारः कर्तव्यः— ज्ञाततापदेन ज्ञानजन्यः पदार्थगतोऽतिशयविशेषः कथ्यते । तेन ज्ञानविशिष्टता ज्ञाततेति पराभिमतं निरस्तम् । तथात्वे ज्ञानज्ञाततयोरितरेतराश्रयस्स्यात् । ज्ञानोत्पत्तिदशायां सोऽतिशयविशेषः प्रतीत इत्युच्यते । अतस्स्वयं सिद्धो ज्ञानं साधयति । ज्ञानस्य द्वे अवस्थे भवतः— उत्पत्तिः प्रतीतिश्चेति । तत्रोत्पत्तिरिन्द्रियसन्निकर्षादिजन्या, प्रतीतिश्च ज्ञाततया । अर्थस्य कर्मभाव उत्पत्तौ । तस्मादुत्पत्त्यैव ज्ञानस्य विषयोऽज्ञातपूर्वः सम्प्रति ज्ञातस्सन् ज्ञानमुपकल्पयति । ज्ञातपूर्वत्वेऽस्तीन्द्रियाणामसाधारणो व्यापारः । किञ्चिदेव तु कदाचिज्ज्ञातं भवति, न सर्वं सर्वदा । इन्द्रियेषु व्याप्रियमाणेषु जागरायामर्थतया त्वग्रहणम्, सुस्वापादाविन्द्रियाणां व्यापाराभावाददर्शनम् । आत्ममनसोरपि स्वरूपेण सतोरर्थतथात्वदर्शने न हेतुत्वम्, किन्तु यदेव किञ्चिद्बहिरिन्द्रियं चक्षुरादिकार्यदर्शनवशान्मनसा संयुक्तमित्यवगतं किञ्चि-

ज्ञापयति । अत एव चक्षुस्सन्निकृष्टमपि हि किञ्चिदेव कदाचिज्ज्ञातं भवति नापरम्, तदिदमसति विशेषेनावकल्पते । एवञ्च यस्यैव ज्ञानमुत्पन्नं तस्यासौ ज्ञातस्सन्नर्थोऽनुपपद्यमानो ज्ञानकल्पनायां हेतुर्भवतीति सिद्धम् ।

अयं हि लोकसिद्धः पन्थाः— येऽग्न्यादयः प्रकाशतया प्रसिद्धाः ते घटादीनां प्रकाशकाः न तु स्वात्मन इति । स्वप्रकाशाय स्वात्मानं नापेक्षन्ते, स्वस्य स्वस्मिन् प्रकाशायोगात् । यद्येवं तर्हि ज्ञानमप्रकाशितमेव प्रकाशत इत्यायाति इति चेदत्र ब्रूमः चाक्षुषेण हि तेजसा प्रकाशितास्ते गृह्यन्ते, तेषां तद् ग्राहयितृ, न गृहीतृ, गृहीतत्वञ्चेदिन्द्रियाणां चैतन्यप्रसङ्गात् । यद्यपि नायनं तेज आलोकसहकृतं सद् घटादीनां प्रकाशकमिति प्रकाशान्तरसापेक्षा वर्तते, तथापि भिन्नजातीयाविमौ प्रकाशौ नयनस्यालोकस्य च । अत एवान्धस्य प्रदीपादयो न बुद्धिविषयाः । स्वप्रकाशत्वे चान्धस्यापि धीगोचरा भवेयुः । एतेन ग्राह्य-गृहीतृ-ग्राहयितॄणां भेदस्साधितः ।

अहं सुखी इत्यादि प्रयोगेभ्यो जायमाने ज्ञाने आत्मनो द्विरूपत्वमुपलभामहे ग्राह्यत्वं ग्राहकत्वञ्चेति, किन्तु इदं नीलम् इत्यादिज्ञाने नीलमात्रं प्रकाशते, न त्विन्द्रियाणां करणानां ग्राहकस्यात्मनो ज्ञानस्य वाकार उपलभ्यते, नीलमेव गृह्यते । तच्च नीलं ज्ञातं सत्प्रतीयत इत्युपपादितम् । अत्र यथा करणमिन्द्रियम् ग्राहक आत्मा न ज्ञायते, तथा ज्ञानमपि । कर्ममात्रस्यात्रावगतिः, न कर्तुः न च करणस्य नापि क्रियायाः अतो ग्राह्यग्राहकयोर्भेदेनैव प्रतीतिरिति सिध्यति ।

एवं तैरुच्यते— यत् पूर्वं ज्ञानमुत्तरस्मिन् वासनावरनामानं शक्तिमर्पयति । ततस्तद्रूपं तज्जायमानं तदालम्बनमित्याख्यायते । एवञ्च ग्राह्यग्राहकैकत्वं सिध्यतीति । तदिदं न युक्तियुक्तं प्रतिभाति— पूर्वज्ञानाहितवासनावशेन जायमानमुत्तरं स्मृतिरूपमेव भवेत् । पूर्वन्त्वतीतं तत्कथं वर्तमानतया गृह्येत । स्मृत्या च स इष्यतीतत्वानुविद्ध एव गोचरीभवति । इह तु इदमित्येव जायते । अतो न पूर्वापरयोस्ताद्रूप्यम् । यदि तु वासनारूपमेव ज्ञान न तदतिरिक्ता वासना नाम काचिदिति मतम्, तर्हि तदिदमनुपपन्नम्, निराधारायास्तस्या अनुपपन्नत्वात् । अतीता च सा नास्ति, अनागता सा अस्तीति कथं द्वयोरैकत्वम् ? अतः कथमपि ग्राहग्राह्यकयोरैक्यं न सिध्यति ।

किञ्च ग्राह्यग्राहकयोर्ज्ञानत्वेन रूपेणैक्यं मन्यते, तदपि न साधीयः । ज्ञानशब्दस्तु द्वेधा व्युत्पाद्यते— ज्ञायत इति ज्ञानं कर्मणि ल्युडन्तश्शब्दः, ज्ञप्तिर्ज्ञानं इति वा ज्ञायतेऽनेनेति वा भावकरणयोर्व्युत्पाद्यते । तत्र प्रथमव्युत्पत्तौ ज्ञानमर्थो भवति, द्वितीयव्युत्पत्तौ च ज्ञानं धीर्भवति । एवं ज्ञानशब्द एक एवार्थज्ञानयोरुभयोर्वर्तते; अक्षादिशब्दवत् । शब्दमात्रन्त्वेकम्, अर्थस्तु भिन्न एव । सर्वथा ज्ञानाद्वस्तुभेदस्सिध्यत्येव । वस्तुभेदोऽयं काल्पनिको न पारमार्थिक इति कथनमपि न युक्तिसङ्गतमिव ।

संवृतिसत्यं परमार्थिकसत्यमिति सत्यभेदकल्पनं निष्प्रमाणमेव न किन्त्वनुचितमपि । न हि सत्यं क्वापि मिथ्या भवतीति पूर्वमुपपादितम् ।

अयमत्र निष्कर्षः— किमिदं जगत् ? कस्मादिदं प्रावर्तिष्ट ? इति विचार्य निर्णेतुमेव सर्वे दार्शनिकाः प्रवृत्ताः साधकबाधकयुक्तीरुपन्यस्य स्वस्वमतमवस्थापयन्ति परमतानि च दूषयन्तीति नैसर्गिकः पन्थाः । अद्यापरं मतं युक्त्या साधु खण्डित-मित्येव तन्मतं लुप्तं न भवति, परेद्युस्तन्मतावलम्बी नूतनं किञ्चित्प्रतिपादयेत्, अथवा पूर्वं स्वमतावलम्बिभिरुक्ता एव युक्तीस्सङ्गृह्य किञ्चित्स्वमतं पोषयितुं प्रवर्तेत एव । आचन्द्रतारकमियं खण्डनमण्डनधारा स्थास्यत्येव । परस्परं विरुद्धेष्वापणे प्रसारितेष्वपि वस्तुषु ग्राहकः प्रेक्षावान् स्वापेक्षितमेव वस्तु गृह्णाति । वस्तूनां हानो-पादेयता च प्रेक्षावदधीना । लशुनं दुर्गन्धयुतमनुपादेयञ्च, तदपि गृह्णन् तत्र न दुर्गन्धमनुभवति, न चापि तस्यानुपादेयत्वं मन्यते । तादृशोऽपि लोकोऽस्त्येव । लशुनस्य ग्राह्यत्वमग्राह्यत्वं चाभिन्ननिष्ठमिति लोकेऽवगच्छामः । यश्च लोकातीतो जीवन्मुक्तो वा आत्मयाजी वा ब्रह्मिष्ठतमो वा प्रारब्धवशादिह लोके वर्तमानोऽप्यवर्तमानः तत्र ग्राह्यत्वाग्राह्यत्वबुद्धिविहीन एव तिष्ठेत् । स खलु लोकानुपदेष्टुं वा बोधयितुं वा न समर्थः । लशुनं भक्षयन्तं तमवलोक्य नास्माभिः तदग्राह्यत्वबुद्धिमद्भिर्भवितुं शक्यते । तत्रास्माकं न खलु ग्राह्यत्वबुद्धिर्भवति । ग्राह्यत्वाग्राह्यत्वयोरननुसन्धानेन तेषां प्रवृत्तिर्हाने वोपादाने वा जायत इत्यङ्गीकर्तव्यम् । ते हि देहमिमं नश्वरमवस्थितमुत्थितं वा न जानन्ति । तेषामाचरणं न व्यवहारोपयोगि, सर्वमतीत्य वर्तमानत्वात्तेषाम् । तेषां ज्ञानमस्मद्ज्ञानाद् अत्यन्तं भिन्नम् । तत्सादृश्येन न लौकिकव्यवहारः कर्तुं शक्यः । लौकिकव्यवहारेण लोकानुसारिणा भवितव्यम्, न त्वलौकिकेन । जैमिनेरनु-शासनमिदं लौकिकं पन्थानं निर्दिशति । स्त्रीशरीरे महात्मनां लोकातीतानां कुणपत्व-बुद्धिर्भवेत्, अस्मभ्यन्तु तच्छरीरं रोचते । मातरि मातृत्वम्, सुतायां सुतात्वम्, स्नुषायां स्नुषात्वमस्तीति तत्र-तत्र सा बुद्धिरावश्यकी । सर्वत्र कुणपत्वबुद्धौ सत्यां व्यवहार एव परिलुप्तस्स्यात् । प्रपञ्चस्तु नानाकारेण दृश्यते । तत्र वर्तमानैरस्माभिस्तदनुवर्तनं कर्तव्यमेव । अलौकिक्या लौकिक्याश्च स्थितेर्मेलनं न सम्भवि, मिश्रणं तदनुचितमपि । सर्वमिदं समालोच्य जैमिनिप्रदर्शितमार्गे गच्छन्तः श्रीशबरस्वामिनः भट्टपादाश्च निरालम्बनवादं शून्यवादं च परीक्षितवन्तः । इमे च सिद्धमात्मानं न कथयन्ति । यथायथं लोकस्थितिमवबोधयन्ति । आत्मानं सिद्धं मन्यमानः परो ब्रूयादलौकिकम् । किन्तु स न सिद्धः । तथा चेत्स कथं ब्रूयात् ? किं ब्रूयात् ? केन ब्रूयात् ? इति शतशः प्रश्नाः प्रादुर्भवेयुः । दुस्समाधेया इमे प्रश्नाः । अतो वयं व्यावहारिकं पन्थान-मेवानुसरामः ।

जैमिनिः तत्कृतन्यायानां लोकोपयोगिता च

[तृतीयं व्याख्यानम्]

मीमांसा-सम्प्रदायः

मीमांसाशब्दोऽयं श्रौतः सम्प्रदायतश्चिरात्प्रवृत्तः। सम्प्रदायश्चाविच्छिन्नगुरुशिष्यपारम्पर्यम्। आ च भगवतः प्रथमायास्सृष्टेः आ चैतन्निमेषात् सर्वैरेव दार्शनिनिकैस्समादृतेयम्। आसीत् परमशोभनः कश्चन कालः यत्र लोका गुरूपदेशपरम्परयैव सर्वान् वेदान् दर्शनानि चाध्यगच्छन्। अधुनेव तदा तेषामध्ययनाय पुस्तकादिसाधनानि नाभवन्। श्रोत्रेन्द्रियव्यापार एवैकं साधनम्। श्रुतिरिति यथा वेदानां संज्ञा, तथैव श्रुतम् इति शास्त्राणां नाम यथार्थं सम्प्रवृत्तम्। सहजमिदं यत्साधनान्तराभावे समुपलब्धमेव साधनमादाय कार्याणि क्रियन्त इति। अल्पेन साधनेन यथा कार्याणि द्रढीयांसि समपद्यन्त, न तथा बहुभिस्साधनैरिति सम्प्रति वयमनुभवामः। शिक्षायाः प्रथमं साधनं श्रवणम्। श्रवणस्य बोधः फलम्। स च बोधः श्रवणेन पूर्वजैर्यथाऽवाप्यते स्म, न तथा वयमिदानीं तेनावाप्नुमः।

महर्षेर्जैमिनेरतिविस्तृतमिदं सह सङ्कर्षकाण्डेन षोडशाध्यायसूत्रात्मकं शास्त्रं स्वकृतश्रवणव्यापारस्यैव फलीभूतम्। आश्रमेषु महर्षयः श्रौतस्मार्तकर्मानुष्ठानपराः सम्भूय तदा तदा सन्दिग्धान् विषयान् सुविमृश्य परिषत्सु निर्णीतवन्तस्स्युः, तेषामेव परम्परातः प्राप्तानां सूत्रात्मको ग्रन्थो जैमिनिग्रथितो मीमांसापदाभिधः। त्रिकालदर्शिनो महर्षयः आयतौ दृष्टिं निक्षिपन्तः क्रमेणाध्येतृवृन्देष्वनुभूयमानं तात्कालिकं शास्त्राध्ययनवैमुख्यं किञ्चिदनुभवन्तः सम्प्रदायविच्छेदतो बिभ्यतः तेषु तेषु शास्त्रेषु सूत्रग्रन्थान् विरचयाम्बभूवुः। लक्ष्यैकचक्षुषः खलु महर्षयः। यथालक्ष्यं लक्षणानि सम्प्रवर्तन्त इति न्याय्यः पन्थाः। लक्षणप्रवृत्त्यनन्तरं लक्ष्याणि सिध्यन्तीति कल्पनं न केवलं दुश्शकम्, किन्त्वनुचितमपि। विना लक्ष्येण न लोकानां क्वापि प्रवृत्तिस्सम्भवति। तच्च लक्ष्यं लोकेषु कामं विप्रतिपन्नं सन्दिग्धं वा भवेत्। तदेवाश्रमपदेषु सम्भूय पुरा महर्षिभिश्चर्चितमासीत् परिषत्सु। चर्चितानामेव सूत्रात्मना ग्रथनं जैमिनेरिति प्रतीमः।

युक्तञ्चैतत्— जैमिनेरेकैकमपि सूत्रं प्रायोऽन्तर्हितवेदवाक्यमिति तावदसन्दिग्धम्। क्वचिद्वेदवाक्यं सूत्रात्स्पष्टमवगम्यते, क्वचित्सूत्रसमभिव्याहृतपदैरुन्नेयं भवति, क्वचिच्चातिक्लेशेन पूर्वापरसङ्गतिपरिशीलनेन निर्णेयं भवति, क्वचिच्च जैमिनेर्मनसि विद्यमानेऽपि वेदवाक्ये तन्निगूढमेवास्ति। आचार्यः श्रीशबरस्वामी भाष्यकारः सर्वेष्वधिकरणेषु जैमिन्यनुमतानि वेदवाक्यानि प्रदर्श्याधिकरणशरीरं रचयन् **'विशये प्रायदर्शनात्'** (२. २. १६) इत्यत्र सूत्रकारानुमतमुदाहरणं संशयञ्चाजानानः 'किमिहोदाहरणम्? न तावत्सूत्रेणैव परिगृहीतम्। यथा—अवेष्टौ यज्ञसंयोगात् क्रतुप्रधानमुच्यते' इति। नापि च साध्यं प्रतिज्ञातम्,' यथा—अयनेषु चोदनान्तरम् इति। केवलं विशये-संशये प्रायदर्शनं हेतुरिति निर्दिश्यते। कस्यायं हेतुरिति न विजानीमः। यजिमदेतत्कर्मेति। तदपि न सम्बध्यमानमिव पश्यामः। तदेतदवगमकं सूत्रमेव तावदनर्थकम्। अथ कात्र प्रतिज्ञा? कश्च सन्देहः? इति वक्तव्यम्। वृत्तिकारवचनात् प्रतिज्ञां संशयञ्चावगच्छामः। अत्र भगवानाचार्य इदमुदाहृत्य 'वत्समालभेत' वत्सनिकान्ता हि पशवः' इतीमं संशयमुपन्यस्यति स्म—किं यजिमदभिधान एष आलभतिः? उतालम्भमात्रवचन इति। उपपद्यते चैतदुदाहरणम् 'संशयश्च' इति। अनेन सन्दर्भेणेदमवगन्तव्यं भवति—यत्सूत्राणामाविर्भावतः पूर्वं मीमांसाध्ययनसम्प्रदायः तैस्तैर्महर्षिभिः श्रौतस्मार्तकर्मानुष्ठाननिरतैर्वाचो विधेयतया संरक्षितान् मन्त्रब्राह्मणात्मकवेदसन्दर्भानवलम्ब्य प्रवृत्त आसीदिति। अत एव जैमिनिः 'बादरायणः' 'कामुकायनः' 'आश्मरथ्यः' 'बादरिः' इत्यादीनि नामानि स्वसूत्रेषु निर्दिशति। इमे न मीमांसासूत्रप्रणेतारः। न ह्येकस्मिन् दर्शने द्वौ त्रयो वा सूत्रकाराः क्वचन दृश्यन्ते। विचारगोष्ठीष्विमे समवेता आसन्नित्येव युक्तं प्रतिभाति। तदानीन्तनाः साङ्गां स्वीयां शाखां यथानियममधीत्य समुचिते वयसि गार्हस्थ्यं प्रविश्य गृह्योक्तानि कर्माणि अनुतिष्ठन्तः प्रवयोभिस्समाजपरिष्कर्तृभिः श्रौतकर्मानुष्ठाने सम्प्रेरितास्तदनुष्ठाने प्रावर्तन्त। तत्र समुत्पद्यमानानां सन्देहानामपाकरणं प्रवर्तकैश्शिष्टैरक्रियत। एवं कर्मानुष्ठानसम्प्रदायः पुरा प्राचलत्। एवमेव विचारा अपि समपद्यन्त।

किञ्च **'अथातो धर्मजिज्ञासा'** इति प्रतिज्ञाताया धर्मजिज्ञासाया विचारात्मिकायाः **'स्वाध्यायोऽध्येतव्यः'** इति विधिप्रयुक्तत्वसाधनं ग्रन्थकाराणामिदमवद्योतयति-यन्मीमांसाध्ययनसम्प्रदायोऽनिदम्प्रथमताकात्कालात्प्रावर्तत इति। प्रतिज्ञाविषयो धर्मः, स च वेदार्थः, तस्य विचारः कर्तव्य इत्युक्ते विचारात्मकस्य मीमांसाशास्त्रस्य वैधत्वं सुतरामवाप्यते। धर्मं विहाय नान्यो वेदार्थः, वेदार्थमपहाय नान्यो विचारविषयः, धर्मः प्रमेयः, प्रमाणञ्च वेदः। तत्र धर्मस्तु न यागदानहोमरूप एव, द्रव्यं गुणः जातिरपि धर्मी अभीप्सिता मीमांसकानाम्। इमे यदि वेदार्थाः न तर्हि तेषां धर्मत्वे विप्रतिपत्तिः। अमीषां प्रमेयाणां बोधको वेदश्शब्दराशिः। शब्दस्य यदि द्रव्यत्वम्, यदि

वा गुणत्वम् तर्हि तस्यापि वेदविहितत्वाद् धर्मत्वं बलादापतति । एवञ्च वेदो धर्मः, वेदार्थो धर्मः, वेदार्थविचारोऽपि धर्मः । विचारस्य धर्मत्वे तदात्मिकाया मीमांसाया अपि धर्मत्वमायाति । अत एव मीमांसासूत्राणां 'धर्ममीमांसा' 'अध्वरमीमांसा' इत्येवं व्यवहारो दृश्यते शास्त्रकारेषु । युक्तञ्चेदम्—'**धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम्**' इति वदन्तो भट्टपादा धर्मप्रयोजनोद्देशेन मीमांसाया विधानं स्वीकुर्वन्ति । प्रयोजनोद्देशेन वेदविहितत्वमेव धर्मलक्षणमभिप्रैति भगवान् जैमिनिः । अतो विचारस्य वैधत्वे सिद्धे तदात्मिकाया मीमांसाया अपि धर्मत्वमेष्टव्यम् ।

मीमांसापदार्थः

किञ्च मीमांसाशब्दः पूजितविचारार्थे प्रसिद्धः । '**मान पूजायाम्**' '**माङ् माने**' इति पूजार्थे मानार्थे च धातुद्वयम् । तत्र '**मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य**' इति सूत्रे माङ् इत्यस्यङानुबन्धस्य धातोर्नान्तित्वं निपात्य अनिच्छार्थे सन् प्रत्ययेऽभ्यासस्य च दीर्घे मीमांसाशब्दो निष्पद्यते । '**धातोः कर्मणः**' '**समानकर्तृकादिच्छायां वा**' इत्युत्तरसूत्रे इच्छार्थे सन् विधानादयमनिच्छार्थे सन् इत्युभ्युपगन्तव्यं भवति । '**मान विचारे**' इत्यपि चुरादिपठितो धातुः । तस्मादपि मीमांसाशब्दो निष्पद्यते । तत्र पूजार्थे कश्चन धातुः विचारार्थे चापरः । पूजितविचारार्थे च न कोऽपि धातुः । अतः पूजितविचारार्थे मीमांसाशब्दः कथमिति प्रश्ने '**प्रसिद्धिबलात् पूजितविचारार्थत्वम्**' इति 'कल्पतरु'कारा वदन्ति । प्रसिद्धिश्च व्यवहारः, तस्यापि शक्तिग्राहकत्वमिष्यते । पूजितविचारवचनत्वं व्याकरणस्मृत्यसिद्धमपि प्रसिद्धेस्तत्साधकत्वं नानुपपन्नम् । अथवा तयोर्धात्वोरेकस्य ग्रहणे सति धात्वर्थतयान्यस्यापि धात्वर्थस्य लाभे विशेष्यविशेषणभावेन तादृशार्थवचनत्वं व्याकरणस्मृत्यविरुद्धम् । सर्वथा पूजितविचारवचनो मीमांसाशब्दः । जैमिनिकर्तृकविचारस्य पूजितत्वञ्च सूत्राविर्भावतः पूर्वं विदुषां विचारगोष्ठीषु निर्णीतत्वमेव । अतो यथा वेदोऽनादिः तथा मीमांसा-पूजितविचारोऽप्यनादिरिति कथनं नासङ्गतम् ।

जैमिनेर्व्यक्तित्वम्

मीमांसाया अनादित्वं भगवान् जैमिनिः स्मृत्यधिकरणे (१.३.१.) '**अपि वा कर्तृसामान्यात्प्रमाणमनुमानं स्यात्** इति सूत्रे '**कर्तृसामान्यात्**' इति हेतुं प्रयुञ्जानोऽवद्योतयति । याः स्मृतयः प्रत्यक्षश्रुतिमूलास्तासां प्रामाण्ये न काचिद्विप्रतिपत्तिः । याश्च प्रत्यक्षश्रुतिरहितास्तासां का गतिरिति प्रश्ने हेतुं 'कर्तृसामान्यात्' इत्युपन्यस्यति । य एव वेदोदितकर्मणां कर्तारस्त एव स्मृतीनामिति कर्तृसामान्यम् । कर्मानुष्ठानं च तदर्थज्ञानाधीनम्, तदर्थज्ञानञ्च विचाराधीनम् । विचारश्च वेदवाक्यानाम् । वेदवाक्यानि चेत-

स्ततो विप्रकीर्णानि। तानि स्मृत्वा स्मृतिग्रन्थप्रणयनं मनुयाज्ञवल्क्यादीनामिति 'कर्तृ-सामान्यात्' इत्यस्य तात्पर्यम्। अनेन हेतुना श्रुतिमनुमाय तासां प्रामाण्यमभ्युपगन्तव्यम् अत्र 'कर्तृ'पदेन जैमिन्यभिमताः परिचिताः कतिपय एव कर्तारः कर्मानुष्ठातारश्च नोच्यन्ते, व्याप्तिसिद्धये तत्समकालिकाः कतिपय एव भवेयुः। तेनानुमितिः जैमिनेश्चिरतरवर्तिभिः स्मर्तृभिर्विरचितानां स्मृतीनां मूलश्रुतिविषयिणी सिध्यतीत्यङ्गीकर्तव्यम्। ते च चिरतराः स्मृति निबन्धारः प्रत्यक्षश्रुतीरनुभूयैव सर्वाः स्मृतीर्न्यबन्धत इति न निर्बन्धः, शिष्टाचारेषु परिप्राप्तान् विषयान् स्मृत्वा प्रेक्ष्य वायतौ लोकानां तत्तत्संस्कृति-परिरक्षणोपयोगाय ग्रन्थरूपेण न्यभान्त्सुः। इमेऽपि ग्रन्थास्तदानीं लिपिनिबद्धा आसन्निति न स्वीकर्तुं शक्यते, वेदवदध्ययनपरम्परायामेवेमा आसन्निति वक्तव्यम्। अध्ययनमत्र लिपिनिबद्धपुस्तकाक्षरवाचनरूपं न पठनमभिप्रेयते, किन्तु गुरुमुखोच्चारणानूच्चारणव्यापारेण वाचो विधेयतासम्पादनम्। वेदानामिव गृह्यश्रौतसूत्रस्मृतीतिहासादीनामप्यासीदिति प्रतीयते। अत एव कल्पसूत्राधिकरणे कल्पसूत्राणां स्मृत्यधिकरणन्यायेन प्रामाण्ये सिद्धेऽपि तेषामपौरुषेयत्वेन प्रामाण्यमाशङ्क्य **'प्रयोगशास्त्रमिति चेन्नासन्नियमात्'** इति जैमिनिः परिहरति। कल्पसूत्राणामपौरुषेयत्वमाशङ्कितुः पूर्वपक्षिणो भूयसीषु युक्तिष्वियमप्येका युक्तिरभिधातुं योग्या यदमीषामपि वेदवदध्ययनं ब्रह्मयज्ञविधितः सम्प्रदायतो वा स्वीकृतमिति। स्मर्तॄणां कर्तृस्मरणं दृढतरमस्तीति पौरुषेयत्वेनैव प्रामाण्यं नापौरुषेयत्वेनेति तत्रत्यस्सिद्धान्तः। एवञ्च 'कर्तृसामान्यात्' इति हेतुं निर्दिशता महर्षिणेदमवबोध्यते—यत् चिरतरः कश्चन सम्प्रदायः गुरुशिष्यभावरूप आसीद् यस्मिन् वेदाध्ययनम्, तदर्थविचारः, तदर्थं गोष्ठ्यः, ऐहिकामुष्मिकफलदानां श्रौतस्मार्तकर्मणामाचरणञ्चाविच्छिन्नरूपेण प्रचलितमासीदिति। अत्रैव कर्तॄणाञ्च सामान्यमिति।

किञ्च क्वचित्कर्तृसामान्ये सत्यप्यापस्तम्बकात्यायनादौ तद्विरचितसूत्रविशेषाणामप्रामाण्यसाधने न जैमिनिस्सङ्कोचमुदञ्चति। न खल्विमानि सूत्राण्यपौरुषेयाणि दृढतरकर्तृस्मरणस्य सत्त्वात्। अतो विरुद्धायां प्रत्यक्षश्रुतौ लभ्यमानायां तेषामप्रामाण्यस्य निवारयितुमशक्यत्वात्। तदिदं कल्पसूत्राधिकरणप्रयोजनकथनव्याजेन जैमिनिः **'सर्वत्र च प्रयुक्तत्वात्सन्निधानशास्त्राच्च'** इति सूत्रेण व्यक्तीकरोति। आपस्तम्बकात्यायनादिसूत्रेषु किञ्चिदेकं 'कर्तृसामान्यात्' इति हेतुना प्रमाणम्, अपरञ्च किञ्चित् 'सन्निधानशास्त्राच्च' इति हेतुना अप्रमाणम् इतीदं सङ्गतमिव न प्रतिभाति, तथापि जैमिनेः दृष्ट्या सुसङ्गतमेवेदम्। तथापि जैमिनिर्हि **'तस्य निमित्तपरीष्टिः'** इति प्रतिज्ञातस्य धर्मस्य स्वरूपं परीक्ष्य निर्णेतुं न्यायनिबन्धनात्मकमिदं शासनं प्रवर्तयामास। परीक्षा च निष्पक्षपातिनी दृष्टिः। तया पर्यालोच्यमाने कात्यायनादीनां वचस्सु यदेव श्रुतिविरुद्धम् अपि च न्यायविरुद्धं तस्याप्रामाण्याङ्गीकारे न कोऽपि दोषः। कर्तृ-

सामान्यहेतुना समग्रस्य प्रामाण्येऽवधृतेऽपि कस्याप्येकस्य सूत्रस्य श्रुतिविरोधदर्शनेऽप्रामाण्यस्वीकारो न दोषाय, न्यायानां समक्षमात्मीयपरकीयविभागाभावात् । न्याया ह्यपरिवर्तनीया भवन्ति, परीक्ष्य निर्णीतत्त्वात्तेषाम् । महर्षित्वेन जैमिनिकात्यायनापस्तम्बादीनां सत्यामपि समानतायां परीक्षकत्वं जैमिनेर्विशिष्यते । तदर्थमेव जैमिनिः न्यायनिबन्धनात्मकं शासनं प्रवर्तयामास । कात्यायनादयस्तु यत्र तत्र विप्रकीर्णाश्शाखा पर्यालोच्य तद्गतांश्च विषयानवबुध्य इतस्ततश्शिष्टाचारपरिप्राप्तांश्च विज्ञाय तान् सिद्धवत्कृत्य स्मृतिसूत्रात्मना सन्निवेशितकन्तः यथाश्रुतम् यथा च दृष्टं तान्निबबन्धुः । नात्र तेषां परीक्षायामवसरः । सम्प्रत्युदाहरणानि पर्यालोचयामः— दर्शपूर्णमासयोः पौर्णमास्यां दर्शे च द्वौ द्वौ पुरोडाशौ— आग्नेयाग्नीषोमीयौ, आग्नेयैन्द्राग्नौ चेति । द्व्यवदानादिक्रमेण प्रधानहोमे निर्वृत्तेऽवशिष्टपुरोडाशस्य प्रतिपत्तिकर्मसु स्विष्टकृदादिषु भवति विनियोगः । तत्र चतुर्धाकरणमिति किञ्चित्कर्म । पुरोडाशस्य कञ्चन भागं चतुर्धा विभज्य होत्रादिभ्यश्चतुर्भ्य ऋत्विग्भ्यो भक्षणाय प्रदीयते । तत्र द्वयोः पुरोडाशयोश्चतुर्धाकरणं कस्येत्यत्र कात्यायनो वदति—**'अविशेषादुभौ वा'** इति । द्वयोः पुरोडाशयोश्चतुर्धाकरणमिति तदर्थः । जैमिनिस्तु मन्यते— आग्नेयपुरोडाशस्यैव चतुर्धाकरणं नान्यस्येति । जैमिनेरत्र **'आग्नेयं चतुर्धा करोति'** इति वेदवाक्यमवलम्बः । किमिदं वेदवाक्यं कात्यायनेन न दृष्टम् ? दृष्ट्वा वा शाखान्तरवाक्यदर्शनेनोभयोः पुरोडाशयोश्चतुर्धाकरणमिति ब्रवीति ? एवं जैमिनिविषयेऽपि विकल्पो भवति—किं द्वयोः पुराडाशयोश्चतुर्धाकरणबोधकं शाखान्तरीयं वाक्यं जैमिनिना न दृष्टम् ? दृष्ट्वा वा 'आग्नेयं चतुर्धा करोति' इति वाक्यावलम्बनेनाग्नेयस्यैव पुरोडाशस्य चतुर्धाकरणं ब्रवीति ? इति । भवतु यथा तथा वा । अतिचिरन्तनोऽयं विषयः । न वयमिदानीं सहसा निश्चेतुं शक्नुमः, किन्तु कल्पसूत्राधिकरणन्यायमनुसर्तुं प्रभवामः । न्यायस्त्वस्मान् विषयमिमं ग्राहयति-यत् 'अविशेषादुभौ वा' इति कात्यायनवचनं शाखान्तरवचनमूलकमपि मूलस्य यावदुपलम्भम् उभयोः पुरोडाशयोश्चतुर्धाकरणं नानुष्ठेयमिति ।

अनेन सन्दर्भेण जैमिनेर्व्यक्तित्वमनितरसाधारणमिति निश्चेतुं शक्यते—कर्तृसामान्य हेतुना ये जैमिनिना सङ्गृहीताः त एव कात्यायनादयः क्वचिद् असन्नियमहेतुनोपेक्ष्यन्ते । कात्यायनादिविरचितेषु ग्रन्थेषु 'प्रयोगशास्त्रमिति चेत्' इति ब्रुवाणस्य जैमिनेश्शास्त्रत्वबुद्धिरस्ति, किन्तु तत्र सन्निबन्धनत्वं जैमिनिना नानुभूयते । यत्रैव शास्त्रे सन्निबन्धनता नास्ति, तस्योपेक्षा नानुचिता । सन्निबन्धनत्वाभावे च विरुद्धश्रुत्युपलम्भः कारणम् । एवञ्च कात्यायनादिनिबद्धे शास्त्र एव जैमिनिर्दोषं पश्यति, न तु कात्यायनादौ, तत्र कर्तृसामान्यहेतोर्व्यवस्थितत्वादिति सिध्यति । तेन स्वयूथ्येष्वनुग्रहबुद्धिं परयूथ्येषु च निग्रहबुद्धिं पक्षपातयुतां जैमिनिर्नावहतीति स्पष्टमवगम्यते । अत एव 'चोदितन्तु प्रतीयेताविरोधात्प्रमाणेन' इति सूत्रयन् स्वीयां निष्पक्षपातविचार-

दृष्टिमवद्योतयति। कथमन्यथा पिकनेमादिपदानामनार्यसमाजव्यवहारप्रसिद्धानेवार्थान् ग्रहीतुं जैमिनिरनुमन्येत। शब्दव्युत्पादनाय सन्ति स्वयूथ्यैः प्रवर्तितानि निगमनिरुक्त-व्याकरणादीनि शास्त्राणि। तैः पिकादयश्शब्दा व्युत्पादयितुं शक्यन्ते। निगमनिरुक्तादिप्रवर्तकाशिशष्टाः धर्मलिप्सवोऽधर्मभीरवः श्रुत्यर्थतत्त्वं विविच्य पालयन्तस्तत्राभि-निविष्टाः, अनार्या म्लेच्छास्तु यथाकथञ्चिद् व्यवहाराय शब्दप्रयोक्तारः, तथापि तत्प्रसि-द्धिविषयमर्थमेव ग्रहीतुं जैमिनिरनुशास्ति—'**चोदितन्तु प्रतीयेत**' इति। अत्र च कारणं निर्दिशति—'**अविरोधात्प्रमाणेन**' इति। पिकादिशब्दानां म्लेच्छप्रसिद्धार्थग्रहणेन '**पिकमालभेत**' इत्यादिवेदवाक्यार्थनिर्णये न कोऽपि विरोधः। निरुक्तादिप्रवर्तकाः स्वयूथ्याः, तद्द्वारा निर्णीतार्थग्रहणे प्रकृतिप्रत्ययभेदेनार्था अनेके भवेयुः, तेषु को ग्राह्यः कश्चाग्राह्य इति भवेद्विचिकित्सा। तदपेक्षया प्रमाणाविरोधात् म्लेच्छप्रसिद्धा-र्थग्रहणमुचितम्। यद्यप्यार्यम्लेच्छाधिकरणे आर्यप्रसिद्धेर्बलीयस्त्वं तदितरस्य दुर्बलत्वं व्यवस्थापितम्, तथापि व्यवहारस्योभयत्र तुल्यत्वेपि वाक्यशेषानुगुण्यमार्यप्रसिद्धौ वर्तत इति तस्यैव ग्रहणमिति निर्द्धारितत्वान्न दोषः। प्रकृते तु पिकादिशब्दा म्लेच्छेष्वेव प्रसिद्धा नार्येषु। तत्र तदर्थग्रहणे जैमिनिर्न दोषं पश्यति।

किञ्च होलाकाधिकरणन्याये परिशील्यमाने जैमिनिः समग्रं भारतमखण्डं व्यवस्थापयतीति स्पष्टमवगम्यते। तत्तद्देशप्रान्तभेदेन भिन्नानामप्याचाराणां सर्वधर्मत्वं सर्वसाधारणत्वमुपपादयन् '**विधानस्य तन्न्यायत्वात्**' इति हेतुं निर्दिशति। होलिकोत्सवोद्वृषभयज्ञादिभ्य आचारेभ्यः कल्प्यमानानां स्मृतीनां ताभ्यश्चानुमीयमानानां श्रुतीनां सर्वधर्मप्रापकत्वादिति हेतोरर्थः। प्राच्योदीच्यत्वादयः कर्तृपरिच्छेदका न भवि-तुमर्हन्ति। कर्तृपरिच्छेदकतया जातिगुणक्रियाव्यक्त्यवयवसंस्थानान्येव सम्बद्धुमर्हाणि। न हि प्राच्यादयश्शब्दाः पूर्वोक्तेष्वन्यतमप्रवृत्तिनिमित्तकाः। '**अष्टवर्षं ब्राह्मणमुपन-यीत**' '**शुक्लो होता**' '**सोमयाजी सन्नयेत्**' '**भार्गवो होता**' '**अन्यूनानतिरिक्ताङ्गा ऋत्विजः**' इत्यादौ ब्राह्मणशुक्लादयश्शब्दाः कर्तृपरिच्छेदकतया सम्बध्नन्ति। '**प्राच्यै-र्होलाकाः कर्तव्या**' '**उदीच्यैरुद्वृषभादयः**' '**दाक्षिणात्यैराह्नीनैबुकादयः**' इत्युक्ते के ते प्राच्यादयः? इति प्रश्ने कीदृशमत्र निर्वचनं भवेत्? न हि प्राचीं गतः प्राच्यो भवति, नापि प्राच्या आगतः, न चापि प्राच्यां समुत्पन्नस्तथा सर्वत्र व्यभिचारात्। तत्र तत्र भिन्नास्वपि भाषासु तत्तद्भाषाभाषित्वेन न लोकाः परिच्छेत्तुं शक्यन्ते, एकस्यैव विभिन्नभाषाभाषित्वोपलम्भात्। एवमाचाराणां सर्वधर्मत्वं व्यवस्थापयता जैमि-निना देशस्याखण्डत्वं संरक्ष्यते।

जैमिनिन्यायाः प्रजातन्त्रञ्च

जैमिनिरयं प्राधान्येन निष्कृष्टं वेदवाक्यार्थं विविधैर्न्यायैः प्रदर्शयितुं शास्त्र-

मिदमारभमाणो वेदस्य वैदिकसंस्कृतेश्च लोकेन सह विद्यमान सम्बन्धनैकट्यं क्वचिद्वैदिकैः क्वचिच्च लौकिकैरुदाहरणैरवद्योत्य लोकान् शिक्षयति । सर्वस्यापि शिक्षकस्यायं स्वभावः—यदतिगभीराणां विषयाणामवबोधनाय नैकविधानां लौकिकोदाहरणानामवलम्बनं नाम। अत एव सूत्रकारः **'लोकवत्' 'यथालोके' 'लोकभूतेषु' 'लोके कर्माणि वेदवत्'** इत्येवं शतशः पदानि प्रयुञ्जानो वेदस्य न केवलं लोकसाधारण्यं प्रदर्शयति, अपि तु सम्प्रति भारतीयैः स्वीकृतं 'प्रजातन्त्रविधानं' परिपुष्णाति । तत्र कतिपयान्युदाहरणानि ससमन्वयं निरूपयामः ।

अर्थवादाधिकरणे (१. २. १) **'अन्यानर्थक्यात्'** इति सूत्रेण **'पूर्णाहुत्या सर्वान् कामानवाप्नोति तरति मृत्युं तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेद'** इत्यादिवाक्यानामप्रामाण्यमाशङ्कितम् । अग्निसिध्यर्थं क्रियमाण आधाने विहिता पूर्णाहुतिः । अनयैव सर्वेषां कामानामवाप्तौ सत्यां बह्वायाससाध्यानि दर्शपूर्णमास-चातुर्मास्य-ज्योतिष्टोमादीनि कर्माण्याचरितुं कथं लोकानां प्रवृत्तिस्स्यात् ? इमानि कर्माण्यनर्थकानि भवेयुः, बहूनां कर्मणामानर्थक्यापेक्षया एकस्यैवार्थवादवाक्यस्याप्रामाण्यं समुचितम् । एवमश्वमेधयागस्यानुष्ठानेन यत्फलं मृत्युतरणब्रह्महत्यातरणरूपं तच्चेदश्वमेधप्रकरणवेदनेनैव सम्पद्येत तर्हि तदनुष्ठाने पुरुषः कथं प्रवर्तेत ? अत एतादृशं वाक्यमनर्थकम् इति पूर्वपक्षिण आशयः । अस्याश्शङ्काया निराकरणसूत्रम्—**'फलस्य कर्मनिष्पत्तेस्तेषां लोकवत्परिमाणतः फलविशेषस्स्यात्'** इति । अग्निहोत्रदर्शपूर्णमासादीनां स्वर्ग एव फलमुपदिष्टम् । स्वर्गस्त्वामुष्मिकं फलम्, तद्गततरतमभावोऽग्निहोत्रदर्शपूर्णमासादितरतमभावापन्नकर्मभिः सम्पद्यमानोऽपि न दृष्टिगोचरस्सः । तमिमं दृष्टिगोचरेण लौकिकदृष्टान्तेन घटयति—**'लोकवत्परिमाणतः'** इति । सेवातारतम्येन लोके भृत्याः फलतारतम्यमनुभवन्तीति वयमनुभवामः । गृहनिर्माणाय परिक्रीतेषु भृत्येषु स्नुहीसंयोजनेष्टकावहनकर्तारः, इष्टकासंयोजनकर्तारः, इष्टकासु भित्तिषु च चित्रकलाविधातारश्च तरतमभावेन भृतिमवाप्नुवन्त एकैकोऽपि ब्रवीति यदहमवाप्तव्यं सर्वमवाप्नुयामिति । अत्र यथा सर्वशब्दः स्वस्वावाप्तव्यपरिमाणवाची तथैव **"सर्वान् कामानवाप्नोति'** इत्यत्रापि सर्वशब्दोऽवगन्तव्यः । एवं ब्रुवतो जैमिनेर्न किमपि वैशिष्ट्यं प्रतीयत इव प्रतिभायात्, किन्तु जैमिनेर्हृदयं प्रविश्य पर्यालोच्यमानेऽत्रत्यं निगूढं तत्त्वं किञ्चित्प्रतीयेत । सम्प्रति स्वीकृतप्रजातन्त्रविधाने स्वतन्त्रभारते सर्वोऽपि स्वातन्त्र्यमात्मनो मन्यमानस्सहसैवान्यसमतामवाप्तुं चेष्टते । तदर्थं कलहमाचरति, सङ्घं संघट्टयति, धर्मघटञ्च विदधाति, शासनसूत्रं विच्छेदयितुं प्रयतत इति प्रत्यक्षमीक्षामहे । तदत्र जैमिनिरनुशास्ति—**'फलस्य कर्मनिष्पत्तेः'** इति । सनियममनुष्ठीयमानैरेव कर्मभिः फलस्य निष्पत्तिरिति नेदमप्रत्यक्षम् । फलकामनां जैमिनिर्न निरुणद्धि । सर्वः सर्वाणि फलानि कामयितुं प्रभुः, किन्तु तत्रा-

धिकारी सन् फलानि कामयेत । अधिकारिविशेषणेषु विद्यायास्सामर्थ्यस्य चोपदेशष्षष्ठेकृतः । सतोरपि विद्यासामर्थ्ययोः नियामकैः प्रवर्तितः क्रमोऽपि नियतः कश्चनापेक्ष्यते । एवमधिकारिविशेषणसम्पन्नस्सनियमं कर्माणि कुर्वीत । तादृशेषु कर्मस्वनुष्ठीयमानेषु कर्मानुसारि फलमवाप्तुं सोऽधिकारी । सोमयाजिनो यादृशः स्वर्गः फलं तादृशमग्निहोत्रमात्रानुष्ठात्रा मया लब्धव्यमितीच्छामात्रेण न तेन लब्धुं शक्यम्, न चेयमिच्छापि साधीयसी । स्वतन्त्र-भारते मानवमात्रस्य राष्ट्रपतिपदं राज्यपालपदं प्रधानमन्त्रिपदं वा लब्धुमस्त्यधिकार इत्येतावता न सर्वैस्तल्लब्धुं शक्यम् । तत्तदौपयिकसामग्रीसम्पादनं खलु प्रथममावश्यकम् । फलकामनातः पूर्वं तत्साधनेषु कर्मसु स्वस्याधिकारोऽस्ति न वेति विचिन्तनीयम्, विचिन्तनमिदं ज्ञानम्, तत इच्छा, ततो यत्नः, ततः कर्मसम्पादनम् । फलन्तु स्वत एव निष्पद्यत इति । एवञ्च प्रजातन्त्रे जनतया स्वीयं कर्म कार्यालयीयं वा स्वतन्त्रं वा यथावदाचरणीयम्, तदनुसारेण तत्र तत्र नियतं फलमवाप्तव्यमिति न्यायोऽयं शिक्षयति ।

विषयमिमं विशदयन् जैमिनिः तृतीयाध्यायस्याष्टमपादे सूत्रयति—'**ततश्च फलसिद्धित्वाल्लोकवत्**' (३. ८. ९) इति । ज्योतिष्टोमे दीक्षितव्रतं श्रुतम्—'**पयोव्रतं ब्राह्मणस्य, यवागू राजन्यस्य, आमिक्षा वैश्यस्य**' इति । दीक्षासमये ब्राह्मणेन यजमानेन पयोव्रतं कर्तव्यम्, यवागूव्रतं राजन्येन, आमिक्षाव्रतं वैश्येन । तेन तेन तस्य तस्य भक्षणं कर्तव्यमित्यर्थः । पय आदिव्रतेन यजमानो यद्यात्मनश्शरीरस्य शोषणं निश्चिनुयात् तर्ह्यनुव्रतमाम्नातम्—'**यदि मन्येतोपदस्यामिति ओदनं धानाः सक्तून् घृतमित्यनुव्रतयेदात्मनोऽनुपदासाय**' इति । ओदनधानादिव्रतमनुव्रतम् । उपदासश्शोषणम्, अनुपदासोऽशोषणम् । तदिदमनुव्रतं प्रकृत्याम्नातम्—'**घृतं नाश्नाति अथाश्नाति त्र्यहं नाश्नाति**' इत्यादि । अनेकदिनव्यापिन्यां दीक्षायां व्रतमपि तावद्दिनव्याप्तं भवति । तत्रानुव्रतेऽयं नियमः—दिनद्वयमनशनं तदूर्ध्वमेकस्मिन्दिनेऽशनम्, ततो दिनत्रयमनशनम् । एवमुत्तरत्र । तदिदमनशनं किमाध्वर्यवम् ? उत याजमानम् ? इति सन्दिह्य याजमानमिति सिद्धान्तयन् सूत्रयामास—'**तपश्च फलसिद्धित्वाल्लोकवत्**' इति । सूत्रगतं तपःपदं कायशोषणानशनपरम् । कायशोषणमिदं तपः याजमानम्, कुतः ? फलसिद्धित्वात्—फलस्य सिद्धिः—उत्पत्तिर्यस्मात्तत् तपः—फलसिद्धिः, तद्भावस्तस्मात् यथा लोके स्वल्पक्लेशेनापि महतः फलस्यावाप्तिस्तद्वदिति सूत्रार्थः । यथा दीक्षितस्यान्ये संस्कारास्तथेदमनशनमपि तत्संस्काररूपम् । फलिसंस्कारपदेनेमे व्यवह्रियन्ते । फली यजमानः तस्य संस्कारा इत्यर्थः । एवं यजमानेनानुष्ठीयमानस्संस्कारो यजमानसमारब्धकार्ययोग्यताधायकत्वेन परिगण्यते । योग्यताधानञ्च दृष्टादृष्टविधया द्विविधम् । प्रकृते चादृष्टविधया प्रतिबन्धकनिरासपूर्वकं योग्यताधानम् । प्रतिबन्धकमदृश्यम्, तदस्तीति निश्चित्य तन्निरासाय यत्नः क्रियते । यत्र प्रतिबन्धकं दृश्यं तन्निराकरणं दृष्टविधयैव

Incidentally it might be said that on the issue of "ends and means" which often comes up as an ethical dilemma standing in the way of action for the achievement of socialism, it is good to remember what the late Professor D. D. Kosambi had pointed out perceptively. In the Indian tradition no name is more honoured than that of Shri Krishna. But as the Mahabharata testifies, it was on Krishna's advice that Bhishma was killed unfairly by putting the eunuch, Shikhandi, ahead of the Pandava fighting forces, and Bhishma would not soil his hands by taking arms against him ; Drona was killed by Yudhisthira telling him a cruel and deliberate lie ; Karna was killed, against all canons of chivalry, when he was dismounted and disarmed ; Duryodhana was bludgeoned to death after an impermissible, foul blow had shattered his thigh—every time Krishna bluntly stating that victory could never have been won otherwise and therefore such action was warrantable.

This is not a plea for wrong and unethical conduct, but a justification, in the logic of life, of the notion that socialists hold that ends cannot be always dissociated from means and that revolution, even if it might mean some distasteful things, becomes from time to time a historical necessity.

The concept of socialism and the practices necessary for the achievement of socialist objectives are not something which goes against the grain of Indian thinking, and in so far as Sanskrit literature furnishes evidence, we know of case after case where things were said or done which fit in with the requirements of modern life, even in the direction of progress towards socialism which happens today to be the national objective of this country.

शुकदेवं पाठयित्वा कृतकृत्योऽभूत् । लक्षश्लोकात्मकमहाभारतविषये स्वयं कथितं व्यासेन—

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ॥
त्रिभिर्वर्षैः सदोत्थायी कृष्णद्वैपायनो मुनिः ।
महाभारतमाख्यानं कृतवानिदमद्भुतम् ॥
अर्थशास्त्रमिदं दिव्यं धर्मशास्त्रमिदं महत् ।
कामशास्त्रमिदं प्रोक्तं व्यासेनामितबुद्धिना ॥

भोजेन कञ्चित्कविं प्रत्युक्तं—

भारतं चेक्षुदण्डं च समुद्रं चापि वर्णय ।
पादमेकं प्रदास्यामि पर्वपर्वरसाधिकम् ॥

भोजेन कवये लक्षरूप्यकाणि दत्तानि । कविनोक्तम्—

श्रीमद्भागवत-रसमाधुर्यस्यागाधं स्रोतोऽस्ति, 'विद्यावतां भागवते परीक्षा' इति च तथ्यवादो नार्थवादः । अस्य माहात्म्यानुसारं श्रीकृष्णस्य वैकुण्ठगमनस्य त्रिंशद्-वर्षाणां पश्चात् शुकदेवेनेयं भागवती कथा सप्तदिनपर्यन्तं परीक्षिताय राज्ञे श्राविता । अयं समयः २०८९ वर्षपूर्वं सिध्यति विक्रमार्कात् । वेदव्यासः चिरञ्जीव्यासीत्, द्वापरमारभ्य कलेर्द्वितीयशतकपर्यन्तं प्रत्यक्षरूपेण वर्तते स्म ।

भासः

नाटकस्यादिमः कर्ता भासः कविकुलाग्रणीः ।
स्वप्नवासवदत्तादिनाटकानि प्रणीतवान् ॥

कालिदासो मालविकाग्निमित्रनाटकस्य प्रस्तावनायां स्वसमये भासं प्रख्यातकीर्तिं लिखितवान् । भासेन '**यज्ञफल**'नाटके पाणिनीय-व्याकरणस्य व्याडेः संग्रहस्य च नाम स्पष्टतया लिखितं कौटिल्येन स्वकीयेऽर्थशास्त्रे भासस्य 'प्रतिज्ञा**यौगन्धरायण**'नाटकात् "नवं शरावं सलिलस्य पूर्णं" इत्यादि पद्यमविकलं गृहीतम् । अतो भासः कौटिल्यस्य किञ्चित्पूर्ववर्ती समकालिको वासीत् । भासस्य सर्वप्रथमं नाटकं श्रीकृष्णजीवनात्मकं '**बालचरितं**' मन्यते । कालिदासेन भासस्य पर्याप्तमनुकरणं कृतं शाकुन्तले—"**सेयं याति शकुन्तलापतिगृहं सर्वैरनुज्ञायताम्**" इति पद्यं "**सेयं शक्ररिपोरशोकवनिका भग्नेति विज्ञायताम्**" इति भासनाटकपद्यस्य स्पष्टमनुकरणं दृश्यते । शूद्रकस्य

मृच्छकटिकं तु भासकृत-'दरिद्रचारुदत्त'स्य संस्कृतसंस्करणमेव मन्यते सर्वैरपि। अतो भासः शूद्रकात् कालिदासाच्चावश्यं पूर्ववर्ती समयश्च विक्रमार्कात् शतत्रयवर्षं पूर्वमासीत् ।

शूद्रकः कालिदासश्च

शूद्रको विक्रमादित्यः शुङ्गोऽग्निमित्र एव हि ।
चकार मृच्छकटिकं वीणावासवदत्तकम् ॥५॥
मालविकाग्निमित्रं च अभिज्ञानशकुन्तलम् ।
तथा विक्रमोर्वशीयं कालिदासो विनिर्ममे ॥६॥

अग्निमित्रो ब्राह्मणसम्राट् पुष्यमित्रस्य पुत्र आसीत् स एव सम्राट् शूद्रकः। कविकालिदासश्च तस्य सभाकविरासीत् । अत्र लेशतोपि न सन्देहः, तथा हि महाराज-समुद्रगुप्तस्य **'कृष्णचरितेन'**—

पुरन्दरबलो विप्रः शूद्रकः शस्त्रशास्त्रवित् ।
वत्सरं चशकान् जित्वा प्रावर्तयत वैक्रमम् ॥
धनुर्वेदं चौरशास्त्रं रूपके द्वे तथाऽकरोत् ।
सविपक्षविजेताऽभूद् शास्त्रैः शस्त्रैश्च कीर्तये ॥

आत्मवर्णः (ब्राह्मणः) कविस्तस्य कालिदास इति श्रुतः ।
दुष्यन्तभूपतिकथां नाटके निबबन्ध यः ।
बुद्धिवीर्यवरेवास्य सौगजा न प्रसेहिरे ॥

अयं शूद्रकः क्षीरस्वामिकृतेऽमरकोशव्याख्याने स्पष्टीकृतः ।

······विक्रमादित्यः साहसाङ्कः शकान्तकः ।
शूद्रकस्त्वग्निमित्राख्यः हालः स्यात् सातवाहनः ॥

अयमग्निमित्रः शूद्रक उज्जयिन्याः पूर्वं विदिशायां राज्यं कृतवान् । बाणभट्टेन शूद्रको विदिशाया एव राजा लिखितः । (कादम्बरी प्रारम्भे ।) —अग्निमित्रशूद्रकस्य पुराणानुसारं द्वौ पुत्रावास्तां वसुमित्रः मित्रदेवश्च । अत्र पाठान्तरे 'देवमित्र' इत्यस्ति । पुराणेषु वसुमित्रस्य राज्यकालः केवलमष्टवर्षात्मकः पश्चात् स किमभूत् ? इति न ज्ञातमस्ति । महाराजसमुद्रगुप्तेनापि शूद्रकवर्णने—शूद्रकस्य देवमित्र एव पुत्रो लिखितः । तद्यथा—

उपवेश्य निजं पुत्रं देवमित्रं निजासने ।
वार्धके मुनिवृत्त्यैव नयन् कालं वनं ययौ ॥
सतां मतः सोऽश्वमेधं कृतवानुरुविक्रमः ।

इदं वर्णन मालविकाग्निमित्रेऽपि दृश्यते । एतत्कथनानुसारमनेनास्य पित्रा वांश्वमेधयज्ञोऽपि कृत इति तु प्रसिद्धमेव । स्कन्दपुराणेऽपि शूद्रकस्य वर्णनमस्ति ।

शूद्रको नाम वीराणामधिपः सिद्धिमाप यः ॥
त्रिषु वर्षसहस्रेषु (कलेर्यातिषु) विंशत्या चाधिकेषु च ।
भविष्यं विक्रमादित्य-राज्यं सोऽथ (?) लप्स्यते ॥

शूद्रकोग्निमित्रो विदिशात आसन्नचत्वारिंशद्वर्षवयस्क उज्जयिन्यामागत्य तत्र कियद्वर्षेभ्यो राज्यं कुर्वाणान् विदेशीयान् षोडाशादिशकान् मालवगणसाहाय्येन विजित्य तत्र राज्यं चकार 'मालव-संवत्'नाम्ना विक्रमसंवत्नाम्ना वा संवदेकं च प्रवर्तयामास शूद्रकनाम्ना च नाटकरूपं चकार मृच्छकटिकादि । बौद्धानामयं महान् शत्रुरासीदस्य पित्रा च पुष्यमित्रेण सहस्रं बौद्धमठाः प्रज्वालिता यस्य वर्णनं तिब्बत-वासिना तारानाथेन कृतम् । पुष्यमित्रकालिकेन महाभाष्यकारेणापि **"येषां शाश्वति-को विरोध'** इति सूत्रस्योदाहरणं "श्रमणब्राह्मणं" दत्तम्, श्रमणो बौद्धभिक्षुः । ब्राह्मणस्य अग्निमित्रस्य शूद्रक इति नाम शत्रुभिर्बौद्धैरेव धृतमित्यनुमिनोमि पुराणानां भविष्यवक्तृत्वान्न दोषः । बृहत्कथायां शूद्रकस्यायुः शतवर्षात्मकं लिखितं मृच्छकटिकेऽपि तदेव । **'त्रैलोक्यप्रज्ञप्तौ'** बौद्धग्रन्थेऽग्निमित्रस्य राज्यं षष्टिवर्षात्मकं लिखितं तदुज्जयिनीराज्यापेक्षया, पूर्वन्तु स विदिशायां राज्यं कृतवान् पश्चादुज्जयिन्याम् । शूद्रकः कविरासीत् । अग्निमित्रोऽपि **'गौडवहो'** प्राकृतकाव्ये कविरभिमतः,-'पुरन्दरबलो विप्र' इति समुद्रगुप्तलेखानुसारं शूद्रको ब्राह्मण आसीत्, अग्निमित्रोऽपि ब्राह्मण आसीत् । मालविकाग्निमित्रेऽन्तिमपद्ये **'सति नाग्निमित्रे'** इति पद्यांशः कालिदास-समयेऽग्निमित्रस्य सत्त्वं स्पष्टं वदति । किं बहुना प्रमाणशतेनापि शूद्रकः शुङ्गवंशीयो-ऽग्निमित्र एव सिध्यति स एव उज्जयिन्याः प्रथमो विक्रमादित्य आसीत् ।

भासादयोऽपि कवयो रसज्ञा नास्ति संशयः ।
कालिदासकवेस्तुल्या रसकुल्यावहा न ते ॥५॥
गाथाकोशं कलितवान् सातवाहनभूपतिः ।
महाकविर्गुणाढ्यश्च विचित्रार्थां बृहत्कथाम् ॥६॥

कुन्तलसातकर्णिसातवाहनराज्ञा गाथासप्तशती संकलिता यस्यां सर्वा गाथाः श्रृङ्गाररसेनोतप्रोताः सन्ति । अस्याः समाप्तौ लिखितम्—'इति श्रीमत्कुन्तलजनपदा-

न्तर्गतप्रतिष्ठानपत्तनाधीशसातकर्णोपनामक-दीपकर्णात्मज-मलयवती-प्राणप्रियकलाप्रवर्तकशर्ववर्मधीसख-कविवत्सल-हालाद्युपनामक-सातवाहननिर्मितो गाथाकोशोऽव्सानुमगात्। कामसूत्रे लिखितमस्ति 'कर्तर्या कुन्तलः' सातकर्णि-सातवाहनो महादेवीं 'मलयवतीं' जघान, अयमपि अयमेव सातवाहन आसीत्। अस्य पिता महेन्द्र-सातकर्णिः स च दीपकर्ण एव, अस्य सातवाहनस्य नाम चतुष्टयमन्यदप्यासीत्। विक्रम इति काल इति विषमशील इति हर्ष इति च विषमशीललम्बके मलयवती अस्यैव विषमशीलस्य धर्मपत्नी लिखिता।

कल्हणेनास्यैव वर्णनं राजतरङ्गिण्यां कृतम्—

तत्रानेहस्युज्जयिन्यां श्रीमान् हर्षापराभिधः।
एकच्छत्रश्चक्रवर्ती विक्रमादित्य इत्यभूत्॥

मातृगुप्ताय कवये काश्मीर-राज्यमनेनैव दत्तं यस्य वर्णनं सम्राट्समुद्रगुप्तेन कृतम्।

मातृगुप्तो जयति यः कविराजो न केवलम्।
काश्मीरराजोऽप्यभवत् सरस्वत्याः प्रसादतः॥

अस्य विक्रमादित्यस्य राज्यसमयः शूद्रकविक्रमादित्यस्य पश्चाद्, यतः शूद्रक-विक्रमादित्य-सभावर्तिना रामिलकविना '**मणिप्रभानाटक**' एवं लिखितम्—

हर्षक्षोणिपतेश्च हर्षमतुलं दृष्ट्वैव येऽस्तानिषु-
र्धीरांस्तान् गुरुशङ्करेन्द्रयमिनश्चित्ते स्मरन् रामिलः॥

भर्तृमेण्ठस्यापि गुरुरयमेव स्वामी शङ्करेन्द्र आसीत्। यदुक्तं तेन '**हयग्रीववध**'-काव्ये—

ख्यातः श्रीशङ्करेन्द्रप्रचुरतरकृपालब्धसाहित्यविद्यः,
सद्यः साधूक्तिसंमोद्यपि परकविता-मर्षिणो मातृगुप्तात्॥

कैश्चिदितिहासानभिज्ञैः 'हर्ष' इति स्कन्दगुप्तस्य नाम मन्यते तत् सर्वथाऽपि निरर्गलं—'हर्षमातृगुप्त, योर्वर्णनं स्कन्दगुप्तस्य प्रपितामहेन समुद्रगुप्तेनापि कृतं क्वचिदपि शिलालेखे स्कन्दगुप्तस्य तु हर्षनाम न दृष्टं च, बृहत्कथाकारो गुणाढ्यो बृहत्कथां निर्मायास्मै राज्ञे सातवाहनाय समर्पितवान्। 'वेतालपच्चीसी-'सिंहासनबत्तीसी' चास्मिन्नेव सातवाहन-विक्रमादित्ये आधारिते स्तः, कथासरित्सागरकारेण अयं विषमशीललम्बके महेन्द्रादित्यपुत्रो लिखितः, महेन्द्रादित्य इति उपाधिस्तु कुमारगुप्तस्यासीन्नामधेयम्। महेन्द्रसातकर्णिः शैवः, कुमारगुप्तस्तु वैष्णवः, महेन्द्रादित्यस्य स्त्री अनन्तदेवी महेन्द्र-

सातकर्णेः स्त्री सौम्यदर्शना आसीत् । विषमशील-सातवाहनस्यैव-विक्रमादित्यस्य कुले महान् वीरः गोतमीपुत्र आसीत् । अस्यापि द्वितीयं नाम 'हाल' इति 'शालिवाहन' इति वा बभूव, अयं रामकृष्ण-भीमार्जुन-तुल्य-पराक्रम आसीत् ।

शूद्रकविक्रमस्य पश्चादुज्जयिन्यां महेन्द्रसातकर्णेरधिकारोऽभवत् तस्य पुत्रो विषमशीलसातवाहनविक्रमः प्रतिष्ठाने राज्यं करोति, स्म । गुणाढ्यशर्ववर्मादयोऽस्यैव सभायामासन्, बहुकालात् पश्चाद् उज्जयिन्यामागत्य 'कड़फिसिजद्वितीयः' स्वाधिकारं कृतवान् १३५ विक्रमाब्दे द्वितीयशालिवाहनं गोतमीपुत्रेण प्रतिष्ठानादागत्य ससेनः कणफिसिज्द्वितीयः युद्धे पराजितः अस्य वर्णन प्रसिद्धैतिहासिकोऽल्बेरुनी लिखति— **'शकाब्द विक्रमसंवत् से १३५ वर्ष बाद चला । बाहर से आकर विक्रमादित्य ने मुल्तान के पास कच्छ प्रदेश में इस शक को हराया, यही शकनाश का अब्द ज्योतिषियों द्वारा प्रयोग में लाया जाता है । यह विक्रम संवत् वाले विक्रमादित्य से कोई दूसरा विक्रमादित्य था ।'**

उज्जयिन्यामागत्य चष्टनः शकः स्वाधिकारं कृतवान्, पुनः गोतमीपुत्रेणागत्य चष्टनः पराजितः स्वयमुज्जयिन्यां राज्यं कृतवान् । गोतमीपुत्रस्य पुत्रो वाशिष्ठीपुत्रः १८६ विक्रमाब्दे प्रतिष्ठाने राज्यं कुर्वन्नासीत्, अस्य शिलालेखे गोतमीपुत्रस्य वर्णन **"राजराजस्य ब्राह्मणश्रेष्ठस्य शकयवन-पह्लवनिषूदनस्य नेहपानवंशनिरवशेषकरस्य, सातवाहनकुलयशः प्रतिष्ठापनकरस्य, रामकृष्णभीमार्जुन-समबलस्य त्रिःसमुद्रपीत-तोयवाहनस्य आगमनिलयस्य धर्मसेतोरित्यादि"** एकस्मिन् शिलालेखे लिखितम्—१४६ विक्रमशके गोतमीपुत्रेण नहपानशको हतः । जैनः पं० भद्रबाहुनाऽपि लिखितम्—

"भरुकच्छपुरेऽत्रासीद् भूपतिर्नरवाहनः (नहपानः) ।
तं जघान प्रतिष्ठाननृपतिः शालिवाहनः ।।"

गोतमीपुत्रः गुणकर्मानुसारं द्वितीयशूद्रकः कथ्यते स्म । **'अवन्तिकथासारे "इन्द्राणीगुप्त इत्यासीद् यमाहुः शूद्रकं बुधाः"** इत्युक्तम् । इन्द्राणीगुप्त इत्यस्य जन्म-नाम । **'पद्मप्राभृत'भाणो**ऽस्यैव कृतिः । 'हालेनोत्तमपूजया कविवृषः श्रीपालितो लालितः' । अयं श्रीपालितोऽस्य सचिवः विष्णुपालितो भवेत् ! पद्मप्राभृतेऽस्य पुत्र-वाशिष्ठीपुत्रस्य, धूर्तमूलदेवस्य कातन्त्रव्याकरणस्य प्रचारो लिखितः । मृच्छ-कटिके रुद्रो **रुद्रदामा १०५० ई०** सन्नविवक्षितः । एषाऽपि न शिवः । ज्योतिर्विदाभरणे कालिदासेन ।

येनास्मिन् वसुधातले शकगणान् सर्वा दिशः सङ्गरे,
हत्वा पञ्च नवा पुमान् कलियुगे शाकप्रवृत्तिः कृता ।

योरूपदेशाधिपतिं शकेश्वरं[1] जित्वा गृहीत्वोज्जयिनीं महाहवे ।
आनीय सम्भ्राम्य मुमोच तं त्वहो स विक्रमार्कः समसह्यविक्रमः ।।
रूसदेश ऐतिहासिकैः सिन्धदेशो मतः ।
श्रूयते कड़फिसिजद्वितीयः तत्रत्य एवासीत् ।।

इमौ श्लोकौ ज्योतिर्विदाभरणकारेण विक्रमशाकप्रवर्तकशूद्रकविक्रममभिप्रेत्य लिखितौ अथवा (शालिवाहन)शाकप्रवर्तक-गोतमीपुत्रमभिप्रेत्य ? शाकशब्दः संवद्वाचकोऽस्ति न शालिवाहनशाकस्यैव इयं भ्रान्तिः सर्वप्रथमं आर्यभटलेखाज्जाता, ज्योतिर्विदाभरणकारेणापि स्वसमयः 'शाकः शराम्भोधियुगः' ४४५ लिखितः । अयं शूद्रकशाकः (विक्रमशाकः) मन्यताम्, ज्योतिर्विदाभरणकारेण स्वयं लिखितं **'मत्तोधुना कृतिरियं सति मालवेन्द्रे श्रीविक्रमार्कनृपराजवरे समासीत् ।'** अयं मालवेन्द्रश्चन्द्रगुप्तद्वितीयविक्रम आसीद् यस्य मृत्युः ४७० विक्रमाब्दे बभूव, वराहमिहिरस्यापि पञ्चसिद्धान्तिकास्थः 'सप्ताश्विवेदसंख्या ४२७' विक्रमशाक एव मन्यताम्, इयं तस्य सर्वप्रथमा कृतिः । केचिद् इमं कालिदासं यशोधर्मसभ्यं मन्वते तदसत्, तस्य शिलालेखसमयः ५८६ मालवशाकः स च विक्रमादित्योऽपि न सिध्यति, **अथ जयति जनेन्द्रः श्रीयशोधर्मनाम।'** अग्रे **'श्रीविष्णुवर्धन-नराधिपतिः स एव''** अत्र पाठान्तरं **'श्रीविष्णुधर्म इति प्रथिताभिधानः ।''** अयं मातृविष्णोरनुगो धर्मविष्णुर्विष्णुधर्म इति नामक आसीत् । स किञ्चित्कालपर्यन्तं महान् सम्राड् अभूत् । अस्य पश्चात् देवगुप्तापरनामा शिलादित्यः प्रथमो मालवनरेशो बभूव श्रीधरसेनस्य पुत्र आसीत् ।

अश्वघोषः

अश्वघोष इति ख्यातः शूरः कविकुलाग्रणीः ।
सौनन्द-बुद्धचरिते महाकाव्ये प्रणीतवान् ।।

अयमश्वघोषोऽयोध्यानिवासी बौद्धकविः ब्राह्मणजातीय आसीत् । अत एवानेन स्वकाव्ये संस्कृतभाषायां निर्मिते गान्धार(पेशावर)स्य प्रसिद्धराज्ञः कनिष्कस्य सभापण्डितो बभूव । प्रसिद्धसिद्धनागार्जुनोऽस्यैव शिष्य आसीत् । अस्य स्थितिसमयः २२० विक्रमाब्द आसीत् ।

हरिषेण-कालिदासः

कुमारसम्भवं मेघदूतञ्च रघुवंशकम् ।
कृत्वा विस्तारयामास कालिदासो निजं यशः ।

---

१. कड़फिसिजद्वितीयम् ।

'अस्ति कश्चिद् वाग्विशेष' इत्याभाणकानुसारं कुमारसम्भवादि-काव्यत्रयं द्वितीयकालिदासापरनाम्ना महाकविहरिषेणेन विहितम्। ४६४ विक्रमाब्दस्य समुद्रगुप्तप्रशंसा-विषयको लेखोऽस्यैव हरिषेणकालिदासस्य वर्तते। अयं कविः दीर्घजीव्यासीत्। अयं चन्द्रगुप्तद्वितीयविक्रमादित्यस्य सभाकविः सचिवश्चासीत्। चन्द्रगुप्तेन ३४० विक्रमाब्दे रुद्रसेनं पराजित्य उज्जयिनी स्वराजधानी कृता विक्रमादित्यपदवी च धृता। समुद्रगुप्तः ४४२ विक्रमाब्दे मृतः चन्द्रगुप्तद्वितीयस्य राज्यं ४७० विक्रमाब्द-पर्यन्तमासीत्, सम्राट्समुद्रगुप्तेनास्य द्वितीयकालिदासस्य सम्बन्धे लिखितम् —

हरिषेणकविर्वाग्मी शास्त्रशस्त्रविचक्षणः।
यशोऽलभत काव्यैः स्वैर्नानाचरितशोभनैः॥

किञ्च— काव्येन सोऽथ रथकार इति प्रसिद्धः।
यः कालिदास इति लब्धमहार्हनामा॥

एषु काव्येष्वनेन व्यञ्जनावृत्त्या गुप्तानां वर्णनं कृतमिति सर्वैर्मन्यते। तद्यथा—

रघुवंशे-रघुदिग्विजयोऽक्षरशः समुद्रगुप्तविजयः, इन्द्रमतीस्वयंवरे मगधनरेशस्य "ज्योतिष्मती चन्द्रमसैव रात्रिः" इति द्वितीयचन्द्रगुप्तस्य, कुमारसम्भव इति काव्यस्य नाम कुमारगुप्तस्यैव सम्भवः। हरिषेणकालिदासस्य विवाहश्चन्द्रगुप्तविक्रमस्य पुत्र्याः 'प्रियङ्गु' इत्यपरनाम्न्या विद्योत्तमया सहाभूदिति प्रसिध्यत्येव। चन्द्रगुप्तविक्रमेण स्वराज्ये संस्कृतभाषा राष्ट्रभाषा कृता, न केवलम् इदमेव 'अन्तःपुरस्यापि भाषा संस्कृतमेव कृतासीत्।' भोजेन सरस्वतीकण्ठाभरणेऽस्य समर्थनं कृतम्—के न सातवाहनस्य काले प्राकृतभाषिणः (के न श्रीसाहसाङ्कस्य काले संस्कृतभाषिणः। साहसाङ्को विक्रमादित्यः)।

सुधास्यन्दिगिरोऽभूवन् बहुशः कवयो भुवि।
कालिदासस्य भाग्ये या कीर्तिः साऽन्यस्य नैव हि॥

सुबन्धु-बाणौ

सुबन्धुकविना वासवदत्ताख्यायिका कृता।
बाणः कादम्बरीं चक्रे तथा हर्षचरित्रकम्॥ ६॥

सुबन्धुः स्वकाव्यद्वारा गद्यस्य मार्गप्रदर्शनं कृतवान्। चन्द्रगुप्तविक्रमस्य सभा-कवि-वररुचेः सुबन्धुर्भगिनीपुत्र आसीत्। अनेन स्वपद्यद्वारा चन्द्रगुप्तविक्रमस्य मरण-शोकः प्रदर्शितः। तद्यथा—

सा रसवत्ता विहता नवका विलसन्ति चरति नो कंकः ।
सरसीव कीर्तिशेषं गतवति भुवि विक्रमादित्ये ॥

चन्द्रगुप्तविक्रमस्य मृत्युः ४७० विक्रमाब्दे बभूव । बाणभट्टेन वासवदत्ता प्रशंसिता । यथा—"कवीनामगलद्दर्पो नूनं वासवदत्तया" । अतोऽयं बाणस्य किञ्चित्पूर्ववर्त्ती समकालिको वा सुबन्धुः । बाणेन 'स्थाण्वीश्वर-थानेश्वर'नगरराज्ञः नागानन्दादिनाटककर्तुः श्रीहर्षस्य स्वीये ६७७ विक्रमाब्दे वर्णनं कृतम् । अतः बाणस्य समयः सप्तशतकान्तभागपर्यन्तो मन्यते सर्वैरपि । श्रूयते हर्षदेवः ७०७ विक्रमाब्दे ममार । तस्य कादम्बरी एवं प्रशस्यते—"**कादम्बरीरसज्ञानामाहारोपि न रोचते ।**"

दण्डी

विश्वविख्यातलालित्यः कविर्दण्डी प्रणीतवान् ।
अवन्तीसुन्दरीगाथां तथा दशकुमारकम् ॥ १० ॥

८३५ ईशवीयकविराजमार्गे काव्यादर्शस्य भूयसी छाया । अतो दण्डी नूनं अष्टम शतकीयो बाणाच्चोत्तरकालिकः । काञ्चीवास्तव्यः—

दण्डयाचार्यस्य वचनं चन्दनं मलयस्य च ।
सरसं हृदि विन्यस्य कस्य चेतो न तृप्यति ॥११॥

भट्टिः

राज्ञः श्रीधरसेनस्य वलभ्याश्च प्रशंसकः ।
भर्तृहरिर्महाविद्वान् भट्टिकाव्यं प्रणीतवान् ॥१२॥

अयं भट्टिकविर्द्वितीयो भर्तृहरिर्मन्यते । इत्सिङ्गेन वर्णितोऽयमेव भर्तृहरिर्भवेत्, यतस्तेन महावैय्याकरणस्य तस्य मृत्युः ६५० ई० ७०७ विक्रमाब्दे लिखितः ।

अष्टाध्यायी जगन्माताऽमरकोशो जगत्पिता ।
सुबन्धुर्भट्टिकाव्यं च त्रयोऽप्येकैकतोऽधिकाः ॥

भट्टनारायण-भवभूती

भट्टनारायणश्चक्रे वेणीसंहारनाटकम् ।
उत्तररामचरितं भवभूतिर्महाकविः ॥

भट्टनारायणो दण्डिसमकालिको यतस्तस्यावन्तिसुन्दरीकथायां नारायणस्य नाम लभ्यते। अयं बङ्गदेशराज्ञ आदिशूरस्य सभाकविरासीत्। तस्य समयः ७२८ विक्रमाब्दोऽस्ति। भवभूतिः कन्नौजराज्ञो यशोवर्मणः सभाकविरासीत्, यस्य समयोऽष्टमशतकम्।

भवभूतिकवेर्वाणी प्रमाणीक्रियते समम्।
कालिदासगिरा किन्तु करुणे त विशिष्यते॥

भारविर्माघश्च

कविभारविणा चक्रे श्रीकिरातार्जुनीयकम्।
शिशुपालवधं काव्यं चक्रे माघमहाकविः॥१४॥

महाकविर्भारविः अवन्तिसुन्दरीकथानुसारं चालुक्यपुलकेशिद्वितीयस्य भ्रातुर्विष्णुवर्धनराज्ञः सभाकविरासीत्। विष्णुवर्धनस्य राज्यत्वकालः ६७२ विक्रमाब्दपर्यन्तमासीत्। ६९१ विक्रमाब्दस्य एहोलशिलालेखे "कविताश्रितकालिदासभारविकीर्तिः ?" इत्येवं कालिदासेन साकं भारवेर्नाम लिखितमस्ति, अतो भारविः ६७२ समये वर्तते स्म। 'प्रसन्नगम्भीरपदा सरस्वती' सर्वेभ्यो विशिष्टो गुणो भारवेः। भारवेः पद्यानि ७५० विक्रमाब्दस्य काशिकायामुद्धृतानि सन्ति। गुर्जरप्रान्तस्य भिन्नमालग्रामनिवासिनोमहाकवि माघस्य समयोऽष्टमशतकस्यान्तिमो भागः। कन्नडीभाषायाः ८७१ विक्रमाब्दे निर्मिते कविराजग्रन्थे माघस्य नाम वर्तते। अस्य काव्यस्याधारशिला श्रीमद्भागवतग्रन्थः। माघेन भारवेः पर्याप्तमनुकरणं कृतम्।

कालिदासादिकाव्येषु शतेषु खलु सत्स्वपि।
उपमादित्रयोपेतं माघकाव्यं महाद्भुतम्॥

विशाखदत्त-मुरारी

विशाखदत्तः कृतवान् मुद्राराक्षसनाटकम्।
महाकविर्मुरारिश्चानर्घराघवनाटकम्॥१५॥

विशाखदत्तो महान् राजनीतिज्ञः कविरासीत्, मुद्राराक्षसस्य बहूनि पद्यानि भोजस्य सरस्वतीकण्ठाभरणे उद्धृतानि। विशाखदत्तस्य समयो नवमशतकम्। मुरारेरनर्घराघवे किञ्चित्काव्यत्वं किञ्चिन्नाटकत्वम्, अतः प्रसिद्धमस्ति 'मुरारेस्तृतीयः पन्थाः'। इदमपि प्रसिध्यति—

'मुरारिपदचिन्तायां भवभूतेस्तु का कथा'। मुरारिर्नवमशतके आसीत्। मुरारेः इदं नाटकं वीराद्भुतरसाभ्यामोतप्रोतमस्ति।

रत्नाकर-धनञ्जयौ

रत्नाकरो रचितवान् हरस्य विजयं महत्।
रामायणभारतयोर्द्विसन्धानं धनञ्जयः॥१६॥

रत्नाकरः काश्मीरमहाराजस्य अवन्तिवर्मणः सभाकविरासीत्। यथोक्तं राजतरङ्गिण्यां 'प्रथां रत्नाकरश्चागात्साम्राज्येऽवन्तिवर्मणः।' रत्नाकरेण मुरारेः निर्देशः कृतः, अतश्चायं मुरारितः पश्चात्कालीनः। हरविजये पञ्चाशत्सर्गाः सन्ति। अस्य समयो विक्रमस्य दशमशतकम्। द्विसन्धानकाव्येऽष्टादशसर्गात्मके रामायण-भारतयोः सम्मिलितं वर्णनमस्ति। अतएव चमत्कार-विशिष्टं काव्यमिदम्। अस्यापि निर्माणसमयो दशमशतकमेवास्ति।

शङ्खधर-राजशेखरौ

हास्यपूर्णं शङ्खधरश्चक्रे लटकमेलकम्।
बालरामायणं बालभारतं राजशेखरः॥१७॥

'गुरोर्गिरः पञ्चदिनान्यधीत्य' इदं पद्यं लटकमेलकस्यैवास्ति। राजशेखरः कन्नौजराज्ञो बापारावलपुत्रमहेन्द्रपालस्य सभाकविरासीत्। समयोऽस्य नवमशतकम्।

पद्मगुप्त-विह्लणौ

पद्मगुप्तः परिमलः साहसाङ्कचरित्रकम्।
विह्लणः कृतवान् काव्यं, विक्रमाङ्कचरित्रकम्॥

महाराजभोजस्य पितुर्नवसाहसाङ्कस्य चरित्रवर्णनात्मकं काव्यमिदम्। अत्र परिमलेन वैदर्भरीतेः पराकाष्ठा प्रदर्शिता। पद्मगुप्तो नवसाहसाङ्कस्यैव सभाकविरासीत्। समयोऽस्य विक्रमस्य दशमशतकम्। अनेन नवसाहसाङ्कस्य ज्येष्ठभ्रातुर्मुञ्जस्यापि महती प्रशंसा कृता।

गते मुञ्जे यशःपुञ्जे निराधारा सरस्वती।
भ्रम्यते यत्र तत्रैव तावत् सहृदयालिभिः॥
पद्मगुप्तः परिमलो यावत्खलु न लभ्यते।

विल्हणः काश्मीरेषु प्रसिद्धः कविरासीत् । अनेनात्र काव्ये चालुक्यषष्ठविक्रमादित्यस्य चमत्कारपूर्णवर्णनं कृतम् । विल्हणेन स्वस्य चोरनाम्ना 'चोरपञ्चाशिका' कृता । महाकविर्विल्हणो हि चोरनाम्ना प्रसिध्यति । 'यत्तस्य कवितादेवी कविचित्तमचूचुरत्' । अनेन लिखितम् "सहोदराः कुङ्कुमकेसराणां, भवन्ति नूनं कविताविलासाः' ।' विल्हणस्य समय एकादशशतकम् ।

सोमदेव-कल्हणौ

> कथासरित्सागरं श्रीसोमदेवः प्रणीतवान् ।
> कल्हणश्चेतिहासज्ञस्तथा राजतरङ्गिणीम् ॥१६॥

काश्मीरिकनृपानन्तदेवीधर्मपत्नीसूर्यवती-मनोविनोदाय सोमदेवेन कथासरित्सागरो लिखितः । अस्याधारएव गुणाढ्यस्य बृहत्कथासीत् । सागरस्य कविता-माधुर्यमनुपममस्ति निर्माणसमयश्च ११२० विक्रमाब्दोऽस्ति, राजतरङ्गिणी-निर्माणसमयः १२०७ विक्रमाब्दः । अनेन लिखितम्—

> कोऽन्यः कालमतिक्रान्तं नेतुं प्रत्यक्षतां क्षमः ।
> कविप्रजापतिं त्यक्त्वा रम्यनिर्माणशालिनम् ॥

क्षेमेन्द्र-श्रीहर्षौ

> दशावतारचरितं क्षेमेन्द्रकविरातनोत् ।
> श्रीहर्षः काव्यमकरोत् नैषधं विद्वदौषधम् ॥२०॥

क्षेमेन्द्रेण भगवतो दशावताराणां चरित्रं वर्णितम् । क्षेमेन्द्रो रामायण-भारत-बृहत्कथा-मञ्जरीर्लिखितवान् । अयमभिनवगुप्तशिष्य आसीत् काश्मीरिकश्च । दशावतारस्य निर्माण-समयः ११२३ वर्तते । कवितार्किकः श्रीहर्षः कान्यकुब्जदेशाधिपतेर्विनयचन्द्रस्य सभापण्डित आसीत् । विनयचन्द्रो गोविन्दराज्ञः पुत्र आसीत् । यदुक्तमनेन "गोविन्दनन्दनतया च वपुःश्रिया च मास्मिन्नृपे कुरुत कामधियं तरुण्यः" स्वसम्बन्धे "ताम्बूलद्वयमासनं च लभते यः कान्यकुब्जेश्वरात् । तथा-'काव्ये षु कोमलधियो वयमेव नान्ये तर्केषु कर्कशधियो वयमेव नान्ये ।" अस्य समयो द्वादशशतकम् । काव्यविषये-'उदिते नैषधे काव्ये क्व माघः क्व च भारविः ।' इति प्रसिद्धैवोक्तिः ।

कृष्ण-जयदेवौ—

> कृष्णः प्रबोधचन्द्रोदयं नाटकमातनोत् ।
> प्रसन्नराघवं चैव जयदेवस्तु नाटकम् ॥२१॥

कृष्णः चन्देलराज्ञः कीर्तिवर्मणः सभाकविरासीत्। यस्य समयः ११५६ विक्रमाब्दः।

'यदि वः परमानन्दे काव्यानन्देन वासना।
तदा विधीयतां प्रीतिः कृष्णमिश्रकृतिं प्रति ।।

जयदेव-कविराजौ

गीतगोविन्दमकरोज्जयदेवमहाकविः।
राघवपाण्डवीयं च कविराजो विलक्षणम् ।।२२।।

अमरकविर्जयदेवः बङ्गराज्ञो लक्ष्मणसेनस्य सभाकविरासीत्। यदुक्तम्—

गोवर्धनश्च शरणो जयदेव उमापतिः।
कविराजश्च रत्नानि समितौ लक्ष्मणस्य च ।।

तत्र गोवर्धन आर्यासप्तशतीकारः। शरणेन दुर्घटवृत्तौ स्वसमयः स्वयं लिखितः—

"**शाकमहीपतिवत्सरमाने एकनभोनवपञ्चविधाने।**"
तदनुसारं १२२९ विक्र-माब्दे जयदेवस्याप्ययमेव समयः। हरिहरेणोक्तम्—

जयदेवकवेः श्रुत्वा गोविन्दानन्दिनीर्गिरः।
बालिशाः कालिदासाय स्पृहयन्तु वयन्तु न ।।

कविराजो धोयी राघवपाण्डवीयकाव्यं चकार। कविराज आसामदेशस्य जयन्तीपुरग्रामनिवास्यासीत्। गीतगोविन्देऽस्य प्रशंसा श्रूयते—"**श्रुतिधरो धोयी कविक्ष्मापतिः**"। अस्यापि पूर्वोक्त एव समयः।

जयानक-वेदान्तदेशिकौ —

पृथिवीराजविजयं जयानकमहाकविः।
यादवाभ्युदयं चक्रे कविर्वेदान्तदेशिकः ।।२३।।

अस्मिन् महाकाव्येऽन्तिमहिन्दुसम्राजो दिल्लीश्वरस्य पृथिवीराजस्य वर्णनमस्ति। यस्य समयो द्वादशशतकम्। कवितार्किकवेङ्कटस्य समयः विक्रमस्य द्वादशशतकम्, अस्य काव्यस्योपरि महाविदुषोऽप्पयदीक्षितस्य टीका वर्तते। इदं महत्कठिनं काव्यमस्ति। अत्र यादववंशस्य वर्णनम्।

हनकालिकः। धूर्त्तमूलदेवस्याप्यत्र नामास्ति। षष्ठशतकीयेन सुबन्धुकविनाऽस्य स्मरणं कृतम्, अतः षष्ठशतकात् पूर्वं १३५ विक्रमाब्दात् पश्चादस्य कालः। सम्भवतोऽयं नागवंशी भवेत्। नागवंशकालः विक्रमस्य तृतीयं शतकम्।

कामानन्दो महानेव ब्रह्मानन्दात्प्रतीयते।
सुख्येको ब्रह्मवित् किन्तु सुखिनौ कामिनावुभौ ॥३॥

भामह-दण्डिनौ

काव्यालङ्कारमकरोत् ग्रन्थमाचार्यभामहः।
काव्यादर्शो विरचितः कविना दण्डिनाद्भुतः ॥४॥

भामहेन षष्ठशतकवर्ति-दिङ्नाग-बौद्धपण्डितस्य प्रत्यक्षलक्षणं स्वग्रन्थे दत्त-मतोऽस्य समयः षष्ठशतकोत्तरभागः प्रतीयते। अस्यायं ग्रन्थोऽलङ्कारग्रन्थेषु सर्वप्रथ-मोऽस्ति। भट्टिकविना सर्वेऽप्यलङ्कारा अस्मादेवोद्धृताः। कालिदासस्य मेघदूतग्रन्थ-स्यानेन स्पष्टमनुकरणं कृतम्। अतोऽप्ययं षष्ठशतकस्योत्तरभागवर्ती। काव्यालङ्कारे षट् परिच्छेदाः ४०० श्लोकाश्च सन्ति। दण्डिना काव्यादर्शे भामहस्य खण्डनं कृतमतो दण्डी तत्पश्चाद्वर्ती। अत्र परिच्छेदचतुष्टयम् ७६० श्लोकाश्च सन्ति।

"आलङ्कारिक इत्याख्या भामहाद् भामविन्दत।
तस्या द्विवचनं जातं जाते दण्डिनि पण्डिते ॥

दण्डिनः समयः विक्रमस्य सप्तमशतकम्।

उद्भट-वामनौ —

विद्वान् भट्टोद्भटश्चक्रे काव्यालङ्कारसङ्ग्रहम्।
काव्यालङ्कारसूत्राणि वामनेन कृतानि वै ॥

भट्टोद्भटः काश्मीरराज्ञो जयापीडस्य सभापण्डित आसीत्। वामनश्च मन्त्री। यदुक्तं राजतरङ्गिण्याम् —

विद्वान् दीनारलक्षेण प्रत्यहं कृतवेतनः।
भट्टोऽभूदुद्भटस्तस्य भूमिभर्तुः सभापतिः।
बभूवुर्भूरिकवयो वामनाद्याश्च मन्त्रिणः ॥

उभयोरपि स्थितिसमयो विक्रमस्याष्टमशतकम्, उद्भटोऽलङ्कारसम्प्रदायस्य वामनश्च रीतिसम्प्रदायस्य प्रवर्तकावास्ताम्।

रुद्रटः —

शतानन्दपराख्येन रुद्रटेन मनीषिणा ।
काव्यालङ्कार आतेने भट्टवामुक-सूनुना ॥६॥

अयमपि काश्मीरिकपण्डित एवासीत् । अस्य समयो विक्रमस्य दशमशतकम् ।

आनन्दवर्धनोऽभिनवगुप्तश्च —

ध्वन्यालोकं रचितवान् श्रीमदानन्दवर्धनः ।
चक्रेऽभिनवगुप्तो हि ध्वन्यालोकस्य लोचनम् ॥७॥

ध्वन्यालोको ध्वनिमार्गस्य सर्वप्रिथमोग्रन्थः । अयमानन्दवर्धनोऽपि जयापीडस्यैव राज्ञः सभाकविरासीत् । अभिनवगुप्तश्च काश्मीरिक-महाशैवपण्डितः सम्भवतो मम्मटस्य गुरुरासीत् स्थितिसमयश्च एकादशशतकम् ।

कुन्तकोमहिमभट्टश्च —

वक्रोक्तिजीवितं चक्रे कुन्तको नाम पण्डितः ।
तथा व्यक्तिविवेकं श्रीमहिमा महिमान्वितः ॥८॥

वक्रोक्तिजीवितकारः काश्मीरिक-विद्वानासीत् । अस्य ग्रन्थे राजशेखरस्य पञ्चाभ्युद्धरणान्युद्धृतानि । अतोऽयं राजशेखरात् पश्चाद्वर्त्ती । अत्र ग्रन्थे चत्वार उन्मेषाः सन्ति तेषु वक्रोक्त्यलङ्कारस्य साङ्गोपाङ्गं वर्णनमस्ति । विबुधरत्नावल्यामुक्तं 'भात्यलङ्कारयुक्तापि वक्रोक्तिरहिता न गीः । काश्मीरिकपण्डित-वक्रोक्तिकारेणानेन वक्रोक्तावेव आनन्दवर्धनोक्तध्वनेरन्तर्भावः कृतः । अस्य समयो दशमशतकम् । काश्मीरिक-महिमभट्टो न केवलमालङ्कारिको महानैय्यायिकोऽप्यासीत् । अनेन ध्वन्यालोकलोचनस्य वक्रोक्तिकारस्य च पाण्डित्यपूर्णं खण्डनं कृतम् । अनेनोक्तं —

अनुमानेऽन्तर्भावं सर्वस्यैव ध्वनेः प्रकाशयितुम् ।
व्यक्तिविवेक कुरुते प्रणम्य महिमा परां वाचम् ॥

अन्तर्भावप्रकारः —

अर्थान्तराभिव्यक्तौ या सामग्री सनिबन्धनम् ।
सैवानुमितिः पक्षे नो गमकत्वेन सम्मता ॥

खाद्यखण्डनकारेणापि महिमभट्टस्य महती प्रशंसा कृता ।

तद्यथा—दोषं व्यक्तिविवेकेऽमुं कविलोकविलोचने ।
काव्यमीमांसिषु प्राप्त-महिमा महिमादृतः ॥

महिमभट्टस्य समयः १०५० विक्रमाब्दोऽस्ति ।

धनञ्जय-धनिकौ —

दशरूपकमातेने ग्रन्थरत्नं धनञ्जयः ।
धनिको दशरूपस्यालोकंव्याख्यानकं तथा ॥८॥

धनञ्जयः स्वकथनानुसारं धारानाथस्य मुञ्जस्य राज्ञः सभापण्डित आसीत् ।

तद्यथा—**विष्णोः सुतेनाथ धनञ्जयेन विद्वन्मनोरागनिबन्धहेतुः ।**
आविष्कृतं मुञ्जमहीशगोष्ठीवैदग्ध्यभाजा दशरूपमेतत् ॥

मुञ्जस्य निश्चितसमयः सुभाषितरत्नसन्दोहानुसारं १०५० विक्रमाब्दपर्यन्त-मासीत् ।

भोजो मम्मटश्च —

भोजः सरस्वतीकण्ठाभरणं कृतवान् नृपः ।
काव्यप्रकाशं साहित्यनिर्यासं भट्टमम्मटः ॥९॥

मुञ्जराज्ञो भ्रातुस्पुत्रेण धारानरेशभोजराजेन सरस्वतीकण्ठाभरणनामको ग्रन्थो व्यरचि । भोजस्य दानपत्रं १०७८ विक्रमाब्दस्य मिलति । तदुत्तराधिकारिणो जयसिंहस्य ११०७ विक्रमाब्दस्य शिलालेखो लभ्यते । एतस्माद् ज्ञायते ११०६ विक्रमाब्दस्य पश्चाद् भोजस्य शासनं नासीत् । भट्टमम्मटकृतस्य काव्यप्रकाशस्य साहित्यशास्त्रे सैव प्रतिष्ठा वर्तते या व्याकरणशास्त्रे महाभाष्यस्य । अत्र ग्रन्थे ध्वनिप्रस्थापनं तद्विरोधिनां खण्डनं चानुपमं वर्तते । काव्यप्रकाशे भोजस्य दानप्रशंसाया एकं पद्यमुदाहृतमस्ति अतः काव्यप्रकाशकारो भोजादर्वाचीन इति निश्चीयते । काव्यप्रकाशस्य सङ्केत टीकसनिर्माणसमयः १२१६ विक्रमाब्दः । अतः काव्यप्रकाश-निर्माणसमय एकादशशतकम् । काव्यप्रकाशोपरि अनेकाः टीका सन्ति तासु वामनाचार्य—कृता टीका सर्वश्रेष्ठा ।

साहित्यवाग्दैवतस्य मम्मटस्य कृतिर्विदाम् ।
आह्लादयति चेतांसि कुमुदानीव चन्द्रिका ॥१०॥

रुय्यक-विद्याधरौ —

चक्रेऽलङ्कारसर्वस्वं रुय्यकः कविनायकः ।
एकावलीमलङ्कार-ग्रन्थं विद्याधरोऽकरोत् ॥११॥

काश्मीरकराजानकरुय्यकेणालङ्कारसर्वस्वे काव्यप्रकाशस्य खण्डनं कृतमतः स मम्मटस्य पश्चाद्वर्ती। विद्याधरेण कलिङ्गदेशीयपण्डितेन १३१७ विक्रमाब्दे वर्तमानस्य कलिङ्गराजस्य नरसिंहभूपस्यैकावल्यां वर्णनं कृतम्। यदुक्तमत्र तेन —

"करोमि नरसिंहस्य चाटुश्लोकानुदाहरन्। इति।

विद्यानाथः —

साहित्यविद्यानाथेन विद्यानाथेन धीमता।
कृता प्रतापरुद्रीयकृतिः कृतिविभूषणम्॥१२॥

आन्ध्रदेशराज्ञः प्रतापरुद्रस्य समयः १३७७ विक्रमाब्दपर्यन्तोऽयमेव विद्यानाथः।

पीयूषवर्ष-विश्वनाथौ —

पीयूषवर्षः कृतवान् चन्द्रालोकं मनोहरम्।
साहित्यदर्पणं चैव विश्वनाथः कवीश्वरः॥

पीयूषवर्ष-जयदेवकृतस्य प्रसन्नराघवनाटकस्य नाम १३३७ विक्रमाब्दे शिङ्गभूपालेन लिखितमतो जयदेवस्य त्रयोदशशतकासन्नः समयोऽस्ति।

किमक्षराणां भारेण निःसारेण मनीषिणः।
स्वल्पाक्षरापि पीयूषकृतिः पीयूषवर्षिणी॥

कविराज-विश्वनाथस्य साहित्यदर्पणाख्या कृतिः साहित्यशास्त्रस्य सर्वाङ्गपूर्णा कृतिरिति लेशेतोऽपि न सन्देहः। साहित्यदर्पणे एकं पद्यं यवननृपतेः अलाबुद्दीनखिलजीत्यस्य वर्णनात्मकमस्ति। तद्यथा —

सन्धौ सर्वस्व हरणं विग्रहे प्राणनिग्रहः।
अलाबुद्दीननृपतौ न सन्धिर्न च विग्रहः॥

अलावुद्दीनस्य मृत्युः १२३७ विक्रमाब्दे बभूव अतो विश्वनाथस्य समयस्त्रयोदशशतकोत्तरभागपर्यन्तोऽस्ति।

केशवोऽप्पयदीक्षितश्च —

श्रीमान् केशव आतेने नाम्नाऽलङ्कारशेखरम्।
हृद्यं कुवलयानन्दं श्रीमदप्पयदीक्षिताः॥१४॥

केशवमिश्रः कोटकाङ्गडानरेशमाणिक्यचन्द्रस्य सभापण्डित आसीत्। तस्य राज्यसमयः विक्रमीयषोडशशतकोत्तरभागः। केशवेन तर्कभाषादयोऽनेके प्रबन्धा निर्मिताः सन्ति।

कुवलयानन्दकारी मीमांसाद्वयस्यापि महान् पण्डित आसीत् । अप्पयदीक्षिते- नान्योऽपि अनेके ग्रन्था लिखिताः । तद्भ्रातुष्पुत्रेण नीलकण्ठेन लिखितम्—

द्वासप्तति प्राप्य वयः प्रबन्धान् शतं व्यधादप्पयदीक्षितेन्द्रः ।

अस्य स्वर्गवासः १७१० विक्रमाब्दे बभूव ।

जगन्नाथः —

पण्डितेन्द्रो जगन्नाथशर्मा निर्माणकौशलात् ।
रसगङ्गाधरं कृत्वा रसगङ्गामवाहयत् ॥१५॥

जगन्नाथः तैलङ्गदेशीयः परन्तु नववयसि इन्द्रप्रस्थे शाहजहांनृपस्य सभा- पण्डितो बभूव यदनेन भामिनीविलासे स्वयमुक्तम्—

दिल्लीवल्लभपाणिपल्लवतले नीतं नवीनं वयः ।
सम्प्रत्युज्झितवासनं मधुपुरीमध्ये हरिः सेव्यते ॥

अस्यैकस्मिन् स्वलिखितपुस्तके १७२० विक्रमाब्दो लिखितः ।

विद्याभूषण-विश्वेश्वरौ —

साहित्यकौमुदी विद्याभूषणेन विनिर्मिता ।
विश्वेश्वरेण विदुषा कृतोऽलङ्कारकौस्तुभः ॥१६॥

विद्याभूषणो बंगदेशीयः विश्वेश्वरश्च पर्वतीयः । द्वावपि खिष्टाष्टादशशतके बभूवतुः ।

अच्युत-सीतारामौ —

साहित्यसारं विदधेऽच्युतरायमनीषिणा ।
साहित्योद्देशसन्दर्भःसीतारामेण शास्त्रिणा ।।१७॥

दाक्षिणात्योऽच्युतरायशास्त्री एकोनविंशशतके हरियाणाप्रान्तभिवानीनिवासी श्रीसीतारामशास्त्री च विंशशतकेऽभूत् ।

साहित्यसारं विदधे मया छात्रहितेच्छया ।
तट्टीका रचिता हिन्द्यां जीवनरामशास्त्रिणा ॥१८॥

साहित्यमतसारः —

साहित्यशास्त्रमित्याख्या भट्टमम्मटतोऽभवत् ।
शब्दार्थयोश्च साहित्यात् साहित्यं शास्त्रमुच्यते ॥१९॥

षट् सम्प्रदायाः शास्त्रेऽस्मिन् मन्यन्ते साम्प्रतं बुधैः ।
तेषु सर्वेषु प्राधान्यं रसस्य भरतेरितम् ॥२०॥

विभावस्यानुभावस्य तथैव व्यभिचारिणः ।
संयोगात् रसनिष्पत्तिर्भरतस्य विनिर्णयः ॥२१॥

उत्पत्तिश्च रसस्यास्य मन्यते भट्टलोल्लटः ।
शंकुकोऽनुमितिं चाभिव्यक्तिमभिनवोऽवदत् ॥२२॥

अलङ्कारस्य प्राधान्यं भामहोद्भटरुद्रटाः ।
दण्डी गुणानां रीतीनां वामनश्चैव मेनिरे ॥२३॥

ध्वन्यालोककृदाचार्यैर्ध्वनिप्राधान्यमीरितम् ।
विश्वनाथजगन्नाथमम्मटाद्यैः समर्थितम् ॥२४॥

शास्त्रे व्यग्रा च मे बुद्धिः संशुद्धिः क्वैतिहासिकी ।
तथापि यन्मयाऽभाषि पठ्यतामैतिहासिकैः ॥२५॥

गाथा ताथागतानां गलति गमनिका कापिली कापिलीनां,
क्षीणा काणादवाणी द्रुहिणहरगिरः सौरभं नारभन्ते ।
क्षामा कौमारिलोक्तिर्जगति ग्रहमतं गौरवाद्दूरवान्तं,
काशं काशङ्कपङ्के प्रसरति सरसे काव्यसाहित्यशास्त्रे ।२६। इति शम् ॥

षड्दर्शन-परिचयः

[द्वितीयं व्याख्यानम्]

१-२ वैशेषिक-न्यायदर्शने —

कणादः

अथ तत्र भवानासीत् कणादो मुनिपुङ्गवः ।
यश्चकार जगद्भूत्यै शास्त्रं वैशेषिकं महत् ॥ १ ॥

अथ कालक्रमानुसारं दर्शनेषु प्रथमं दर्शनं वैशेषिकदर्शनमस्ति । इदं महर्षिकणादेन प्रणीतम् । व्याकरणशास्त्रवद् वैशेषिकशास्त्रस्यापि सर्वशास्त्रोपकारकत्वमस्ति । यदुच्यते "**काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्**" इति । श्लोकवार्तिके भट्टकुमारिलेन वैशेषिकदर्शनस्यैकं नाम "**औलुक्यदर्शन**"मित्यपि कथितम् । श्रूयते ग्रन्थकरणारम्भे भगवता शङ्करेण उलूकरूपं धृत्वा मुनयेऽस्य शास्त्रस्योपदेशः कृतः । इदं भाष्यकारस्यापि लेखेन पुष्टं भवति । तद्यथा—

योगाचारविभूत्या यस्तोषयित्वा महेश्वरम् ।
चक्रे वैशेषिकं शास्त्रं तस्मै कणभुजे नमः ॥

"**न वयं षट्पदार्थवादिनो वैशेषिकादिवत्**" इति सांख्यसूत्रात् "**महद्दीर्घवद् वा ह्रस्वपरिमण्डलाभ्याम्**" इति वेदान्तसूत्रात् "**कर्मैके तत्र दर्शनात्**" इति च मीमांसा सूत्राद् ज्ञायते यदिदं दर्शनं साख्य-वेदान्त-मीमांसादर्शनेभ्यः प्राचीनं वर्तते । न्यायभाष्यकारलेखानुसारं तु न्यायदर्शनादपि प्राचीनम् । कणादः शिलान्नं भुक्त्वा तपस्यति स्म । महाभारतस्योद्योगपर्वानुसारम् अम्बा राज्ञी उलूकर्षेराश्रमं गता । इदं दृष्ट्वैव चीनीयात्रिह्यूनसांगस्यः अयं महाभारतनिर्माणात्पूर्ववर्त्ती पञ्चशिखस्य समकालिकः कणादोऽभिमतः, अहं कश्यपमहर्षेः पुत्रमेनं मन्वे । स च सत्ययुगे आसीत् । अक्षपादेन कणादसूत्राणां भाष्यमभाषि । अनेनैवाक्षपादापरनामवेन गौतमेनास्य भाष्यं लिखित्वा तर्कवादस्यारम्भः कृतः । अनेनानादिसिद्धानि बौद्धजैनमीमांसकादीनामपि मतानि खण्डितानि ।

महर्षिः गौतमः—

प्रशस्तपादः कृतवानक्षपादापराभिधः ।
प्रशस्तपादभाष्यं च न्यायदर्शनमेव च ॥

कैश्चिद् विद्वद्भिः प्रशस्तपादभाष्यकर्ता प्रशस्तपादोऽक्षपाद-गौतमादन्यो

मन्यते । अस्मन्मते द्वयोरैक्यम् । गोतमर्षिर्महर्षेरङ्गिरसः प्रपौत्र आसीत् । अस्य स्थिति-कालस्त्रेतायुगमारभ्य द्वापरस्यान्तपर्यन्तं मन्यते । चिरञ्जीवितादु महर्षीणां नास्त्यसम्भवः । महाभारतस्य शान्ति-पर्वणि लिखितमस्ति—

न्यायतन्त्राण्यनेकानि तैरुक्तानि यद्यपि ।
न्यायतन्त्रं हि कलेन गोतमो वेद तत्त्वतः ॥

वैदिकदर्शनेषु न्याय-वैशेषिकयोः स्थानं सर्वोच्चं विद्यते **"प्रमाणैरर्थपरीक्षणं न्यायः"** (न्यायभाष्यं) । अयं तर्कनाम्नापि कथ्यते तत्त्वज्ञानार्थमूहस्तर्कः (न्या० सू०) बहुना किं श्रुतावपि—**"आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"** अत्र मन्तव्यशब्देन न्यायवैशेषिकयोर्ग्रहणम् । उदयनस्यापीदमेव मतम्—**'न्यायचर्चेयमीशस्य मननव्यपदेशभाक् ।'** महर्षिर्याज्ञवल्क्योऽपीदं श्रुतिमतं समर्थयति **"यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः"** इति । अनेन न्यायवैशषिकयोर्धर्मोपयोगित्वमुक्तम् । यतो हि पदार्थ-ज्ञानेन द्वयोर्दर्शनयोर्मोक्षप्राप्तिरपि वर्ण्यते—

पदार्थतत्त्वविज्ञाता यत्र कुत्राश्रमे वसन् ।
जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः ॥
कणादश्चाक्षपादश्च धन्यौ मान्यौ न कस्य वै ।
तर्केणैव कृतो याभ्यां मोक्षस्यापि विनिर्णयः ॥

'वैशिषकं न्यायश्च द्वयमपि समानतन्त्रम् ।'

द्वयोर्मते ईश्वरो निराकारः सर्वज्ञः सर्वव्यापकः, जगतो निमित्तकारणं च जीवः प्रतिशरीरं भिन्नः विभुर्नित्यश्च, पृथिव्यादिपञ्चभूतानां परमाणुभिर्जगदुत्पत्तेः । आत्मा-दीनां सप्तानामथवा षोडशानां पदार्थानां तत्त्वज्ञानेन जीवस्य मोक्षो भवति न पुनरुत्पद्यते ससारे **"न स पुनरावर्तत"** इति श्रुतेः । सम्प्रति न्यायवैशेषिकयोः प्रा**मुख्या**नां केषाञ्चित् प्रक्रियाग्रन्थानां सक्षिप्य वर्णनं क्रियते —

वात्स्यायनः —

चन्द्रगुप्तस्य मौर्यस्य प्रधानसचिवो गुरुः ।
श्रीवात्स्यायनचाणक्यो न्यायभाष्यमरीरचत् ॥

चाणक्य-विष्णुगुप्तकौटिल्यादीन्यपि अस्य नामान्तराणि प्रसिद्धानि सन्ति । अतः कौटिलीयमर्थशास्त्रमपि अनेनैव निर्मितमस्ति । मुद्राराक्षसस्य कथनानुसारं पञ्चतन्त्रकर्त्ता विष्णुशर्मा अस्य सहपाठी आसीत् ।

कामन्दकीय-नीतिशास्त्रकर्त्ता कामन्दकः चाणक्यस्य शिष्य आसीत् । अनेनापि स्वनाम्ना **'चाणक्यनीतिः'** कृता याद्यत्वे प्रतिगृहं प्रसिद्धा वर्तते । **'मञ्जुश्रीमूलकल्पना'**

नाम्नि जैनग्रन्थे लिखितमस्ति कौटिल्योऽतीव दीर्घजीव्यासीत् । अनेन न्यायभाष्ये पाणिनेः सूत्राण्युद्धृतानि, अतः पाणिनेः समकालीनो वा किञ्चित्परकालीनो विद्यते स्म । नवीनैतिहासिकैरस्य मृत्युसमयः विक्रमाब्दात् ३२२ वर्षपूर्वं मन्यते । अयमेव च समयः युक्ततमः प्रतिभाति ।

उद्योतकरः —

दिङ्नागो नास्तिकगिरां कृत्वा तर्केण खण्डनम् ।
उद्योतकर आचार्यो न्यायवार्तिकमातनोत् ।। ५ ।।

भारद्वाजगोत्रेण उद्योतकरेण विदुषा प्रसिद्धस्य बौद्धपण्डितदिङ्नागस्य '**प्रमाणसमुच्चय**-" नामकं ग्रन्थं खण्डयित्वा (यो ग्रन्थो न्यायभाष्यं खण्डयति) **न्याय-वार्तिक**नामको ग्रन्थो निर्मितः । वासवदत्ताकारः सुबन्धुकविः स्वसमये न्यायशास्त्र-रक्षकमुद्योतकरमेव मनुते । तद्यथा—'**न्यायस्थितिमिवोद्योतकरस्वरूपाम्**" । अस्य स्थितिसमयो विक्रमीयषष्ठशतकान्तिमभागः सप्तमस्य पूर्वभागो वा । धर्मकीर्तेर्बौद्धस्या-प्ययमेव समयः । अयं न्यायभाष्यकारे वात्स्यायने महतीं श्रद्धां रक्षति स्म । यदाह—

यदक्षपादप्रतिमो भाष्यं वात्स्यायनो जगौ ।
अकारि च महत्तस्य भारद्वाजेन वार्तिकम् ।।

अनेन न्यायभाष्योपरि कृतानां दिङ्नागाक्षेपानां कुतर्कत्वं कथयित्वा ते आक्षेपाः सहेतुकं खण्डिताः । उक्तं च—"**कुतार्किकध्वान्तनिरासहेतोर्विरच्यतेऽयं मयका निबन्धः**" ततो धर्मकीर्तिना बौद्धपण्डितेन भारद्वाजस्य न्यायवार्तिकस्य खण्डनं कृतम् ।

वाचस्पतिः —

धर्मकीर्तिं खण्डयित्वा वार्तिकाक्षेपकारकम् ।
न्यायवार्तिकतात्पर्यं मिश्रवाचस्पतिर्व्यधात् ।। ६ ।।

धर्मकीर्तिग्रन्थो '**बौद्धसङ्गति** '**न्यायबिन्दुश्च**' । वाचस्पतिर्मैथिलपण्डित आसीत् स्वसमयः स्वयमनेन लिखितः ।

न्यायसूची-निबन्धोऽयमकारि सुधियां मुदे ।
श्रीवाचस्पतिमिश्रेण वस्वङ्कवसु (८९८) वत्सरे ।।

अनेन वार्तिकोपरि कृताक्षेपाणां खण्डनं कृत्वा वार्तिकस्य सम्यक्त्वं साधितम् ।

श्रीधर-वल्लभौ

टीकां प्रशस्तभाष्यस्य कन्दलीं श्रीधरोऽकरोत् ।
न्यायलीलावतीग्रन्थमाचार्यो वल्लभस्तथा ।। ७ ।।

दक्षिणराढापुरीनिवासिना श्रीधरेण प्रशस्तभाष्योपरि १०३८ विक्रमाब्दे **'न्याय-कन्दली'** (अस्मिन्नेव शतके) लिखिता। वल्लभश्चार्यं सप्तशतीकार-गोवर्धनाचार्यस्य भ्रातासीत्। अनेन कन्दल्या उल्लेखः कृतः। अतः श्रीधरात्किंचित् पश्चिमः।

उदयनाचार्यः —

तात्पर्यपरिशुद्धिं चोदयनः किरणावलीम्।
आत्मतत्त्वविवेकं च कुसुमाञ्जलिमातनोत्॥ ८॥

उदयनाचार्यो मैथिलब्राह्मण आसीत्। अस्य 'किरणावली' प्रशस्तभाष्यस्य सर्वोपरि टीका, न्यायकुसुमाञ्जलावनेन अनीश्वरवादिनां चार्वाक-जैन-बौद्ध-मीमांसकानां महता संरम्भेण खण्डनं कृत्वा ईश्वरस्य सिद्धिः कृता। अस्य समयः स्वयमनेन लिखितः।

तर्काम्बराङ्क-प्रमितेष्वतीतेषु शकान्ततः।
वर्षेषूदयनश्चक्रे सुबोधां लक्षणावलिम्॥

अनेनैकदा जगन्नाथपुरीगतेन भगवन्तं जगन्नाथं प्रति कथितम् —

ऐश्वर्यमदमत्तोऽसि मामवज्ञाय वर्तसे।
उपस्थितेषु बौद्धेषु मदधीना तव स्थितिः॥

गङ्गेशोपाध्यायः —

महोपाध्यायगङ्गेशो न्यायग्रन्थशिरोमणिम्।
तत्त्वचिन्तामणिं चक्रे परिष्कार-परिष्कृतम्॥ ९॥

अयं गङ्गेशो नव्यन्यायावतारो मन्यते। प्राचीनेषु न्यायग्रन्थेषु बौद्धपण्डितैरनेके आक्षेपाः कृताः तेषां सर्वेषां कर्कशतर्कद्वारा खण्डनं कृत्वा न्यायभाष्यादिप्राचीनग्रन्थानां सम्यक्त्वं साधितमनेन तत्त्वचिन्तामणिद्वारा, हर्षमिश्रेण 'खाद्यखण्डने' तत्त्वचिन्तामणेरतिप्रशंसा कृता। गङ्गेशपुत्रेण वर्धमानोपाध्यायेन स्वपितुर्मीमांसकत्वमपि लिखितम्। तद्यथा—

गङ्गेश्वराय गुरवे पित्रेऽत्र भवते नमः।
गङ्गेशेनोद्धृता वाणी काणादी गौतमी तथा॥
बौद्धवागन्धकूपेषु पतिता मणिभासया॥ १०॥

गङ्गेशद्वारा बौद्धमतखण्डनानन्तरं कस्यापि बौद्धपण्डितस्य साहसो नाभूत् तत्खण्डनाय।

रघुनाथः —

अधीत्य वासुदेवाख्यात् सार्वभौमाद् विलक्षणाम् ।
दीधितिं कृतवान् टीकां रघुनाथ-शिरोमणिः ॥

अनेन स्वसम्बन्धे उक्तम्—

विदुषां निवहैरिहैकमत्या यददुष्टं निरटङ्कि यच्च दुष्टम् ।
मयि जल्पति कल्पनाधिनाथे रघुनाथे मनुतां तदन्यथैव ॥

मथुरानाथ-जगदीशौ —

माथुरीं मथुरानाथस्तर्कवागीश आतनोत् ।
जागदीशीं जगदीशस्तर्कालङ्कारसंज्ञकः ॥ ११ ॥

इयं माथुरी चिन्तामणिटीका जागदीशी च दीधितिटीका । द्वावपीमौ बङ्ग-देशीयौ पण्डितावास्ताम् । मथुरानाथस्य समयः षोडशशतकम् । जगदीशेन १७१० विक्रमाब्दे 'शब्दशक्ति-प्रकाशिका' लिखिता ।

गदाधरः —

भट्टाचार्यचक्रवर्ती करोति स्म गदाधरः ।
गादाधरीं शक्तिवादं व्युत्पत्तिवादमेव च ॥ १२ ॥

गदाधरेण दीधितिटीकागादाधरी, व्युत्पत्तिवादः, शक्तिवाद'श्च ग्रन्था निर्मिताः गदाधरस्य सर्वेषां ग्रन्थानां विद्वत्समाजे महानादरोऽस्ति । श्रूयते गदाधरो लेखकस्तु महानासीत्, परन्तु शास्त्रार्थकरणे न पटुः । एकदा नदियापुरे स्वामी मधुसूदनसरस्वती समागतः परस्परं शास्त्रार्थे जाते तत्रत्याः सर्वे पण्डिताः पराजिता मधुसूदनेन गदाधरश्चातुरो बभूव । अयं रत्नकोशकारस्य हरिरामतर्कालङ्कारस्य शिष्यः सप्तदशशतके आसीत् ।

विश्वनाथः —

न्यायपञ्चाननः श्रीमान् विश्वनाथमहोदयः ।
न्यायमुक्तावलीं न्यायसूत्र-वृत्तिञ्च निर्ममे ॥ १३ ॥

विश्वनाथेन तत्त्वचिन्तामणिसारं गृहीत्वा 'न्यायमुक्तावलिः' कृता 'न्यायसूत्रवृत्ति'श्च १६५१ विक्रमाब्दे लिखिता । तद्यथा—

रसबाणतिथौ शकेन्द्रकाले बहुले कामतिथौ शुचौ सिताहे ।
अकरोन्मुनिसूत्रमेतां ननु वृन्दाविपिने स विश्वनाथः ॥

'मुक्तावल्या'मनेन रत्नकोषकारस्य मतं खण्डितम् ।

अन्नम्भट्टः —

अन्नम्भट्टो रचितवान् तर्कसङ्ग्रहपुस्तकम् ।
तट्टीकां दीपिकाञ्चैव मूलतत्त्व-प्रकाशिकाम् ॥ १४ ॥

अन्नम्भट्टः काश्यां पठित्वा महान् विद्वानभूत् । अयमान्ध्रदेशीयः समयश्चास्य सप्तदशशतकस्योत्तरभागः ।

न्यायमुक्तावली टीका वृत्तिश्च न्यायदर्शने ।
छात्राणामुपकाराय स्वज्ञानाय मया कृते ॥ १५ ॥
जातास्वनेकटीकासु जाते भाष्येऽपि विस्तृते ।
महते न श्लथा आसन् सूत्रग्रन्थस्य ग्रन्थयः ॥ १६ ॥

वैशेषिक-न्यायमतसारः —

विशेषस्य पदार्थस्य तमसो विनिरूपणात् ।
वैशेषिकं समाख्यानं दर्शनस्यास्य चाभवत् ॥ १७ ॥
पदार्थानाञ्च साधर्म्यवैधर्म्यज्ञानतश्च यत् ।
आत्मज्ञानं भवेत् पुंसः तत् तत्त्वज्ञानमुच्यते ॥ १८ ॥
निष्कामकर्म एवैतद्दर्शने धर्मपूर्वकम् ।
तत्त्वज्ञानोत्पादकं वै भूत्वा भवति मोक्षकृत् ॥ १९ ॥
न्यायदर्शनसिद्धान्ते तिस्रः सत्ताः सदा स्थिराः ।
जीवो जगन्महेशश्च चतुर्थं नास्ति किञ्चन ॥ २० ॥
जगत्सृष्टिर्महेशस्य सा च वास्तविकी मता ।
नैव शक्नोति भवितुं मिथ्याकालनयेऽपि सा ॥ २१ ॥
दृश्यमानस्य जगतः परमाणुर्हि कारणम् ।
ईश्वरोऽनुमया गम्यो निमित्तकारणं हि सः ॥ २२ ॥
मिथ्याज्ञानेन जायन्ते दोषजन्म-प्रवृत्तयः ।
मिथ्याज्ञानस्य नाशो हि तत्त्वज्ञानेन जायते ॥ २३ ॥
प्रमाणादि-पदार्थानां षोडशानां यथार्थतः ।
ज्ञानादेव मोक्षप्राप्तिर्भवतीति विनिश्चयः ॥ २४ ॥
जीवात्म-परमात्मत्व-भेदेनात्मा द्विधा मतः ।
जीवो विभुश्च नित्यश्च भिद्यते च शरीरतः ॥ २५ ॥
परमात्मा त्वेक एव सर्वज्ञो व्यापकस्तथा ।
निराकारः कारणं च निमित्तं जगतो मतः ॥ २६ ॥

(साङ्ख्य-योग दर्शने म० म० छज्जुरामविद्यासागरः)

महर्षिः कपिलो विज्ञानभिक्षुश्च—

यानि प्रणीतवान् सांख्यसूत्राणि कपिलो मुनिः ।
तेषां विज्ञानभिक्षुर्वै भाष्यजातमवर्त्तयत् ।। १ ।।

गङ्गासागरसङ्गमनिवासिना देवहूति-पुत्रेण आदिविदुषा महर्षिणा कपिलेन सांख्यसूत्राणि निर्मितानि समयश्चास्य सत्ययुग एव । अत एव उपनिषत्सु सांख्यसिद्धांतः प्रचुरमात्रायामुपलभ्यन्ते । इदं दर्शनं द्वैतवाद्यस्ति । अत्र प्रकृतिपुरुषौ द्वे मूलतत्त्वे स्तः ययोः पारस्परिकसम्बन्धेन जगदुत्पद्यते, तत्र प्रकृतिर्जडतत्त्वं पुरुषश्च चेतनः सत्कार्यवादः सांख्यस्य मुख्यसिद्धान्तोऽस्ति अर्थात् कच्छपाङ्गवत् कार्यं कारणेऽव्यक्तरूपेण तिष्ठति । अत्र जगत उत्पत्तिः प्रादुर्भावरूपा प्रलयश्च तिरोभाव एव न नाशः । तत्त्वसमासनामकं सांख्यसूत्रं प्राचीनमीश्वरवादि च विज्ञानभिक्षुभाष्य-सहितञ्च नवीनं सांख्यसूत्रम् निरीश्वरवादिशङ्कराचार्यमाधवाचार्य-वाचस्पतिमिश्रादिभिरस्य नवीनसांख्य-सूत्रस्यैकमपि सूत्रं स्वस्वग्रन्थेषु नोद्धृतं दृश्यते, अस्य कारणं न विदितमस्ति । सांख्यशास्त्रज्ञानं सर्वोच्चज्ञानं । मन्यते यत्प्रसिध्यति —

नास्ति सांख्यसमं ज्ञानं नास्ति योगसमं बलम्" इति ।
वेदेष्वपि सांख्ययोगयोर्वर्णनमस्ति ।

सांख्ययोगादिगम्यम् (श्वेताश्वतरः) **'अष्टौ प्रकृतयः षोडशविकाराः" (गर्भोपनिषत्)** सांख्यमते पञ्चविंशतितत्त्वज्ञानेन मोक्षो भवति । यदुक्तं **गौड़पादभाष्ये—**

पञ्चविंशतितत्त्वज्ञो यत्र कुत्राश्रमे वसन् ।
जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः ।।

यद्यपि मोक्षार्थं सांख्यशास्त्रे ईश्वरो नाभिमतस्तथापि मुक्तात्मभिरीश्वरस्तुतिः ग्रन्थेषु कृता दृश्यते । बौद्धासांख्यशास्त्रस्य प्रभावो लक्ष्यते । **गौतमबुद्धस्य मुख्यसिद्धान्ताः** सांख्योपज्ञा एव सन्ति । वैदिककर्मकाण्डस्य गौणता, अनीश्वरवादः, जगतः परिणामनित्यता, अहिंसादयः सर्वे सिद्धान्ताः भगवता बुद्धेन सांख्यादेव गृहीताः स्युः ।

कपिलं त्वादिविद्वांसं के प्रशंसन्ति नो बुधाः ।
येनाविद्योदधौ मग्नं सांख्यनावोद्धृतं जगत् ।। २ ।।

सर्वार्थस्य प्रकाशेन शास्त्रयोः सांख्ययोगयोः ।
विज्ञानभिक्षोर्विज्ञानं केन नैव प्रशस्यते ।। ३ ।।

ईश्वरकृष्ण-माठरगौड़पादाः —

श्रीमदीश्वर-कृष्णेन याः कृताः सांख्यकारिकाः ।
तासां भाष्यं माठरेण गौडपादेन निर्ममे ॥ ४ ॥

आचार्येण ईश्वरकृष्णेन—"सांख्य-सप्ततिः अर्थात् 'सप्ततिः **सांख्यकारिकाः'** निर्मिताः । तासामुपरि भाष्यद्वयमस्ति, एकमाद्यशङ्कराचार्यगुरोर्गौडपादस्यातिसंक्षिप्तं सरलं च द्वितीयं विक्रमप्रथमशतकीयस्य माठरस्यातिविस्तृतं गभीर च ।

वाचस्पतिर्नारायणतीर्थश्च —

सर्वतन्त्रविदा वाचस्पतिना तत्त्वकौमुदी ।
श्रीनारायणतीर्थेन विहिता साङ्ख्यचन्द्रिका ॥ ५ ॥

सर्वतन्त्रविदा वाचस्पतिमिश्रेण कारिकासप्ततेः 'सांख्यतत्त्वकौमुदी'व्याख्या लिखिता, स्वामिनारायणतीर्थेन 'सप्ततिव्याख्याचन्द्रिका' निर्मिता । वाचस्पतेः समयः प्राग् लिखितः काशीनिवासिनः स्वामिनारायणतीर्थस्य च समयः १७१५ विक्रमाब्दोऽस्ति ।

भावागणेश-क्षेमानन्दौ —

भावागणेशो व्यदधात् सांख्यतत्त्वप्रदीपनम् ।
क्षेमानन्देन विहितं सांख्यतत्त्व-विवेचनम् ॥ ६ ॥

भावागणेशो विज्ञानभिक्षुशिष्य आसीत् । क्षेमानन्दस्य समयः १७५५ विक्रमाब्दो वर्तते स्म । इमौ द्वावपि स्वसमये विशिष्ट-विद्वांसावास्ताम् ।

अनिरुद्धो महादेवश्च —

अनिरुद्धेन सूत्राणां सद्वृत्तिश्च विनिर्ममे ।
सांख्यसूत्रवृत्तिसारं महादेवः प्रणीतवान् ॥ ७ ॥

अनिरुद्धपण्डितेनातिप्रमेयबहुला सांख्यसूत्रवृत्तिः प्रणीता । इयं काश्यादीनामुच्च परीक्षासु पठनपाठनयोर्निर्धारिता वर्तते । कठिनत्वादस्या उपरि अनेकाष्टीकाः सन्ति विदुषाम् । सांख्यसूत्रवृत्तिसारकर्त्ता महादेवो महान् नैयायिक आसीत् । सम्भवतो न्यायदिनकरकर्तु दिनकरभट्टस्य पिता महादेवोऽयमेव महादेवो भवेत् ?

महर्षिपतञ्जलिर्व्यासश्च —

यो योगः प्रतिभाति स्म भगवन्तं पतञ्जलिम् ।
तस्यैव भगवान् व्यासो भाष्यजातमवर्तयत् ॥ ८ ॥

महर्षिः पतञ्जलिर्योगद्वारा दिव्यं ज्ञानं लब्ध्वा तस्यैव विवेचनं सूत्रद्वारा कृतवान् । योगस्याष्टाङ्गानि **यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-**

समाधि'नामानि सन्ति । समाधिश्चित्तवृत्तीनां निरोधस्तस्यैव सूत्रात् । **चित्तनिरोधश्चा-**भ्यासवैराग्याभ्याम् । भगवद्गीतायामपि तथैवोक्तम्—''**अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते** ।

ईश्वरप्रणिधानेन योगाभ्यासद्वारा परमात्म-साक्षात्करणं **परमधर्मः** । यदुच्यते **'अयन्तु परमो धर्मो यद्योगेनात्मदर्शनम्** ।'

योगिपरमात्मनोरभेद एवं भवति —

यथाग्निरग्नौ संक्षिप्तः समानत्वमनुव्रजेत् ।
तथात्मा साम्यमायाति योगिनः परमात्मना ॥

अस्य पातञ्जलयोगदर्शनस्योपरि व्यासो भाष्यं कृतवान्,केचिद् योगदर्शनकारं महाभाष्यकार-पतञ्जलिं च एकमेव मन्वते, तदसत् । द्वयोरतीव भिन्नकालिकत्वात् । सांख्ययोगौ द्वावपि समानतन्त्रे विषय-साम्यात् । लिखितमपि ''सांख्ययोगौ पृथग् बालाः प्रवदन्ति न पण्डिताः । इति ।

हिरण्यगर्भो योगस्य तत्त्वं वेद यथार्थतः ।
पतञ्जलिर्वा व्यासो वा वेद नान्यस्तु कश्चन ॥ ६ ॥

याज्ञवल्क्य-स्मृत्यनुसारं योगतत्त्वज्ञाता केवलं ब्रह्मैव द्वितीयश्रेण्यां पतञ्जलि-व्यासादयः । तृतीयश्रेण्यां याज्ञवल्क्यशुकादयो भवितुमर्हन्ति ।

वाचस्पतिर्भोजश्च—

वाचस्पतिर्भाष्यटीकां तत्त्ववैशारदीं व्यधात् ।
चकार भोजराजश्च वृत्तिं सूक्तेष्वनुत्तमाम् ॥ १० ॥

सर्वतन्त्रस्वतन्त्रवाचस्पतिमिश्रस्य व्यासभाष्यस्य निगूढार्थबोधनाय 'तत्त्ववैशारदी' व्याख्या प्रख्याता वर्तते । महाराजभोजेन योगसूत्राणां प्राञ्जला वृत्तिर्निर्मिता ।

योगं कृत्वा भवेद्राजा इति लोके प्रसिध्यति ।
अतो भोजस्त्वनुपमो योगसूत्रार्थबोधने ॥

भोजराजस्य निश्चितः स्थितिसमयो १०८२ विक्रमाब्दस्य दानपत्राद् ज्ञायते ।

योगज्ञो योगिभिर्भोजः शाब्दिकैरथ शाब्दिकः ।
वैद्यैर्वैद्यः सभामध्ये कविभिर्देहवित् कविः ॥

अयं संस्कृतभाषाया महान् प्रचारक आसीत् । किं बहुना, अस्य प्रतिज्ञासीत्— **''संस्कृतं यो न जानाति स राज्याद् बहिरस्तु मे''**

संस्कृतस्य प्रचारस्तु कृतोऽनेन गृहे गृहे ।
एकश्लोकस्य निर्माणे लक्षं प्रत्यक्षरं ददौ ॥ ११ ॥

शिवानन्द-रामानन्दौ —

योगचिन्तामणिश्चक्रे शिवानन्देन योगिना ।
रामानन्देन मतिना योगसूत्रमणिप्रभा ॥ १२ ॥

शिवानन्दस्य योगिनो योगचिन्तामणिः काश्यादियोगपरीक्षायां पठनपाठनयोर्नियतिकृतो वर्ततेऽस्य स्थितिसमयः काश्यामष्टादशशतकपर्यन्तं मन्यते । रामानन्दो योगसूत्राणां मणिप्रभाटीकालेखक आसीत् । अयं ब्रह्मसूत्र '**रत्नप्रभा**' व्याख्याकारस्य गोविन्दानन्दस्वामिनः शिष्य इति प्रसिद्ध्यति ।

सांख्यमते त्रीणि दुःखानि सन्ति आध्यात्मिकाधिभौतिकाधिदैविकानि । एषां कारणमविद्यैवास्ति । यद्यपि पुरुषः स्वस्य मूलरूपे शुद्धश्चैतन्यमात्रश्च स निर्गुणो जगतः साक्षिमात्रश्च किन्तु प्रकृति-प्रतिबिम्बेनाविद्याधीनो भूत्वा स्वरूपं विस्मरति । तथात्मानं कर्मकर्त्तारं कर्मभोक्तारं च मन्यतेऽत एव तस्य जन्म जन्मान्तरे दुःखरूपकर्मफलभोगः प्राप्यते । एतज्जन्मकर्मपरम्पराया नैरन्तर्यं पुरुषस्य बन्धनमस्ति, अस्मान्मुक्तिरेव तस्य मोक्षः । इदं बन्धनं दुःखमविद्याजन्यमतो विद्या (ज्ञान) द्वारैव कैवल्यं प्राप्यते । पुरुषस्य स्वरूपस्य परिचय एव ज्ञानमस्ति पुरुषस्य वास्तविकं स्वरूपं विशुद्धचैतन्यं च स साक्षी मात्र एव कर्ता तथा भोक्ता नास्ति । एवं ज्ञात्वा जन्मकर्म-परम्पराचक्रान्मुक्तो भवति, जन्मचक्रमेव त्रिविधदुःखानां कारणं तन्मुक्तो भूत्वा मोक्षभाग् भवति । योगमते चित्तं प्रकृतेः परिणामः, तच्च सदा चञ्चलं तिष्ठति । चित्तस्य विषयाकारग्रहणमेव वृत्तिः कथ्यते । वृत्तीनां निरन्तरक्रम एवास्माकं जीवनम् । कैवल्यावस्थायां वृत्तीनां समाधानं भवति । अत एव स समाधिरुच्यते ।

अत्र पुरुषः समस्त-विषयेभ्यः पृथग्भूत्वा स्वस्वरूपे चैतन्येऽवतिष्ठते । कैवल्यां स्थितिं चानुभवति । तदुक्तम् —**आत्मानं चेद् विजानीयादयमस्मीति पुरुषः ।**

किमिच्छेत् कस्य कामाय संसारमनुसंसरेत् ।

योगे "**क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरोऽपि** मन्यते । अस्मिन्-**सर्वकर्मफलार्पणेन** समाधिसिद्धिर्जायते" । योग ईश्वरतत्त्वमेव सांख्याद् विशिष्टं मन्यते-**ऽन्यत्समम्** ।

सांख्ययोग-मतसारः —

सांख्यदर्शनसिद्धान्ते त्रीणि दुःखानि सन्ति हि ।
अविद्याकारणं ह्येषां तया मुक्तो विमुच्यते ॥ १३ ॥

शुद्धो बुद्धश्चैतन्यप्रकृति-प्रतिबिम्बतः ।
स्वरूपं स्वस्य विस्मृत्य कर्तारं मन्यते निजम् ॥ १४ ॥

ज्ञात्वा स्ववास्तवं रूपमु[illegible]ते कर्तृतादितः ।
भोक्तृत्वभावनाप्यस्य तत्क्षणादेव नश्यति ॥ १५ ॥

ततश्च जन्मकर्मादि-चक्रान्मुक्तो भवन्निह ।
दुःखत्रयाद् विमुक्तः सन् परमाप्नोति पुरुषम् ॥ १६ ॥

पातञ्जलं योगशास्त्रं सांख्यस्यैव प्रपूरकम् ।
पुंसः कैवल्य-विज्ञानं योगलक्ष्यं मतं बुधैः ॥ १७ ॥

कैवल्यं च विवेकेन तत्त्वाभ्यासज एव सः ।
तत्त्वाभ्यासस्य ज्ञानाय योगशास्त्रस्य निर्मितिः ॥ १८ ॥

योगश्चित्तवृत्तिरोधः योगसूत्रे प्रकीर्तितः ।
चित्तवृत्तिनिरोधो हि वायोरिव सुदुष्करः ॥ १९ ॥

तत्त्वज्ञानाच्च वैराग्यादीश्वरप्रणिधानतः ।
चित्तरोधः प्रभवति, पुंस एकान्तवासिनः ॥ २० ॥

पंचविंशतितत्त्वेभ्यो विशिष्टं तत्त्वमीश्वरः ।
स च क्लेशादिरहितः योगशास्त्रे प्रकीर्तितः ॥ २१ ॥

अन्यत्सर्वं समानं वै शास्त्रयोः सांख्ययोगयोः ।
अत एव योगशास्त्रं सेश्वरं सांख्यमुच्यते ॥ २२ ॥

५-६ मीमांसादर्शनं वेदान्तदर्शनं च

महर्षि जैमिनिः

कर्मकाण्डप्रचाराय व्यासशिष्य-शिरोमणिः ।
कृतवान् पूर्वमीमांसादर्शनं जैमिनिर्मुनिः ॥ १ ॥

महर्षिजैमिनिना कर्मकाण्डस्य प्रचारकरणार्थं वेदेषु दृश्यमानानां विरोधानां परिहाराय च पूर्वमीमांसासूत्राणि निर्मितानि । मीमांसाविषयो धर्मनिर्णयो मन्यते । यथा—"**अथातो धर्ममीमांसा,**" "भट्टपादकुमारिलेन चोक्तम्—"**धर्माख्यं विषयं वक्तुं मीमांसायाः प्रयोजनम्**" । वेदविहितकर्मकरणं धर्मः, जगत्कर्मप्रधानं वर्तते । उच्यतेऽपि

'कर्मेति मीमांसकाः ।' कर्मद्वारैव धर्माधर्मौ भवतः । सर्वश्रेष्ठो धर्मो यज्ञादिः । उक्तं च—"स्वर्गकामो यजेत" यज्ञेन यज्ञ (विष्णु)मयजन्त देवास्तानि धर्माणि प्रथमान्यासन्" । इति गीतायाम्—

सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्वमेष वः स्विष्टकामधुक् ।।
देवान् भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ।।
अन्नाद् भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।
यज्ञाद् भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ।।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ।

देवतोद्देशेन अग्नौ हविर्द्रव्यत्यागो यज्ञः ।

विष्णुपुराणे —

यज्ञनिष्पत्तये सर्वमेतद् ब्रह्मा चकार वै ।
चातुर्वर्ण्यं महाभागो यज्ञसाधनमुत्तमम् ।।
अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ।।
यज्ञार्थात्कर्मणोऽन्यत्र लोकोय कर्मबन्धनः ।

अत्रेदमपि बोध्यम्—पञ्च वा एते महायज्ञाः सततं व्रतापत्तेः —

देवयज्ञः पितृयज्ञो मनुष्ययज्ञो भूतयज्ञो ब्रह्मयज्ञ इति । अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमे दैवोलिनृपयज्ञोऽतिथिपूजनम् । (मनुस्मृतिः) महाभारते लिखितम् —

अहन्यहनि येत्वेतान् कृत्वा वै भुञ्जते स्वयम् ।
केवलं मलमश्नन्ति ते नरा नात्र संशयः ।।

धर्मस्य सर्वसम्मतं लक्षणम्—"यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः" तत्राभ्युदयः स्वर्गादिः, निःश्रेयसं मोक्षः । तयोः सिद्धिः प्राप्तिर्यस्मात्स धर्म इत्यर्थः । बौद्धपण्डितैरनेके आक्षेपाः कर्मकाण्डसम्बन्धे कृताः तान्सर्वानाक्षेपान् खण्डयित्वा कर्मकाण्डस्य सम्यक्ता साधितास्मिन्दर्शने जैमिनिना बौद्धाक्षेपाश्च ते परम्परासिद्धान्तेनाधुनिकाः, बुद्धस्य जैमिनेः पश्चाद् भावित्वात् ।

जैमिनिर्भगवतो व्यासस्य शिष्य आसीत् । व्यासस्य स्थितिसमयः कलेर्द्वितीयशतकस्य जनमेजयस्य पर्यन्तः । महाराजस्य जनमेजयस्य सर्पयज्ञे (यो यज्ञः कुरुक्षेत्रान्त-

र्गतसर्पदम(सफीदम)नगरेऽभूत् तत्र व्यासः सपुत्रः सम्मिलितो बभूवेति महाभारताद् ज्ञायते। जनमेजयस्य शिलालेखेनापीदं सिद्ध्यति। पञ्चतन्त्रानुसारं वने जैमिनेर्मृत्युर्हस्तिद्वाराऽभूत्। यदुक्तं तत्र "**जघान विपिने हस्ती मुनिं जैमिनिम्।**

शबरस्वामी —

तद्भाष्यं शबरः स्वामी चक्रे शाबरनामकम्।
चतुर्वेदार्थचतुरः सूत्रगूढार्थ-संविदे॥

मीमांसादर्शनेऽस्माद् भाष्यात् पूर्वं नन्दसमकालिकेन केनचिद् उपवर्षपण्डितेन वृत्तिः कृतेति श्रूयते। शबरस्वामिनापि बहुत्र स्थलेषु सा उद्धृता दृश्यते। यथाह भगवानुपवर्ष इत्यादि। एकः शबरस्वामी विक्रमशतकीयस्य हर्षवर्धननृपतेर्लिङ्गानुशासनकोशस्य टीकामलिखत् स चान्यः शबरस्वामी अयमेव वेति न निश्चप्रचम्। यतः कैश्चिदुच्यते—यत् ६९६ समये वर्तमानेन हरिस्वामिना स्वीये शतपथभाष्ये शबरस्वामी उद्धृतः मया तु मन्यते समकालिकत्वेऽप्येतत्सम्भवति। अतो हर्षवर्धनवत् शबरस्याप्येष एव समयः। आद्यशङ्कराचार्येण स्ववेदान्तभाष्ये शबरस्वामिनो नाम गृहीतम्। तद्यथा "इत एवाकृष्य शबरस्वामिने" त्यादिना। अतः आद्यशङ्कराचार्यादिष भाष्यकारः शबरः प्राचीन एव। 'विबुधरत्नावल्यामस्य प्रशंसा एवं वरीवर्ति—

वेदविद्याविदग्धस्य मीमांसापारदृश्वनः।
शबरस्वामिनः कीर्तिं को न जानाति पण्डितः॥ ३॥

प्रभाकर-शालिकनाथौ —

प्रभाकरेण विहिता बृहती स्वमतानुगा।
अथ शालिकनाथेन बृहतीसारपञ्चिका॥ ४॥

चोलदेशीयप्रभाकरेण बृहतीसारपञ्चिका लिखिता। अयं प्रभाकरः शबरस्वामि-शिष्य आसीत्। अनेन शाबरभाष्यस्य बृहती टीका लिखिता। प्रभाकरस्य मतं ६९६ विक्रमाब्दे वर्तमानेन हरिस्वामिना स्वभाष्य उद्धृतं 'अथवा सूत्राणि विध्युद्देश इति प्राभाकराः। प्रभाकरस्य समयः सप्तमशतकमेव।

कुमारिलभट्टः —

भट्टयज्ञेश्वरसुतो भट्टपादकुमारिलः।
श्लोकवार्तिकमातेने तन्त्रवार्तिकमप्यथ॥ ५॥

भट्टपादकुमारिलेन शाबरभाष्योपरि श्लोकवार्तिके तन्त्रवार्तिकं व्याख्यानं विहितम्। जैनधर्मस्य प्राबल्येन लुप्तवैदिकधर्मस्यानेन पुनर्जीवनं दत्तम्। यथोक्तं **शङ्करदिग्विजये—**

कुमारिलमृगेन्द्रेण हतेषु जिनहस्तिषु ।
निष्प्रत्यूहमवर्धन्त श्रुतिशाखाः समन्ततः ।।

संक्षेपेण त्रयोदशानुवाकगतविषयाणां निर्देशः,
वत्सापाकरणस्य लक्षणं तत्प्राथम्यस्य कारणनिर्देशः ।

(२)

ऋग्वेदसंहिताभाष्यभूमिकाया विषयानुक्रमणिका

अभ्यर्हितत्वादृग्वेदस्यैवादौ व्याख्यानमुचितमिति पूर्वपक्षः ।
यज्ञानुष्ठानार्थत्वाद् यजुर्वेदस्यादौ व्याख्यानमित्युत्तरपक्षः ।
वेदलक्षणविचारः, प्रमाणलक्षणम्,
वेदसद्भावे प्रमाणाभाव इति पूर्वपक्षमधिकृत्य वेदमन्त्राणामर्थानवबोधकत्वम् ।
वेदमन्त्राणां सन्दिग्धार्थबोधकत्वम्, वेदमन्त्राणां विपरीतार्थबोधकत्वम्
वेदमन्त्राणां व्याघातार्थबोधकत्वम्, वेदमन्त्राणामधिगतार्थबोधकत्वम्,
वेदस्य लक्षणप्रमाणनिर्णयः, मन्त्रभागस्य प्रामाण्ये जैमिनिसूत्राणि,
विधिभागस्य प्रामाण्ये जैमिनिमतम्, अर्थवादभागस्य प्रामान्ये जैमिनिमतम्,
वेदस्यापौरुषेयत्वसिद्धिः,
मन्त्रस्य लक्षणम्, ब्राह्मणस्य लक्षणम्,
मन्त्राणां त्रैविध्यम्, वेदाध्ययनाधिकारः,
वेदाध्ययनस्य फलम्, वेदार्थज्ञस्य प्रशंसा,
वेदशब्दनिर्वचनम्, वेदस्य वेदत्वम्,
वेदस्य विषयप्रयोजनाद्यनुबन्धचतुष्टयस्य निरूपणम्,
वेदस्य विषयः, वेदस्य प्रयोजनम्, वेदसम्बन्धविचारः,
अपरविद्यारूपाणां वेदस्य षडङ्गानां समुद्देशः,
शिक्षाया लक्षणप्रयोजनपुरःसरं सम्यङ् निरूपणम्,
कल्पस्योपयोगादिप्रदर्शनपूर्वकं निरूपणम्,
व्याकरणस्य लक्षणनिर्देशमुखेन प्रयोजनविशेषाणां विस्तरशः प्रतिपादनम्,
निरुक्त-प्रयोजनम्,

(३)

सामवेदसंहिताभाष्यावतरणिकाया विषयानुक्रमणी

(४)

काण्वसंहिताभाष्यभूमिकाया विषयानुक्रमणी

(५)

अथर्ववेदभाष्यभूमिकाया विषयानुक्रमणी

'स्वाध्यायोऽध्येतव्यः' इत्यत्र विश्वजिन्न्यायेन स्वर्ग एवाध्ययनविधेर्भाव्य इति पूर्वः पक्षः,
इष्टप्रयोजनोऽर्थावबोध एवाध्ययनविधेर्भाव्य इत्युत्तरपक्षः,
स्वाध्यायाध्यनविधौ प्राभाकरमतस्योपन्यासपुरःसरं खण्डनम्,
वेदस्य स्वतः प्रामाण्यमिति सिद्धान्तविषयेऽभियुक्तानां विविधा विप्रतिपत्तयः,
प्रामाण्यमप्रामाण्यं चोभयं स्वत इति सांख्यानां मतोपन्यासः पूर्वोक्तस्य सांख्यमतस्य समीक्षा,
'अप्रमाण्यं स्वतः प्रामाण्यं परतः' इति सौगतमतनिरूपणम्, सौगतमतस्य निरासः,
अप्रामाण्यं प्रामाण्यं चोभयं परत इति तार्किकमतम्; प्रामाण्यं स्वतोऽप्रमाण्यं च परत इति मीमांसकानां सिद्धान्तः,
वेदानामपौरुषेयत्वप्रतिपादनम्,
विरुद्धमतखण्डनपूर्वकं शब्दस्य नित्यत्वसिद्धिप्रकारः,
स्फोट एव नित्यः शब्द इति शाब्दिकानां मतोपन्यासः,
शाब्दिकमतनिरासः,
अथर्ववेदव्याख्यानस्य त्रयीव्याख्यानानन्तर्योपपादनम्,
अथर्ववेदस्य शाखाविषयको विचारः,
कौशिकसूत्रोदितानाम् अथर्ववेदप्रतिपाद्यानां कर्मणां क्रमेण नामोल्लेखः,
वैतानसूत्रविहितानि ब्रह्मादीनां कर्माणि,
नक्षत्रकल्पोक्तानि कर्माणि,
आङ्गिरसकल्पे गदितानां कर्मणां समाख्यानम्,
शान्तिकल्पोदितानि कर्माणि,
राज्याभिषेकोपयुक्ता अनुष्ठानविधयः,
नित्यनैमित्तिककाम्यभेदेन कर्मणां त्रैविध्यम्,
आथर्वणकर्मणामाज्यतन्त्रपाकतन्त्रेति भेदाद् द्वैविध्यप्रतिपादनम् इति ।

एतेषां विषयाणां पर्यालोचनेनेदं स्पष्टं प्रतीयते यद् भूमिकायां न केवलं सामान्य एव विषयाश्चर्च्यन्तेऽपि तु गभीराः शास्त्रार्थपराः खण्डन-मण्डनात्मका विचारा अपि प्रस्तूयन्ते । सैषा भूमिका-पद्धतिरग्रेऽपि प्रसृतिं प्राप्ता । सायणस्यैतेषूपोद्घातेषु प्रारम्भे पद्यानि सन्ति ततः परं च गद्यम् । एवमेव श्रीदयानन्दमहर्षेः 'ऋग्वेदादिभाष्यभूमिका'यां महर्षिणा वेदविषयिण्यः समग्रा धारणा वैशद्येन निरूपिताः । तथैव श्रीकपालिशास्त्रिणाऽपि "वेदगुप्तार्थसिद्धाञ्जन"स्य ऋक्संहिताभाष्यस्य भूमिका'ऽपि सुदीर्घा निर्मिता । यस्याः प्रारम्भे चतुश्चत्वारिंशदुत्तरैकशत-

श्लोकाः सङ्ग्रहरूपेण रचिताः। ईदृशीनां भूमिकानां परिगणना 'रचनान्तर्गता भूमिका' इति रूपेण कर्तुं शक्यते। एवमेवेतरेषु वैदिकग्रन्थेष्वपि भाष्य-वृत्ति-टीका-चूर्णि-कारैः प्रस्तावनारूपेण लिखितमेवेति तत्तद्ग्रन्थपर्यालोचनेन ज्ञायतैव।

एवमेवाथवा किञ्चिद् न्यूनाधिकरूपेण 'रचना-बाह्या भूमिका' अप्यतीव प्राचीनकालाद् (प्रायो मुद्रणविधिप्रारम्भकालाद्) विरच्यन्ते। एतासु मुख्यरूपेण तु पूर्वोक्ता एव विषया आद्रियन्ते परं नवीन-प्रविधिगतज्ञानप्रचलनेन तथा सम्पादन-कर्मगत-नानाविधबाह्यान्तर्विषयविचारागमेन बहवो नवीना मार्गा उद्घाटिताः। एतेषु मार्गेषु विहरन्तो भूमिकाकारा अपि वैदिक-संस्कृत-वाङ्मयस्य प्रकाशितेषु ग्रन्थेषु भूमिकाः प्रास्तुवन् यत्र मुख्यरूपेण प्राप्तानां पाण्डुलिपीनां हस्तलेखानां पाठमेलन-पाठसंशोधन-मूलभाष्यादिसम्मिश्रितपाठानां पृथक्पृथक्करण-पाठान्तरण-पाठान्तरसङ्ग्रहण-तद्विषय-कौचित्यानौचित्यविवेकपूर्वकं-वास्तविकपाठ-निर्धारणादिविषयानवलम्ब्य लिखन्ति। वैदिकसाहित्यस्य सम्पादनं नितान्तं कठिनं विद्यते। यतो हि तत्साहित्यं नाना विधाभिः संश्लिष्टं सत् स्वरभेद-शाखाभेदोच्चारण-भेदादिकारणैरतीव दुरूहमिव विद्यते[1]। अत्रैव प्रस्तावनायां सम्पादनकर्मणि सम्प्राप्तानां काठिन्यानामुदाराणां सहयोगानां च प्रकटनमपि कुर्वन्ति विद्वांसः।

आधुनिकदृष्ट्या सम्पादितस्य महर्षिदयानन्दरचितभाष्यस्य पण्डितब्रह्मदत्त-जिज्ञासुलिखिताया भूमिकाया[1] विषया अपि निदर्शनायात्र यथावद् हिन्द्यामेव प्रस्तूयन्ते।

(यजुर्वेदभाष्य-विवरण-भूमिका की विषय-सूची)

वेद का प्रादुर्भाव,
ईश्वर और वेद का सम्बन्ध,
ईश्वरीय ज्ञान की आवश्यकता,

(१) सृष्टि के आरम्भ में ज्ञान मिलना आवश्यक है
(२) बाह्यज्ञान के बिना नैसर्गिक ज्ञानमात्र से काम नहीं चल सकता
(३) उपर्युक्त विषय में अन्य रीति से विचार

---

१. अयं ग्रन्थः, अमृतसरीय—रामलालकपूरट्रस्टसंस्थया वाराणस्यां मुद्रयित्वा १९५९ तम ईसवीयवत्सरे प्रकाशितः।

आर्षीसंहिता और दैवतसंहिता

वैदिक छन्दोवाद

छन्दोभेद के कारण

उपसंहार

इत्थमत्रायं भूमिकाकारोऽनेकान् नवीनान् विषयान् सङ्गृह्य पाठकानां मानसे सन्तोषमेव न तनोति प्रत्युत वैदिकवाङ्मयमवलम्ब्य विहितानां विधीयमानानां च विचाराणां परिशीलनायापि तेषामुत्साहाभिवृद्धिं करोति ।

एवमेव नानास्थलेभ्यः प्रकाशनं प्राप्तं ब्राह्मणारण्यकोपनिषद्गतं साहित्यं पुरस्कुर्वन्तो विचक्षणाः सम्पादकाः प्रस्तावना-निबद्धारश्चेयतीमनुशीलनसामग्रीं तत्र स्थापयन्ति यस्याः पर्यालोचनेनैव पाण्डित्य-प्रतिभा स्फूर्तिं गच्छति ।

लौकिकसंस्कृतवाङ्मये प्रस्तावना

लौकिकसंस्कृतवाङ्मयारम्भः किल वाल्मीकिरामायणादेव मन्वत इतिहासविदः । रामायणारम्भे 'मूलरामायण'नाम्ना 'शतश्लोकी'भागो विद्यते, यत्र समग्रस्य रामचरित्रस्याकलनं विहितं महर्षिणा । तदपि मन्ये प्रस्तावनारूपमेव । किञ्चैकतो गतेषु वर्षेषु रामायण-महाकाव्यस्यास्य सम्पादनं वटपुर(बड़ौदा)नगरात् सञ्जातम् । तस्य प्रकाशने कियान् श्रमः सम्पादकैः संशोधकवर्यैश्चाहित इत्यपि ज्ञातव्यमस्ति । विविधप्रान्तेभ्यो विदेशेभ्यश्चापि रामायणस्य हस्तलिपिग्रन्थान् संगृह्य तेषां प्रत्येकमक्षरं तुलनात्मकरूपेण परीक्षितम् । शुद्धं मूलं रूपं च तस्य निर्णीय तत्क्रमशः प्रकाशितम् । एवमेव परतः पुण्य(पूना)—नगरे महाभारतस्याष्टादशसु भागेषु प्रकाशनमपि महत्कार्यमभूत् । अस्य सम्पादनकलामधिकृत्य श्रीयुत पी. एल. वैद्यादिभिर्बहु लिखितं मार्गदर्शनं च विहितम् ।

साहित्यशास्त्रग्रन्थेषु भरतप्रोक्तं 'नाट्यशास्त्रं' प्राथमिकतां भजते। अस्मिन् शास्त्रे 'प्रस्तावना'शब्दस्य नाट्ये किमर्थकः प्रयोग इति विशदीकृतम् । तदनुसारं लक्षणं चेत्थमस्ति—

''नटी विदूषको वाऽपि पारिपार्श्वक एव वा ।
सूत्रधारेण सहिताः सँल्लापं यत्र कुर्वते ॥
चित्रैर्वाक्यैः स्वकीयोत्थैर्वीथ्यङ्गैरन्यथापि वा ।
आमुखं तद्धि विज्ञेयं नाम्ना प्रस्तावनाऽपि सा ॥'[1]

एवं प्रस्तावनायामत्र सूत्रधारः प्रस्तोष्यमाणस्य नाटकस्य कारणं कर्तारं नाटककथानकं च सँल्लापमाध्यमेन सूचयति तथा 'स्वकार्योत्थ-वीथ्यङ्गवाक्यानि चित्रवाक्यान्यन्यानि वा' तत्साधकानि भवन्ति ।

---

१. नाट्यशास्त्रम्, अ० ३१, पद्ये २८-२९ तमे ।

एवमामुखापरपर्याया चेयं प्रस्तावना साहित्यशास्त्रे नाट्यविधानान्तर्गता १—उद्घात्यक २—अवलगित ३—कथोद्घात ४—प्रयोगातिशय ५—प्रवर्तकादि-पञ्चभि रङ्गैरञ्चिता दृश्यते। प्रत्येकमङ्गञ्च क्वचिदनवगतार्थानां पदानां प्रश्नैः समाधानं, क्वापि पात्रसंसूचनार्थमालापः, कुत्रचिद् वाक्यस्य वाक्यार्थस्य वा माध्यमेन पात्रप्रवेशः, कुत्रात्रि प्रयोगे प्रयोगसमावेशः, कुहचन च कालकृत्यसमाश्रय इत्यादयो विषय आद्रियन्ते।[1]

एत एव विषयः संहृत्य कालान्तरे ग्रन्थप्रस्तावनादौ सामान्य-विशेषरूपेण वा प्रणयनपदवीमाढौकिताः। साम्प्रतं वैदेश्यविद्वत्प्रभावपारवश्याच्च मन्ये सैव नाटकीया प्रस्तावना बहुरूपिणी सती ग्रन्थानां परिचायनेन चित्रयति चेतांसि सचेतसाम्।

इमाः प्रस्तावना ग्रन्थविषयाननुसृत्य बहुप्रकारिका भवन्ति। यथाग्रन्थविषयं च तत्तद्विषयाणां विवेचनं च पुरस्कुर्वन्तीति प्रागेवावोचाम।

साहित्यिकी प्रस्तावना

'लक्ष्यानुसारीणि लक्षणानि निर्मीयन्त' इति लौकिकीं प्रथितिमनुसृत्य

---

१. **प्रस्तावनाङ्गानि यथा**— 'अस्या अङ्गानि उद्घात्यावलगितके द्वे, 'वीथ्याः कथोद्घात–प्रयोगातिशय–प्रवर्तकाः। अस्यैवाङ्गानि त्रीणि। एवं पञ्चाङ्गानि।

उद्घात्यकम्—पदान्यनवगतार्थानि प्रश्नेनावगतार्थैः पदैः प्रतिपादयतीति यत्तदुच्यते।

अवलगितम्—पात्रसंसूचनार्थं यदालपनं तद् द्रष्टव्यम्।

कथोद्घातः— यत्र सूत्रधारस्य वाक्यं वाक्यार्थं वा गृहीत्वा पात्रं प्रविशति।

प्रयोगातिशयः— प्रयोगे तु प्रयोगं तु सूत्रधारः प्रयोजयेत्। ततश्च प्रविशेत् पात्रं प्रयोगतिशयो हि सः॥

प्रवर्तकः—कालकृत्यं यदाश्रित्य सूत्रधारः प्रवर्तते।
तदाश्रयस्य पात्रस्य प्रवेशस्तु प्रवर्ततेः॥

नाटकलक्षणरत्नकोशः पृ० ११९—१२३

किञ्च प्रस्तावनालक्षणस्य मूल-पद्ययोर्वीथ्यङ्गसूचनानुसारं नालिकाया अप्यत्र समावेशो भवति, यस्यां प्रहेलिकारूपेण प्रश्नोत्तराणि सम्पाद्यन्ते। वर्तमानप्रस्तावनास्वपि प्रहेलिकाः प्रश्नोत्तराणि च क्रियन्त इति।

साहित्यिक-प्रस्तावना-लक्षणाय वयं विचक्षणविनिर्मितप्रस्तावना लक्ष्यीकुर्मः । ता एताः प्रस्तावनाः प्रायेण ग्रन्थस्याकारं महत्त्वं व्यापकत्वं विषयं तद्गतगूढताञ्चावधार्य विलिख्यन्ते सुधीभिः । अत एव भवन्ति ताः क्वापि लघीयस्यः क्वचिच्च महीयस्यः । लेखका अपि तत्र हेतवः । यावती तस्य प्रज्ञा यादृशी तस्य चिन्तनशक्तिर्यादृशश्च तस्य स्वाध्यायः । मुद्रणस्थानसङ्कोचं विना प्रसृता प्रस्तावयितुर्भारत्या सत्यमेव नानात्वं भजते प्रस्तावना ।

तत्र हि प्राधान्येन प्रस्तावयितारस्त्रिधा मिलन्ति १. लेखकाः २. सम्पादकाः ३. समालोचकाश्च ।

तेषु चापि प्रत्येकं प्रस्तावनाकारो मनोव्यापारदृष्ट्या वस्तुज्ञान-(Cognition)-चिन्तन (Thinking)—वस्तुलाभ (Aequisition) रूपाणां विचाराणां प्रकाशनाय यतमानः १—संशोधनात्मिकां २—सङ्कलनात्मिकां ३—रसग्रहणात्मिकां वा प्रस्तावनां प्रस्तौति । तत्रापि प्रत्येकं प्रस्तावना तार्किकदृष्टिशालिनी सती १-शास्त्रीया सौन्दर्य-दृष्टिशालिनी च सती २-कलात्मिकेति निगद्यते ।

इमा अपि पुनः प्रत्येकम्—आत्मनिष्ठा वस्तुनिष्ठाश्च गदितुं शक्यन्ते । एवं द्वादश प्रकाराः सामान्येनाकलयितुं शक्ता अपि क्रिया—कारक—कारण—करणा-दिभिर्वैविध्यं भजमाना नानात्वं संश्रयन्ते, तत्र विवेचका एव प्रमाणम् ।

भवन्ति चात्र प्रस्तावनालेखकस्य कार्याणि—१–विषयावतारः, २–विषयप्रवेशः, ३–विषयकथनं, ४–विषयविवरणञ्चेति । विषयसम्बन्धावान्तरज्ञप्ति–स्वरूपप्रकाश–गुणदोषविवेचन–व्यक्तिदर्शन–महत्त्वमापन–विभूति पूजा–प्रभृतीनि कर्माणि च तत्राऽन्तरङ्ग–बहिरङ्गपरीक्षाक्षमतामुत्पादयन्ति । किञ्च न्यायाधीश इव ताटस्थ्येन सत्यासत्ये विवेचयन्, बलाबले तुलयन्, नीरक्षीरमिवोचितानुचिते विमलयन्, विवादस्थ-लानि चिकित्सक इव विमर्शयन् प्रस्तावकः प्रस्तावनां सम्पादयति । ग्रन्थकर्तुर्व्यक्तित्वं यथा स्फुरेत् तथा वर्तनमेव भवति बीजं प्रस्तावनायाः ।

अद्य यावन्न निर्मितं केनापि प्रस्तावनाशास्त्रम् । न वा कान्यपि लक्षणानि सन्ति सुतरां निर्धारितानीति लेखकाधीनतैव तत्र तत्र प्रतीतिपथमायाति । वैदिकादि-ग्रन्थानामिवैव साहित्यग्रन्थेष्वपि प्रस्तावनालेखकः स्वदृष्ट्याः स्पष्टतां प्रदर्शयति, तत्र च विशिष्य रचनाया मनोभूमिमवतारयन् किं किं कथङ्कारं साधितं किञ्चाभिप्रेतं; के

वाऽऽदर्शास्तस्मिन् स्वीकृता इत्यादि विस्पष्टयति। सम्पादकस्तु यदि नाम प्राचीनः कोऽपि ग्रन्थो भवति तदा तदादर्शप्रतीनां विवरणं, समीक्षापुरस्सरं पाठस्वीकारः, पाठपूर्तेरन्यान्युपादानानि, अन्ये ग्रन्थाः, इतरग्रन्थगतान्युद्धरणानि, समानाः पाठाः, पूर्वसम्पादितपाठानां योगः, प्रतिकूल-पाठांशानां त्यागः, लिपिदोषस्य कारणात् परिहेयाः पाठाः, व्याकरणस्यापप्रयोगाः, आर्षप्रयोगाः, शब्दान्तराणि च यथायथं प्रस्तौति। समालोचकश्च पाठानुसन्धान–भाषान्तरणसमीक्षापूर्वकं गुणदोष–विवेचनं विधाय कर्त्तव्यनिर्देशं सूचयति।

एवं सकलस्याप्यस्य कर्त्तव्यजातस्य स्वारस्यं पाठकानामुपरि निर्धारितं तिष्ठति। पाठकाश्च त्रिविधा भवन्ति। **यथोक्तं निशीथचूर्णौ–**

पुरिसो तिविहो परिणामगो अपरिणामगो अतिपरिणामगो तो एत्थ।

अपरिणामग–अतिपरिणामगाणं पडिसेहो।

एतदनुसारं १–परिणामकः २–अपरिणामकः ३–अतिपरिणामकश्च सन् पुरुषः पाठकस्त्रैविध्यं भजति। **परिणामकः**=परिपक्वबुद्धिशाली पाठको विषयावगाहनपूर्वकं प्रस्तावनामाध्यमेन ग्रन्थान्तर्निहिततत्त्वं परिचिनोति। **अपरिणामक**कोऽपरिपक्वबुद्धेः कारणात्, अतिपरिणामकश्च कुतर्कपूर्णाया बुद्धेः सत्त्वात् न भवतोऽधिकारिणौ। एतादृश्या प्रस्तावनया पाठकस्य मन आकृष्टं भवति भूयोभूयः पठनाय मननायात्मसात्करणाय च तदन्तरीहृत इति स्पष्टमेव प्रस्तावनाया ऐदंयुगीनं माहात्म्यम्।

साहित्यशास्त्रीयग्रन्थानां परिशीलनेन ज्ञायते यद् यथा साहित्यिकः स्वीयरचनाविषये स्वतन्त्रः सन् सूत्रपद्धतिं परिवर्ज्य विशदप्रसारवर्तीं रचनां प्रस्तौति तथैव प्रस्तावनास्वपि सुदीर्घः प्रसारः समादृतो दृश्यते। काव्यप्रकाशस्य टीकाकारः श्रीवामनाचार्यो झलकीकरोपाह्वस्तद्ग्रन्थस्य प्रस्तावनायां समग्रस्यालङ्कारस्य संक्षिप्तां प्रवृत्तिं ग्रन्थान् ग्रन्थकारांश्च विवृण्वानो मम्मटस्य काव्यप्रकाश-विवरण-व्याख्याकर्तॄणां परिचयं चापि प्रादात्। एवमेषा प्रस्तावनाऽतीवोपयोगिनी समभवत्।[1]

---

१. एवमेवास्माभिरपि श्रीमद्यशोविजयोपाध्यायविरचितटीकासहितस्य द्वितीय-तृतीयोल्लासात्मकस्य काव्यप्रकाशस्य सम्पादनप्रकाशनमधिकृत्य तत्र विशदरूपेण **'उपोद्घातः'** संरचितः। तस्मिन् प्रायः षण्णवतिपृष्ठात्मके विवरणे काव्यशास्त्रविषयक-विवेचनेन सहैव 'जैनविद्वद्भिः प्रणीतानां काव्यशास्त्रीय-

महामहोपाध्याय-पाण्डुरङ्गवामनकाणेमहोदयानां साहित्यदर्पणस्य भूमिकाऽपि काव्यशास्त्रस्येतिवृत्तं महताऽऽटोपेन पुरस्कृतवती। किञ्च सैवाग्रे 'संस्कृतकाव्यशास्त्रस्येतिहास'रूपं धृत्वा विदुषां मनांसि रञ्जयति। वामनीय-काव्यालङ्कारस्याचार्य-विश्वेश्वर-प्रणीतानुवादसहितस्य प्रकाशने डॉ० नगेन्द्रमहाभागेनापि तदीया प्रस्तावना सुदीर्घा प्रस्ताविता। आचार्यो विश्वेश्वरश्चापि स्वीये काव्यप्रकाशीयहिन्द्यनुवादसंयुते ग्रन्थे काव्यशास्त्रैतिवृत्त-विच्छित्तिसंवलितां प्रस्तावनां प्राणैषीत्। इत्थ प्रस्तावना-परम्परायाः प्राधान्यमिव साम्प्रतिके काले प्रवृत्तं प्रतीयते। अद्य किलाध्येतॄणां ज्ञानवर्धनाय यथा विविधाः शास्त्रकोशा ग्रन्थकोशाः पद-पादार्धपद्य-पद्यसूचीरूपाः कोशाः प्राप्यन्ते परं तथा **'प्रस्तावना-कोश'**विषये केषामपि ध्यानं न गतमिति चिन्त्यमेव।

अपूर्वाः प्रस्तावनाकाराः

अस्यामेव शत्यामेके महान्तः प्रस्तावनाकारा अन्येऽप्यस्माकं पुरत आयान्ति। तेषां श्रुतोपासना-परिसरेऽस्ति प्रस्तावनानामतीव महत्त्वम्। अतस्तद्विषयेऽपि लेखनमत्रावश्यकं मन्ये।

'देवसूरतपागच्छ'संरक्षकैः शैलानानरेशप्रतिबोधकैरागममन्दिरादिसंस्थापकैः श्रुतवाहकागमदिवाकर-ध्यानस्थस्वर्गतागमोद्धारकाचार्यवर्य - **श्रीमदानन्दसागरसूरीश्वरैः** स्वीयप्रतिभाबलेनानेकग्रन्थानां निर्मित्या, नैकग्रन्थरत्नानां सम्पादनसम्पत्त्या विविध-ग्रन्थेषु प्रस्तावनोपक्रमोपोद्घातादि-विरचनेन चातिमहती श्रुतोपासना विहितेति परमगौरवास्पदं साहितीसुधास्वादनसंसक्तसचेतसां कृते।

आगमोद्धारकाणामितरत् साहित्यजातं बहुधा तद्विनेयैस्तत्कृपापारावार-तरङ्गितैश्च प्रकाशितं प्रकाश्यते च। सूरीश्वरैरेतैः **त्रिसप्तत्युत्तरैकशतसंख्यकानां ग्रन्थानां सम्पादनमकारि**। प्रकाशनसंस्थाश्च 'श्रीजैनधर्मप्रसारकसभा (भावनगरे), श्रेष्ठिदेवचन्द्रलालभाईपुस्तकोद्धारफण्डसंस्था (सुरते), श्रीआगमोदयसमितिः श्रेष्ठि-श्रीऋषभदेवजीकेशरीमलजीत्याख्या पेढी च (रतलामनगरे), श्रीसिद्धचक्रसाहित्य-प्रचारकसमितिः (मोहमय्यां), श्रीजैनानन्दपुस्तकालयः (सुरतनगरे), श्रीजैनपुस्तक-प्रचारकसंस्था (सुरते), देवकरणमूलजीप्रकाशनं (नवसारीनगरे), नवपदाराधकसमाजः

ग्रन्थानां परिचयः काव्यप्रकाशस्य चाद्य यावदुपलब्धानां टीकाकृतां परिचयो विशिष्य प्रस्तुतः।

(मोहमय्यां), यशोविजयजैनपाठशाला (महेसाणा)" प्रभृतय आसन् । समग्रेऽपि भारत-भूमण्डले पादचारं विहृतवतां सूरीश्वराणां सम्पादनेषु प्रस्तावनानां संयोजना महत्त्वपूर्णाः सन्ति । तत्र तत्र प्रस्तावनासु तेषामपूर्वश्रुतपारगामित्वं विवेचनगाम्भीर्यं समालोचनौदार्यं पाठसन्धानपाण्डित्यं भावाविष्करणवैचित्र्यं गीर्वाणवाणीवैदुष्यं च पुरः पुरः परिस्फुरल्लक्ष्यते ।

मा स्म भूवन् वञ्चिताः साम्प्रतिकाः सुरसरस्वतीसमाराधनतत्परा अपि तेषाममोघप्रतिभा-प्रसूतसाहित्यादिति धिया तेषामेव विनेयपरम्परापथिकैः व्याकरण-न्याय-ज्योतिषाध्यात्म-प्राच्यार्वाच्य-विज्ञानविद्यानदीष्णैः, **श्रीमदुपाध्यायधर्मसागरमहाराजानां** चरणोपासकैः **श्रीमदभयसागरगणिभिः** प्राथम्येन **'आनन्दरत्नाकर'**नामकः प्रस्तावना-सङ्ग्रहोऽपि ग्रथितः ।

प्रथम-विभागाऽऽत्मके एतस्मिंश्च प्रकाशने सन्ति पञ्चदशसङ्ख्याकाः प्रस्तावनाः सङ्गृहीताः ।

एतासु १—आगम—२—भक्ति ३—श्रावकधर्म ४—प्रकरणसिद्धान्त ५—योगशास्त्र ६—अध्यात्मचर्चा ७—न्याय ८—कर्मसाहित्य ९—साहित्य १०—पौराणिकसमीक्षाविषयकग्रन्थानां प्रकाशननिमित्तमाकलय्य सूरिपुरन्दरैरेताः प्रस्तावना लिखिताः सन्ति । तत्रापि **प्रस्तावना-उपक्रम-उपोद्घात** इति त्रीणि नामानि स्वीकृतानि ।

प्रस्तावना-लेखने श्रीजुषामेषां **पद्धतिः** प्रायेणैवंरूपा —

१—**आगमप्रस्तावनायां**— ग्रन्थवाचनप्राचीनत्वं, चूर्णि-टिप्पणादिपरिचयः, विवादस्थानानि, तत्समाधानानि विशेषाववेयञ्चेति ।

२—**भक्तिसाहित्योपक्रमे**— आगमावश्यकता, महिमा, वाचना, धर्मजिघृक्षुता, मुनिप्रभावः, कोशनिर्माणं, तात्कालिकी स्थितिः, प्रकाशनव्यवस्था, ग्रन्थकारपरिचयः, समयादिनिर्णयः, ग्रन्थपरिचय आदर्शप्रतिसूचनञ्चेति ।

३—**प्रकरणसिद्धान्तप्रस्तावनायां**— आगमाकर-प्रकरणकर्तृपरिचयः, ग्रन्थ-कारपरिचयः, विवरणकारसूचनं, ग्रन्थपरिचयः, प्रकाशनव्यवस्थासूचना चेति ।

४—**योगशास्त्रीयोपोद्घाते**— ग्रन्थरचनाविषयकप्रश्न-कालनिर्धारण-परकथन-खण्डन-प्रमाण-स्वनिर्णय-ग्रन्थपरिचयादयः ।

५—**अध्यात्ममतपरीक्षोपक्रमे**— श्वेताम्बर-दिगम्बर-द्वैधीभावं परिचाय्य विविधानन्यान् वादान् विविच्य, ग्रन्थनिर्माणकारणमुद्धृत्य, ग्रन्थकारकालः, ग्रन्थपरिचयः, विशेषसूचनाः प्रतिसूचनाश्च प्रतिपादिताः ।

६—**स्याद्वादभाषाप्रस्तावनायां**— ग्रन्थमुद्रणप्रयास-मुद्रापणकारण-ग्रन्थकार-कालानुमान-ग्रन्थनामयाथार्थ्य-ग्रन्थकारकृतान्यकृतिपरिचयादयः ।

७—**कर्मग्रन्थ - कर्मप्रकृत्योरुपोद्घातयोः**— इतरधर्मानुयायिनामदृष्टस्वीकारः, कर्मनिबन्धनं, मोक्षचर्चा, ग्रन्थप्रणयनौचित्यं, ग्रन्थावश्कता, प्रकरणानुसारी ग्रन्थपरिचयः आत्म-विचारः, परेषां मतखण्डनं, ग्रन्थकृत्परिचयस्तत्कृतयश्चेति ।

८—**साहित्यग्रन्थचतुष्टय्याः प्रस्तावनासु**— ग्रन्थ-ग्रन्थकार-महिमा, गुरुपरम्परा, ग्रन्थपरिचयः, शब्द-लिङ्ग-काव्य-छन्दोनुशासनानामावश्यकता, आक्षेपनिरासः, प्रति-सूचना, उपक्रमपूर्तिः, छन्दोनाम्नां मत-मतान्तरविवेकश्चेति ।

९—**पौराणिकसमीक्षारूपप्रस्तावनायां च** — धर्मविचारः ग्रन्थकार-परिचयः, ग्रन्थपरिचयादयश्च निपुणं प्रतीतिपदवीमानीताः ।

यत्र तत्र वृत्तिकार-विवरणकार-ग्रन्थसम्बन्ध्यन्यसूचनानि पुरस्कृत्य सूरीश्वरैरेतैः **प्रस्तावना**-शब्दस्य सत्यमेव सार्थकता सम्पादिता ।

शाब्दे ब्रह्मणि साधिकारवचसां लघीयस्यामपि रचनायां पदघटाटोपः, काव्य-बन्धुरो बन्धः, सुघटितव्युत्पत्तिशक्तिप्रभा च सावष्टम्भं मुखरीभवन्ति । अत एव तेषां प्रस्तावनानां भाषाऽपि मञ्जुलाऽस्ति । श्रूयते किल श्रीमदानन्दसागरसूरिपुरन्दराणां जिह्वाऽजिरे क्रियाकलापविपुलः सर्वोऽपि धातुगणो विराजते स्म, सर्वास्तद्धितवृत्तयः कण्ठस्थिताः क्रीडन्ति स्म स्वान्तान्तरालाम्बरे च प्रत्ययवद्घटिताः कृत्संज्ञा विलसन्ति स्मेति ।

अत एव प्रत्येकं प्रस्तावनायामत्र वयं सुपर्वसरस्वत्याः कमपि विरलं प्रवाहं विलोकयामः । भाषाप्रवाहेऽत्र सानुप्रासाः शब्दाः, यङ्लुगन्तसिद्धाः क्रियाः, समाससन्दृब्धानि वाक्यखण्डानि क्वचित् क्लिष्ट-प्रयोगाः, सम्प्रदायसिद्धान्त भूयिष्ठा पदावलिः शास्त्रकोटिमधिश्रितो वर्णविन्यासोऽनतिप्रसिद्धशब्दावलिप्रयोगाश्च परिलक्ष्यन्ते ।

कवीनां निकषभूते गद्ये विद्याऽनवद्या द्योतते, हृद्या पद्या माद्यति, यद्यप्यद्यावद्य गद्यते दीर्घ-दीर्घतरसमासशालि गद्यं तथापि सुबन्धु-बाण-दण्डि-सोड्ढल-धनपा-

लादीनां गद्यमिव कापि चित्रा गद्यगवी श्रीमदागमोद्धारकलेखितासु प्रस्तावनासु निर्वर्ण्यते ।

एकतश्चूर्णकाभिधं[1] गद्यं चमत्करोति चित्तं, परतश्चोत्कलिकाप्रायं[2] दीर्घ-समासाश्रयं गद्यं च सन्तानयति चेतःप्रह्लादनम् । मुक्तक-वृत्तगन्धिगद्ययोरपि निपुणोप-

---

१. २. **साहित्यदर्पणस्य** षष्ठे परिच्छेदे गद्यलक्षणं यथा—

वृत्तबन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च ।
भवेदुत्कलिकाप्रायं चूर्णकं च चतुर्विधम् ॥३३०॥
आद्यं समासरहितं वृत्तभागयुतं परम् ।
अन्यद् दीर्घसमासाढ्यं तुर्यं चाल्पसमासकम् ॥३३१॥

चूर्णकादिगद्योदाहरणानि यथा **'वीतरागस्तोत्र'**-प्रस्तावनायाम्—

"—तत्रापि निस्सत्त्वाद् देशस्य अतिह्लसीयस्त्वाद्धर्मबुद्धेः, परायणत्वान्मान-गिर्यारोहे अनवबुद्धत्वात्तत्त्वमार्गस्य, पलायितत्वाज्ज्ञानस्य, व्यापृतत्वादना-र्यभाषारुचेः, तुन्दपरिमृजबहुलत्वाल्लेखकस्य संस्कारहीनतात्वान्मतेः, इत्यादि (मुक्तकाभिधं गद्यम्) ।

दीर्घसमासाश्रयमुत्कलिकाप्रायञ्च गद्यं यथा **कर्मग्रन्थोपोद्घाते**—

'आकलनीयमिदकं कलावत्कलापाकलनीयाऽकल्पऽकलङ्किताऽविक-लापरिकलिताऽऽकल्पाविकलितकीर्तिकन्दकमनोऽनेकान्तप्रकटनकोविदकल्पान्तका-लविशकलिताकारकविकृतानेकाकान्तैकाकान्तर्क्षकान्तिकर्तनविकर्तनश्रीमदकल-ङ्ककलाकल्पिताकलनीयार्थकदम्बकल्पाकर्णकानन्तमकसंस्कारकलितैः,इत्यादि ।
चूर्णकाभिधं गद्यं च तत्रैव—

"भूतिभूषितविग्रहपरिचर्यापराणाम्, मतान्तराविष्टान्तरात्मना, यावतास्तु विवेकमतिवारिधरपवनाभूत्यम्बरं भूभूधरोद्भूतिनिबन्धनतया'— इति वाक्यखण्डानि ।

एवमेव वृत्तगन्धीनि, कलिकारूपाणि, संयुक्तवर्णभूयिष्ठानि च गद्यखण्डानि तत्र तत्रोह्यानि भवन्ति ।

न्यासः 'कलिकेव[1]' कलयति कौतुककमनीयताम् । संयुक्तवर्णेषु 'मधुर-श्लिष्ट-विश्लिष्ट-शिथिल-ह्लादि-वर्णानां[2] नृत्यत्पदप्रायताऽन्त्यानुप्रासनिबद्धो मधुराक्षरसन्निवेशः सङ्गीत-लयलहरी वर्णमैत्रीरूपा झङ्कृतिश्चेति पदे पदे प्रस्फुरन्ति । मध्ये मध्ये देदीप्यमानोऽलङ्कारयोगश्च सौवर्णाभरणे मणिगणानामिव किमप्यपूर्वं वैचित्र्यं पुष्णाति ।

अनुसन्धानवैशिष्ट्यम्

'अब्धिर्लङ्घित एव वानरभटैः, किन्तु तद्गाम्भीर्यं तु मन्थाचल एव जानाति' सेयं किंवदन्ती प्रक्रान्ते प्रस्तावनासङ्ग्रहरूपे **श्रीआनन्दरत्नाकरे**ऽपि सार्थिका भवति ।

यतो हि भिन्न-भिन्नविषयग्रन्थेषु निहितस्य गाम्भीर्यस्याऽमूलचूलं मन्थनं विधायैव श्रीमद्भिरागमोद्धारकैः प्रस्तावना आकलिताः ।

तत्र तास्वनुसन्धानकलाया वास्तविकानि तत्त्वानि, सत्यस्यान्वेषणं, नवीना उद्भूतयः, नूत्नानि तथ्यानि, नवनवा विचाराः, पक्षपातविरहितानि मूल्याङ्कनानि चेति पूर्णरूपेण प्रतिफलितानि विलोक्यन्ते ।

'ग्रन्थकर्तारं प्रति तटस्थदृष्ट्या न्यायदानं सत्प्रस्तावनाया लक्षणम् ।'तत्तथा-भूतमत्रोपस्थापितमिव प्रतिभाति । श्रीमतामनुसन्धानप्रक्रिया चेयं 'क्रियात्मिका' परि-लक्ष्यते ।

यस्यां स्वोद्देश्यं प्रभावशालिन्या पद्धत्या ज्ञानपुरस्सरं समस्यानां, संस्थापना, तासां निदानं, समुचितं समाधानं, अन्वीक्षणात्मिकाः प्रवृत्तयः, परीक्षणात्मिका दृष्टयः,

---

१. कलिकालक्षणं यथाह स्तवमालाभाष्ये जीवदेवः —

कला नाम भवेत्तालनियता पदसन्ततिः ।
कलाभिः कलिका प्रोक्ता तद्भेदाः षट् समीरिताः ।।
कलिका चण्डवृत्ताख्या दिगादिगणवृत्तका ।
तथा त्रिभङ्गीवृत्ताख्या मध्या मिश्रा च केवला" ।।इति ।

२. तत्र संयुक्तवर्णानां नियमो दशधा ते च—

मधुर-श्लिष्ट-विश्लिष्ट-शिथिल-ह्लादिनस्त्वमी ।
भिद्यन्ते ह्रस्वदीर्घाभ्यां ते दृश्यन्ते स्फुटं यथा ।।

— इत्यादि । श्रीगोविन्दविरुदावलीभाष्ये

तुलनात्मक-विकासात्मक-इतिवृत्तात्मक विमर्शाणां सङ्कलनं भ्रमनिरासादयश्च विशिष्य सन्ति ।

श्रीमच्चरणैस्सर्वास्वपि प्रस्तावनासु प्रायः संस्तुतिरूपेण ग्रन्थकृतां ग्रन्थानां च महत्त्वमुपस्थापितं तथा च भाषा-संयमश्च समादृतः । यत्र यत्राऽऽवश्यकताऽभूत् तत्रैवापेक्षितं विवेचनं विहितं, यत्र च सूचनमात्रेण पाठकानां जिज्ञासा पूर्तिमियात् तत्र 'ग्रन्थे द्रष्टव्यमिति' संसूच्यैव संक्षेपितम् । बहुत्र ग्रन्थस्य प्रतिप्रकरणं परिचायितं तत्तद्विषयसंक्षिप्तिका च परिदर्शिता । तुलनादृष्ट्या छन्दोनुशासनदर्शितनाम्नामन्याचार्यसूचितनाम्नां च तालिका प्रकाशिता ।

'अनन्ता हि वाग्विकल्पाः' इति दृष्ट्या सर्वेऽपि वाग्व्यवहारा आनन्त्यं धारयन्ति विपश्चितश्च तांस्तान् व्यवहारान् कौशलेन प्रकटयन्तो विविधान् मार्गानाश्रयन्ते । भवन्ति च ते निबन्ध-प्रबन्ध-मुक्तक-महाकाव्य-कथानिकाऽऽख्यानादिरूपाः, परं श्रीमदागमोद्धारकसूरिपुङ्गवैरेकोऽनुपम एव मार्गः स्वीकृतः । यस्मिन्—

नानाग्रन्थरत्नानां वैकटिकरूपेण शाणपरीक्षणमातन्वद्भिरनेकाः प्रस्तावनाः प्रस्ताविताः । आसँस्ते महान्तो भाग्यशालिनो येषां लेखिनीसंस्पर्शेण चिरं सुषुप्तिं संश्रिता भूयांसो ग्रन्थाश्चेतनाप्रकाशं लब्धवन्तस्तत्प्रकाशपुञ्जश्च **'आनन्दरत्नाकररूपेण'** सङ्गृहीतो विद्यते ।

सूरिवर्यैः प्रस्तावनानां माध्यमेनालोचनाया निकषेषु क्रमशः १—सिद्धान्त २—नियम ३—आदर्शाणां प्रामुख्यं बुद्धिसात् कृत्वा कृतीनां गुणदोष-विमर्शपूर्वकं विश्लेषणं च विधाय पाठकेभ्यो यो दायः पुरस्कृतः स हि **"पाठकानां चेतनाजागरणं तेषां ज्ञानसम्पदोऽभिवर्धनं, साहित्यिकाभिरुचेरुद्बोधनं, धार्मिक-सांस्कृतिकसुरुचीनां विकासः साहित्यस्य तत्कलायाश्च प्रोत्साहनम्, साहित्यसृष्टये प्रेरणाप्रदानं, कुत्सितायाः प्रवृत्तेरवरोध'** इत्यादिरूपेण विश्राणितोऽयः महार्घनिधिरूपेण विद्योतते ।

अस्यैवानन्दरत्नाकरस्य सङ्कलनस्यैकं विशिष्टं स्थानं संस्कृतसाहित्ये विद्यते । मन्येऽद्य यावदेकमपि पुस्तकमीदृशं न प्रकाशितचरम् । साहित्यकोटौ या विविधा धारा वर्तन्ते, तासु धारासु विरलं स्थानं **'प्रस्तावनाधारायाः'** अस्ति ।

किञ्च प्रस्तावनानामैवैको ग्रन्थः सङ्कलितः स्यात्, स चापि द्वि-त्रि-खण्डेषु प्रकाशितो भवेदिति तु सर्वथा विस्मयावह एव । विविधेषु प्रकाशितचरेषु ग्रन्थेषु

प्रस्तावनारूपेण विकीर्णानामासां साहित्यसृष्टीनामेकत्र सङ्कलनं भविष्यतां विपश्चितां कृते महदुपयोगि स्यादिति कल्याणकामनया **श्रीमद्धर्मसागरोपाध्यायचरणोपासक-श्रीमदभयसागरगणिभिरिदं** प्रयतितम् । प्रथमखण्ड-रूपेण चात्र पञ्चदश प्रस्तावना आकलिताः ।

प्रस्तावनानां 'आनन्दलहरी'नाम्न्यष्टिप्पण्यः

इदमपरमस्य ग्रन्थस्य वैशिष्ट्यं यदत्र प्रस्तावनासु वर्णितानां विषयाणां सम्यगवबोधनाय ग्रन्थसम्पादकैरेव 'आनन्दलहरी'नाम्ना टिप्पण्य आलिखिताः ।

प्रायेण प्रस्तावनाकारः सारल्येन ग्रन्थगतस्वारस्यं पाठकानां पुरस्तात् पुरस्कर्तुमेव प्रयतते,

नतमां तत्र काठिन्याशङ्का भवति; परं शास्त्रपारावारपारीणा भावा अपि यस्यां भाषायामवतरन्ति तेषु सामान्यवाचकानां मनीषा कादाचित्कतया विशिष्टेषु स्थलेषु रूढासु पदावलीषु कुण्ठतां व्रजत्येव, सन्ति चात्रापि बहूनि स्थलानि व्याख्या-सापेक्षानि, इति सकलं सञ्चिन्त्यैव प्रस्तावयितॄणां हार्दमविकलं सरलया सरण्या हृद्गतं कारयितुं टिप्पणी-विरचनमभूत् ।

टिप्पण्यामस्यां परमया श्रद्धया, गभीरया धिया, सूक्ष्मेक्षिकया च सूचनानि कृतानि सन्ति यानि निश्चितमेव विदुषां तोषाय भविष्यन्तीति न प्रत्ययः ।

टिप्पणी-गौवरम्

श्रीमदभयसागरगणिभिरत्र टिप्पण्यां प्रतिस्थलं सङ्ख्यानिर्देशपुरस्सरं सर्वविध-सौविध्याय निम्नलिखिताः प्रक्रियाः स्वीकृताः—

१. सम्बन्धसूचनम्, २. प्रसङ्गनिर्देशः, ३. उद्धरणप्रसङ्ग-विषयादिसूचनम्, ४. पर्यायशब्दाः, ५. पदनिष्पत्तयः ६. अर्थानुसारिण्यन्वयसङ्गतिः ७. अन्वयनिरूपणम्, ८. समस्तपदानां विग्रहाः, ९. अर्थविवक्षाविवेकः, १०. विशिष्टाभिव्यक्तिः, ११. सर्वनामपदावबोधनम्, १२. सन्धिच्छेदाः, १३. पदसिद्धयः, १४. विशेषणनिर्देशाः, १५. विविधार्थविवेकाः, १६. स्वसम्प्रदायानुसारिणी व्याख्या १७. सूचितोद्भावनम् १८. ऐतिह्यविमर्शः, १९. उद्धरणपूर्तयः, २०. विविधपाठसूचनानि २१. भावार्थाः, २२. ध्वनितार्थाः, २३. मान्यतानिदर्शनमित्यादयः ।

एवं सुवर्णे सौरभमिव टिप्पण्य इमा वैदुष्यपूर्वकेण विमर्शेणापूर्वंगौरवं धारयन्तीति नात्र शङ्कापङ्कावकाशः ।

उपसंहारः —

एवमस्ति समस्तेऽपि ग्रन्थजगति प्रस्तावनानां विपुलो विस्तारः। तासां प्रक्रिया अपि भूयस्य आविष्कृता लेखकैः सम्पादकैश्च। प्रत्येकं शोधकर्तुरिदमपि विशिष्टं ज्ञानमावश्यकं मन्ये यत् स प्रारम्भे स्वकीयस्य शोधप्रबन्धस्य वैशिष्टचावबोधाय तत्र प्रस्तावनामपि रचयेत्। किञ्च पठितस्य लेखकस्य शोधविद्यानिष्णातस्य चैतद् बलादापतित कर्मापि गणयितुं शक्यते यत् स प्रस्तावना-विषयकेन वैविध्येन कौशलेन च परिचितः स्यादिति। तत्र "यदि काचन ग्रन्थान्तर्गता प्रस्तावना स्यात्तर्हि सा तु लेखकेन स्वकीयग्रन्थरचनाया मूलाधाररूपेण लिखिता भवेत्, यदि च ग्रन्थबाह्या प्रस्तावना स्यात् तदा समालोचनादि-विषयसङ्कुलिता भवेदिति" निर्गलितोऽर्थः।

संस्कृत-विषयक शोध की प्रगति का सिंहावलोकन

—डा० मण्डन मिश्र

संस्कृत की प्रगति के दो पक्ष हैं—(क) संस्कृत साहित्य और (ख) संस्कृत भाषा। यह तो सर्व विदित ही है कि संस्कृत-साहित्य संसार की किसी भी एक भाषा में उपलब्ध साहित्य की तुलना में अधिक व्यापक है। किन्तु यह भी सही है कि आधुनिक भाषाओं में अब साहित्य का सृजन जितना हो रहा है, उतना संस्कृत में नहीं दिखाई देता।

संस्कृत आधुनिक भाषाओं के माध्यम से

संस्कृत के प्रति अध्येताओं की रुचि और संख्या में ह्रास नहीं हुआ, किन्तु अन्य साहित्यों के रचयिताओं और पाठकों में जो वृद्धि हुई है, वह संस्कृत में नहीं हो पाई। इसका प्रमुख कारण यही प्रतीत होता है कि आधुनिक भाषाओं का सम्बन्ध व्यवसायों से भी है, जबकि संस्कृत का सम्बन्ध प्रमुख रूप से शिक्षा से ही है। इसके अतिरिक्त आधुनिक भाषाओं की आवश्यकताओं की पूर्ति के लिए उन भाषाओं के माध्यम द्वारा संस्कृत से सम्बद्ध विषयों पर लेखन हो रहा है। परिणाम स्वरूप आज हिन्दी और अंग्रेजी प्रभृति भाषाओं के माध्यम से संस्कृत पर जो लेखन कार्य हो रहा है, वह मूलतः संस्कृत में सम्पन्न लेखन से मात्रा की दृष्टि से बहुत अधिक है।

शिक्षण में सुधार की आवश्यकता

संस्कृत से अधिक मधुर तो संसार की कोई भी अन्य भाषा नहीं है, किन्तु जनसामान्य में यह धारणा भी प्रचलित है कि 'संस्कृत बड़ी कठिन है।' इस धारणा के निराकरण के लिए समय-समय पर प्रयास किए जाते रहे हैं। संस्कृत के व्याकरण को सरल करने के लिए आम लोग कहते हैं। इस सम्बन्ध में संस्कृत के क्षेत्र में काम

करनेवाली संस्थाएँ उद्यम कर रही हैं।[1] किन्तु भाषाविज्ञानसम्बन्धी कतिपय प्रविधियों में नवीनता का प्रवर्तन करने के अतिरिक्त अभी संस्कृत की व्याकरणिक प्रक्रिया के सरलीकरण में कोई विशेष सफलता प्राप्त नहीं हुई। राष्ट्रीय अनुसन्धान व प्रशिक्षण परिषद् द्वारा संस्कृत के पाठ्यक्रमों का माध्यमिकशिक्षा के स्तर पर कुछ नवीनीकरण का प्रयास चल रहा है, किन्तु अंग्रेजी में जिस प्रकार की **ग्रेडेड रीडर** हैं, वैसी अभी संस्कृत में नहीं बन पाई हैं। संस्कृत की प्रारम्भिक शिक्षा भी यद्यपि अमरकोश या अष्टाध्यायीमूलक तो नहीं रही, किन्तु यह भी नहीं कहा जा सकता कि उसमें जितने सुधार अपेक्षित थे वे सब हो गए हैं।

संस्कृत का अध्ययन-अध्यापन आधुनिक पद्धति से भारत के प्रायः सभी विश्वविद्यालयों में होता है।

कतिपय ऐसी स्वतन्त्र संस्थाएँ भी संस्कृत के प्राचीन ग्रन्थों के प्रकाशन में सन्नद्ध हैं जिनमें शुद्ध शास्त्र रक्षा का दृष्टिकोण सर्वोपरि है।

भारत सरकार द्वारा विशेष प्रावधान

संस्कृत के विकास के लिए भारत सरकार ने प्रायः डेढ़ करोड़ रुपए प्रतिवर्ष का प्रावधान किया हुआ है। देश के जिन विश्वविद्यालयों में संस्कृत विभाग नहीं थे, वहाँ वे खोले गए हैं। परम्परीण पद्धति से संस्कृत के अध्ययन-अध्यापन की व्यवस्था के लिए 'राष्ट्रीय संस्कृत संस्थान' की स्थापना हुई है। संस्थान के अन्तर्गत पाँच विद्यापीठ चल रहे हैं। जिनमें परम्परीण ढंग से प्रथमा, मध्यमा, प्राक्शास्त्री, शास्त्री, शिक्षाशास्त्री, आचार्य, वाचस्पति तथा विद्यावारिधि की उपाधियों तक के लिए पठन-पाठन की व्यवस्था की जाती है। १९७५-७६ में इन विद्यापीठों में छात्रों की संख्या काफी बढ़ी है। परम्परीण संस्कृत शिक्षा के विकास के लिए केन्द्रीय तथा प्रान्तीय सरकारों द्वारा 'सम्पूर्णानन्द संस्कृत विश्वविद्यालय', वाराणसी, काशी विद्यापीठ वाराणसी, कामेश्वरसिंह संस्कृत विश्वविद्यालय दरभंगा, भारतीय विद्याभवन, बम्बई, गुरुकुल काँगड़ी आदि अनेक संस्थाओं के माध्यम से भी प्रयत्न किए जा रहे हैं।

---

१. इन दिनों विद्वानों ने संस्कृत के व्याकरण में आनेवाली कठिनाइयों को दूर करने के लिए इतने प्रधिक प्रयास किये गये हैं तथा किये जा रहे हैं, जिन्हें देखकर उनकी श्रद्धा, भक्ति और कर्तव्य पर आश्चर्य हुए बिना नहीं रहता। इनका दिग्दर्शन पृथक् लेख का विषय है।

संस्कृत के नवीन प्रकाशन तथा विद्वानों का सम्मान

१९७५-७६ में **सम्पूर्णानन्द संस्कृत विश्वविद्यालय** वाराणसी में रामानन्द वेदान्त की गद्दी स्थापित की गई। श्रावणी पर्व पर संस्कृत दिवस मनाया गया तथा निम्नलिखित विद्वानों को केन्द्र या राज्य सरकार से पुरस्कार प्राप्त हुए—

श्री बलदेव उपाध्याय (अवकाशप्राप्त)
श्री कृष्णदेव
श्री कालीप्रसाद मिश्र
स्व० श्री राजेश्वर शास्त्री द्रविड़
श्री विन्देश्वरी प्रसाद मिश्र
श्री पट्टाभिराम शास्त्री (अवकाशप्राप्त)

नागपुर विश्वविद्यालय नागपुर ने निम्नलिखित ग्रन्थों का प्रकाशन किया

(क) शिवराजाभिषेकम् (सप्ताङ्ककं नाटकम्)।
(ख) समर्पये जीवनम्, सदैव पुरतो चरणम्।
(ग) प्रतापसिंहो जयति नृसिंहः
(घ) गीर्वाणगीतार्चना, श्री रामसंगीतिका, श्री रङ्गसंगीतिका आदि।

इस विश्वविद्यालय के संस्कृत विभाग के अध्यापकों ने यह निर्णय किया कि प्रत्येक अध्यापक सप्ताह में कम-से-कम तीन घंटे छात्रों को संस्कृत माध्यम से पढ़ाया जाएगा।

दिल्ली विश्वविद्यालय, दिल्ली में सं० विभाग के आचार्य डा० सत्यव्रत जी का 'शर्मण्यदेशः सुतरां विभाति' नामक काव्यग्रन्थ और 'महाभारते निर्वचनानि' नामक लेख प्रकाशित हुए तथा संस्कृत विभाग के रीडर डा. कृष्णलाल की 'उर्वीस्वनः' तथा 'अनन्तमार्ग' नामक रचनाएँ प्रकाशित हुई। 'अनन्तमार्ग' पर १००० रु. का पुरस्कार भी डा० कृष्णलाल को उत्तरप्रदेश सरकार से प्राप्त हुआ।

सागर विश्वविद्यालय द्वारा संस्कृत त्रैमासिकी पत्रिका सागरिका में कई महत्त्वपूर्ण लेख प्रकाशित किये गये।

कामेश्वर सिंह संस्कृत विद्यालय दरभंगा, ने 'मनीषा' नामक त्रैमासिक संस्कृत पत्रिका का प्रकाशन किया, पण्डित परिषद् द्वारा विभिन्न शास्त्रीय विषयों

पर संगोष्ठियों तथा समस्यापूर्तियों का आयोजन किया गया।[1]

राष्ट्रिय संस्कृत संस्थान—शिक्षामन्त्रालय, भारत सरकार द्वारा संचालित केन्द्रीय संस्कृत विद्यापीठों द्वारा निम्नलिखित कार्यकलापों का प्रवर्तन किया गया।

१. इलाहाबाद विद्यापीठ में संस्कृत पाण्डुलिपि-विवरणिका का प्रकाशन किया गया।

२. तिरुपति विद्यापीठ में संस्कृत के प्रचार प्रसार के लिए १९७० से रात्रि-कालीन कक्षाएँ चल रही हैं।

३. जम्मू विद्यापीठ में पुजारियों का कर्मकाण्ड के प्रशिक्षण के लिए पाठ्य-क्रम आरम्भ किया गया।

४. पुरी पिद्यापीठ में संस्कृत दिवस आदि पर समारोह मनाये गये।

५. श्री लालबहादुर शास्त्री केन्द्रीय सं० विद्यापीठ दिल्ली द्वारा अब तक अनेक मानक ग्रन्थों का सम्पादन व प्रकाशन किया जा चुका है। पिछले दो वर्षों में प्रकाशित निम्नलिखित ग्रन्थों का संस्कृत जगत् में विशेष आदर हुआ है—

१. महामहोपाध्याय श्री परमेश्वरानन्द स्मृतिग्रन्थ
२. महावीरपरिनिर्वाण स्मृतिग्रन्थ, प्रधान सम्पादक—डा० मण्डन मिश्र
३. महावीरचरितामृतम्—डा० रुद्रदेव त्रिपाठी
४. देवीपुराणम्, सम्पादक—डा० पुष्पेन्द्र कुमार।

विद्यापीठ के उपप्राचार्य तथा राष्ट्रपतिसम्मानित विद्वान् श्री अमीरचन्द्र शास्त्री की निम्नलिखित रचनाओं का भी प्रकाशन हुआ—

१. गुरुमण्डलमण्डनम्	(स्मारिकायाम्)
२. शार्दूलविक्रीडितम्	(अभिनन्दनग्रन्थे)
३. पृथ्वीप्रशस्तिः	(स्मृतिग्रन्थे)
४. गोस्वामिचरितम्	(संस्कृतरत्नाकरे क्रमशः प्रकाश्यमानम्)

---

१. यहाँ संक्षेप में इन दो तीन विश्वविद्यालयों के बारे में ही कुछ लिखा गया है। वैसे भारत और विदेशों के विभिन्न विश्वविद्यालयों में संस्कृत के अनुसन्धान, प्रकाशन, अध्ययन-अध्यापन और व्याख्यानमाला सम्बन्धी बहुत अधिक कार्य हो रहे हैं।

इसी प्रकार डा. रुद्रदेव त्रिपाठी ने भी श्री यशोविजयजी उपाध्याय रचित १२ स्तोत्रों का सम्पुट **'स्तोत्रावली'** तथा २-३ उल्लासों पर इन्हीं के द्वारा लिखित टीका के साथ **'काव्यप्रकाश'** का सम्पादन-प्रकाशन किया है।

'संस्कृत दिवस' प्रभृति समारोहों के आयोजनों द्वारा भी संस्कृत का प्रचार प्रसार किया जाता रहा है। यह विद्यापीठ प्रतिवर्ष 'शारदीय ज्ञान महोत्सव का आयोजन करता है जिसमें प्रख्यात विद्वानों के शोधपूर्ण भाषण होते हैं। १९७५-१९७६ में प्रो. हीरेन मुखर्जी ने **वर्तमान युग के संदर्भ में संस्कृत की उपयोगिता** तथा श्री छज्जूराम शास्त्री जी ने **'साहित्यशास्त्र'** और **'षड्दर्शन परिचय'** पर गवेषणापूर्ण व्याख्यान दिये।[1] शोधकर्मशाला के उद्घाटन के अवसर पर प्रो. हरवंश लाल शर्मा, अध्यक्ष वैज्ञानिक तथा तकनीकी शब्दावली आयोग, शिक्षा मन्त्रालय भारत सरकार ने संस्कृत-विषयक शोध की पद्धति पर बहुत ही महत्त्वपूर्ण भाषण दिया।

संस्कृत की शोध पत्रिकाएँ

प्रायः सभी विश्वविद्यालयों में संस्कृत की शोध पत्रिकाएँ प्रकाशित होती हैं। 'अखिल भारतीय संस्कृत साहित्य सम्मेलन' द्वारा प्रकाशित 'संस्कृतरत्नाकरः' सागर विश्वविद्यालय से प्रकाशित 'सागरिका' तथा इलाहाबाद से प्रकाशित 'सङ्गमनी' में संस्कृत के लेख छपते रहते हैं। दक्षिण से 'सुधर्मा' नामक एक दैनिक पत्र भी संस्कृत में निकलता है। इससे यह स्पष्ट है कि संस्कृत एक जागृत भाषा है और भारतीय जनता में इसके प्रति पर्याप्त रुचि है। हमारे विद्यापीठ से भी इस दिशा में पहले **'अध्ययनमाला'** और अब **'अन्वेषणा'** का प्रकाशन हो रहा है।

संस्कृत शोध की नई दिशाएँ

संस्कृत विषयक अनुसन्धान में प्रशिक्षण के लिए श्री लालबहादुर शास्त्री केन्द्रीय संस्कृत विद्यापीठ, दिल्ली में पिछले वर्ष एक 'प्रशिक्षण कर्मशाला' का आयोजन किया गया। भारत के अधिकतर विश्व विद्यालयों में भी संस्कृत विषय में एम०फिल० या प्रो० पी-एच०डी० कोर्स आरम्भ कर दिये गये हैं। इन पाठ्यक्रमों के चलाये जाने से अब यह सम्भावना है कि संस्कृत-विषयक शोध समुचित रूप से चलेगा।

शोध के प्रमुख चरणों, प्रक्रियाओं तथा अपेक्षाओं से तो लगभग सभी

---

१. ये व्याख्यान **'व्याख्यान-वल्लरी'** में कतिपय अन्य व्याख्यानों के साथ ग्रन्थरूप में भी प्रकाशित किये जा रहे हैं।

शोधार्थी परिचित हैं। अब तो विशेषरूप से इस बात की अपेक्षा है कि शोधकार्य में मात्रा की अपेक्षा गुण पर अधिक बल दिया जाए।

जैसा कि पश्चिमी देशों में किया जा रहा है, अनुसन्धेय विषय का आयाम छोटा रखा जाता है, किन्तु उस पर कार्य बड़ी गहराई से किया जाता है। पेरिस विश्वविद्यालय के डा. जाँ फिल्योजा ने १२ पद्यों की एक रचना **'रावण का कुमार तन्त्र'** का १६२ पृष्ठों में अध्ययन प्रस्तुत किया। अतः हमें भी इस ओर विशेष ध्यान देना चाहिए।

अनुसन्धान के क्षेत्र में एक विशेष रूप से ध्यान देने योग्य बात यह है कि कई विद्वानों ने जो उपाधिनिरपेक्ष शोधकार्य किया है, वह भी बहुत महत्त्वपूर्ण है। राय बहादुर सर देसाई, डी. वी. पारसनीस की शिक्षादीक्षा बहुत ही साधारण ढंग से हुई थी, किन्तु आज वे इतिहासज्ञों में अग्रगण्य हो गये हैं। संस्कृत की परम्परा को मुख्यरूप से ऐसे विद्वानों ने ही जीवित रखा है, जो आत्मप्रचार को छोड़कर चुपचाप अपना कार्य करते रहे हैं। विभिन्न शास्त्रों के भाष्य व टीका प्रटीकाएँ इसी कोटि में आती हैं। यह सब होते हुए भी यह तो मानना ही होगा कि विश्वविद्यालयों और अन्य शोध संस्थाओं में नियमबद्ध रूप से जो कार्य होता है, उसका अपना निजी महत्त्व है।

(प्रशिक्षण-कर्मशाला के अवसर पर दिये गये भाषण से संकलित)

—:०:—

तृतीयो भागः

शोध-सौरभम्

[विविध-शोध-निबन्ध-निचितम्]

अदितिः प्रकृतिः

—श्रीअमीरचन्द्रशास्त्री

ऋग्वेदीयदशममण्डलस्यैकसप्ततितमे सूक्ते पञ्चमेन मन्त्रेण—

'उतत्वं सख्ये स्थिरपतीमाहुर्नैनं हिन्वन्त्यपि वाजिनेषु ।
अधेन्वा चरति माययैष वाचं शुश्रुवाँ अफलामपुष्पाम् ॥'

इत्यनेन फलपुष्परहितां वाचं श्रुतवतो मायाचारत्वमनुश्रूयते । निरुक्तकारो भगवान् यास्कश्च **'अध्यात्माधिदैवते वाचः पुष्पफले'** इत्युक्त्या वैदिकवाक्यकल्पपादपानामधिभूतपत्रत्वम्, अधिदेवपुष्पत्वम्, अध्यात्मफलत्वञ्च निरूपयति । अन्यत्र च स एव भगवान् **'अदितिः प्रकृतिरित्यध्यात्मम्'** इति वचनेन वेदोक्तस्य अदितिपदस्य प्रकृतिपदार्थवाचकत्वमाध्यात्मिकया दृशा विवृणोति । अतोऽत्र तमेव भगवन्तं प्रमाणीकृत्यादितिपदस्य प्रकृतिपदार्थवाचकत्वं परीक्ष्यते ।

ऋग्वेदसंहितायाम् ऊनषष्टयुत्तरशतवारम् अदितिपदं पठ्यते । तथा हि प्रथममण्डले चतुस्त्रिंशत्, द्वितीयमण्डले षट्, तृतीयमण्डले तिस्रः, चतुर्थमण्डले चतुर्दश, पञ्चममण्डले नव, षष्ठमण्डलेऽष्टौ, सप्तममण्डले त्रयोविंशतिः, अष्टममण्डले चतुर्दश, नवममण्डलेऽष्टौ, दशममण्डले च चत्वारिंशदावृत्तयोऽदितिपदस्य विलोक्यन्ते । एतेषामदितिपदानां भाष्यकारैस्तत्र तत्र तेषु तेष्वर्थेषु भाषितेष्वपि पृथिव्याद्यर्थानामाधिभौतिकत्वम्, देवमातृप्रभृतीनामर्थानाञ्चाधिदैविकत्वं स्वीकुर्वाणा अपि वयं सर्वत्रैषामाध्यात्मिकमर्थं प्रकृतिरित्येव ग्रहीतुमर्हामः । यत्र तु भाष्यकारैरपि तत्पदं प्रकृत्यर्थतया व्याख्यातम्, तत्र त्वयत्नसिद्धसमीहितार्थाः स्म एव । सर्वत्र चादितिपदस्य प्रकृत्यर्थः सङ्गच्छमानोऽप्यनुभूयते । यथा—

कस्य नूनं कतमस्यामृतानां मनामहे चारु देवस्य नाम ।
को नो मह्या अदितये पुनर्दात्पितरं च दृशेयं मातरञ्च ॥

—ऋक्० १. २४. १।

इत्यत्र प्रश्नमन्त्रेऽप्यध्यात्मदृष्टया भाष्यमाणे—अमृतानां पुरुषाणां मध्ये कस्य सामान्यस्य कतमस्य विशेषस्य वा देवस्य क्लेशकर्मविपाकाशयैरपरामृष्टस्य द्योतनादिगुणविशिष्टस्येश्वरस्य चारु मनोज्ञं नामाभिधानं मनामहे उच्चारयामः । तयोः

सामान्यविशेषयोः पुरुषयोर्मध्ये कतरः कस्तावदेकतरः नोऽस्मान् पुरुषान् मह्यै महत्यै अदितये प्रकृतये पुनः प्रतिसर्गादौ अदात् दत्तवान् । य एवास्मानस्मिन् प्रकृतिप्रपञ्चेऽपातयत्, स एवोद्धरिष्यतीत्याशया प्रश्नः । तस्यैव च चारुनामोच्चारणेन तस्यैव च प्रपत्त्या वा पितरं जगतो निमित्तकारणभूतं, मातरं जगत उपादानकारणभूतञ्च तत्त्वं दृशेयं साक्षात्कुर्वीय । तयोश्च साक्षात्काराय श्रवणं मननं निदिध्यासनञ्चापेक्षितम् । तत्रानेन परिप्रश्नेन तच्छ्रवणयावसरं प्रार्थयते शुनःशेपः ।

अस्य प्रश्नस्योत्तरतया तु प्रजापतेः सकाशात्तमग्निं निश्चित्याग्निमुपसन्नः, अग्निना प्रेरितः सवितारं सवित्रा प्रेरितो वरुणम्, वरुणेन प्रेरितः पुनरग्निम्, अग्निना प्रेरितो विश्वान् देवान्, तैः प्रेरित इन्द्रम्, इन्द्रेण प्रेरितोऽश्विनौ; ताभ्यां प्रेरितश्च उषसम्, उपससाद । इत्थञ्चात्र षट्सूक्तानि शुनःशेपेनैव दृष्टानि पठ्यन्ते । तेषु प्रथमे (चतुर्विंशतितमे) सूक्ते प्रथमद्वितीयपञ्चदशेषु मन्त्रेष्वदितिरिति प्रकृत्यर्थे सङ्गच्छते । प्रथमे मन्त्र इव द्वितीयेऽपि शब्दार्थयोः सादृश्यं स्पष्टम् । पञ्चदशे —

उदुत्तम वरुण पाशमस्मदवाधमं विमध्यमं श्रथाय ।
अथावयमादित्य व्रते तवानागसो अदितये स्याम ॥

—ऋक्० १. २४. १५. ।

इत्यात्रान्ततस्तेनादितेः पुत्र आदित्यो वरुणः प्रार्थ्यते, यत्सत्त्वगुणात्मकम् उत्तमं पाशमस्मत्तः उच्छ्रथाय ऊर्ध्वम् उत्कृष्य शिथिलीकुरु । अधमं तमोगुणात्मकं पाशम् अवश्रथाय अधस्ताद् अवकृष्य शिथिलीकुरु । मध्यमं रजोगुणात्मकं पाशञ्च विश्रथाय विभज्य शिथिलीकुरु इति । अथेतः प्रभृति वयं तव वरुणस्य व्रते कर्मविशेषे लग्ना अपि अदितये प्रकृतये प्रकृतिबन्धनात् मुक्तये अनागसः अपराधरहिताः कर्मबन्धरहिताः स्याम । त्रिगुणात्मकस्य कर्मबन्धस्य वरुणादिभिरदितिपुत्रैः शिथिलीकृतौ पुनस्तस्य प्राप्तिर्मा भूदिति तात्पर्यम् ।

नायमेकः शुनः शेप एव यावदन्येऽपि ऋषयोऽदितिनाम्ना प्रकृतिमभिष्टुतवन्तः । तत्र वन्दनपुत्रो दुवस्युरिन्द्रादीनां देवानां कृपाफलान्युपवर्णयन्नपि दशममण्डलीयेन शततमेन सूक्तेन प्रतिमन्त्रम् **'आ सर्वतातिमदितिं वृणीमहे'** इति वाक्यं समस्यापूर्तिप्रयोजनकमिव प्रयुङ्क्ते स्म ।

तथाहि—

इन्द्र दृह्य मघवन्त्वावदिद्भुज इह स्तुतः सुतपा बोधिनो वृधे ।
देवेभिर्नः सविता प्रावतु श्रुतमा सर्वतातिमदितिं वृणीमहे ॥

—ऋक्० १०. १००, १ ।

इत्यादिष्वेकादशसु मन्त्रेषु दुवस्युर्निवेदयति—मघवन् इन्द्र त्वं त्वत्सदृशबलं मम शत्रुदलं तावदस्मद्भोगसिद्धये मारयसि चेन्मारय, इहास्माभिः स्तुतः सोमं

पीत्वाऽस्माकं वृद्धये युज्यसे चेद् युज्यस्व । देवैः सह सविता देवोऽस्माकं विश्रुतं यज्ञं रक्षति चेद् रक्षतु । किन्तु वयं सर्वतातिं सर्वात्मिकां, सर्वे तायन्ते विस्तीर्यन्तेऽस्यामिति वा सर्वतातिम् अदितिं प्रकृतिमेव आ समन्तादाराध्यत्वेन वृणीमहे स्वीकुर्मः । हे ऋत्विजः यूयं सर्वेषां पोषकाय इन्द्राय प्राप्तकालं भागं सम्पादयथ चेत्सम्पादयत, शुद्धस्य सोमस्य पायिने शीघ्रगामिने वायवे अपि भागं सम्पादयत, यो वायुः गौरपशुपयः पिबति, परं वयं तु सर्वतातिम् अदितिं प्रकृतिमेव आ समन्ताद् वृणीमहे उपास्यत्वेन स्वीकुर्मः । इत्यत्र सूक्ते पठिता एकादश मन्त्रा जिज्ञासुभिरवलोकनीयाः । इदञ्चादितेः प्रकृत्यपरपर्यायायाः सर्वात्मकत्वं सर्वकारणत्वं वा स्वयं भगवत्या श्रुत्यापि—

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वेदेवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम् ॥

—ऋक्० १. ८९. १० ।

इत्यत्राद्ये मन्त्रेऽभिधयापि प्रकाशितम् । ऐतरेयारण्यके (३. १. ६) **'अदितिर्हीदं सर्वं यदिदं किञ्च'** इति वचनेन ,जैमिनीयोपनिषद् ब्राह्मणे (१. ४१. ७) च **'विश्वे देवा इत्यादि तदेषा अदितिः एव'** इति वचनेन चादितेः प्रकृतेर्वेदं सर्वात्मकत्वं सर्वकारणत्वं वा विशदमनूदितम् । मैत्रायण्याञ्च संहितायां (३. १३. १०) **'अविज्ञाता अदित्यै'** इत्यादिनाऽदितेरविज्ञातत्वकथनेन तस्य अव्यक्तत्वं प्रस्तूय प्रकृत्यभिन्नत्वं सूचितम् ।

ऋग्वेदीयदशममण्डले द्विसप्ततितमं सूक्तं तावददितिदैवतम् । अत्र सूक्ते—

ब्रह्मणस्पतिरेता सं कर्मार इवाधमत् । देवानां पूर्व्ये युगेऽसतः सदजायत ।
देवानां युगे प्रथमेऽसतः सदजायत । तदाशा अन्वजायन्त तदुत्तानपदस्परि ।
भूर्जज्ञ उत्तानपदो भुव आशा अजायन्त । अदितेर्दक्षो अजायत दक्षाद्वदितिः परि ।
अदितिर्ह्यजनिष्ट दक्षया दुहिता तव तां देवा अन्वजायन्त भद्रा अमृतबन्धवः ।

—ऋक्० १०. ७२. २. ५ ।

इत्येतेषु मन्त्रेषु सांख्याभिमतस्य चेतनतत्त्वस्य ब्रह्मणस्पतिनाम्ना व्यपदेशः । तत्संसर्गश्च धमनत्वेन निर्दिष्टः । तेन धमनात्मकेन संसर्गेण असतोऽव्यक्तात्तत्वात् सदिति व्यक्तं महदादितत्त्वमजायतेति सायणादिभिरप्याचार्यैर्व्याख्यातम् । तथाहि—

"ब्रह्मणः अन्नस्य पतिः अदितिः एता एतानि देवानां जन्मानि कर्मार इव स यथा भस्त्रयाग्निमुपधमति प्रज्वलनार्थमेवं सम् अधमत् उदपादयदित्यर्थः । देवानां पूर्व्ये युगे । सृष्टादावित्यर्थः । तेषामुपादानकारणाद् असतः नामरूपवर्जितत्वेनासत्समानाद् ब्रह्मणः सकाशात् सन् नामरूपविशिष्टं देवादिकम् अजायत प्रादुरभूत् ।

'असद्वा इदमग्र आसीत्ततो वै सदजायत' (तै० ३. २. ७) इति हि श्रुतिः । न सदात्मकस्य प्रपञ्चस्यासत्कारणं युक्तमिति वाच्यम्, छन्दोगैः **'कथमसतः सज्जायेत'** इति असत्कारणत्वमाक्षिप्य **'सत्त्वेव सोम्येदमग्र आसीत्'** (छा० ३. ६. २. २) इत्यवधारितत्वात् । तर्ह्यसत्कारणप्रतिपादकवाक्यानां का गतिरिति चेत्तेषामव्याकृतत्वाभिप्रायत्वात् **'तद्धेदं तर्ह्यव्याकृतमासीत्'** (श० ब्रा० १४. ४. २. १५) इति श्रुतेः । यद्येवं तर्ह्यदितेः सकाशात्कथं देवाद्युत्पत्तिः । **'वायोरग्निः'** (तै० आ० ८. १) इत्यादिवदधिष्ठानसकाशादुत्पत्तेः । यद्वा देवानां कारणभूतं सत् असतो ब्रह्मणः सकाशादुत्पन्नमितियोजनादुक्तन्यायोऽस्मिन्पक्षेऽपि समान एव "। इति सायणभाष्यम् ।

साङ्ख्यास्तु ब्रह्मणस्पतिशब्देन प्रकृतिप्रेरकं चेतनतत्त्वम्, असच्छब्देन चाव्यक्तं प्रकृत्यपरपर्यायं तत्त्वं गृहीत्वा पूर्वोक्तं श्रुतिविरोधं सायणोक्तपद्धत्या निराकुर्वन्ति । अत्र सतः कारणत्वेनोक्तादितिः अव्यक्तत्वादसच्छब्देन व्यपदिश्यते, तैत्तिरीयोपनिषद्वत् । सत्कार्यवादसिद्धान्ते तु सासच्छब्देनैवोच्यते छान्दोग्योपनिषद्वदिति परिहर्तव्यः श्रुत्योर्विरोधः । स चास्मिन् पक्षेऽपि समान एव । अथानन्तरयोः **'अव्यक्तान्महदादेर्व्यक्तस्योत्पत्तेरनन्तरम् आशा दिशोऽजायन्त तदनु उत्तानपदोऽजायन्त । उत्तानपदो भूर्जज्ञे, भुवः आशा अजायन्त । तथा अदितेः दक्षः अजायत, दक्षाच्च अदितिः अजायत ।'** इति द्वितीयतृतीयमन्त्रयोः सायणभाष्यस्याशयः । अत्र दिगुत्पत्तेरनन्तरमुत्तानपदुत्पत्तिः, उत्तानपदुत्पत्तेरनन्तरं च दिगुत्पत्तिरिति यथा विप्रतिषिद्धम्, तथैव अदितेरनन्तरं दक्षोत्पत्तिः, दक्षादनन्तरञ्चादित्युत्पत्तिरित्यपि विप्रतिषिद्धम् । इमञ्च विप्रतिषेधं सायणाचार्यो **'यास्काचार्य इदमेव वाक्यमुदाहृत्य विरोधमाशङ्क्य पर्यहरत्'** इत्युल्लिख्याह—तथाहि **अदितेर्दक्षो अजायत दक्षाद्वदितिः परीति च । तत्कथमुपपद्येत समानजन्मानौ स्यातामित्यपि वा देवधर्मेणेतरेतरजन्मानौ स्यातामितरेतरप्रकृती** (निरुक्त० ११. २३) इति । साङ्ख्यास्तु विप्रतिषेधममुम् **'अदितिः प्रकृतिः, दक्षः पुरुषः'** तावुभावप्यजन्मानौ, तयोरजन्मत्वप्रतिपत्त्यर्थमेव श्रुतिर्विप्रतिषेधमिमं दर्शयतीति मन्यन्ते । अत एव चतुर्थे मन्त्रे सायणाचार्यो जन्यजनकभावं विहाय अदितौ यौगिकं दक्षदुहितृत्वं भाषते । अदितेश्च देवानां जन्म दर्शयति ।

अत्रत्या श्रुतिरपि—**अष्टौ पुत्रासो अदितेर्ये जातास्तन्वस्परि ।**

देवाँ उपप्रैत्सप्तभिः परा मार्ताण्डमास्यत् ॥

—ऋक्० १०. ७२. ८

इति मन्त्रेण अदितेः अष्टानां पुत्राणामुत्पत्तिं तेषु चाष्टमस्योपरि गमनेन सप्तानामेव **'महदाद्याः प्रकृतिविकृतयः सप्त'** इत्यनेन सांख्यसिद्धान्तेन सह सङ्गतिमुपदर्शयति । यद्यपि साङ्ख्याः **'प्रकृतेर्महान्, महतोऽहङ्कारः, अहङ्कारात्पञ्चतन्मात्राणि'** इति मन्यन्ते । न तु प्रकृतेः साक्षादेव सप्तानामाविर्भावमाचक्षते, तथापि प्रकृतेः

प्रकृतिविकृतिसप्तकस्य वैलक्षण्यमालक्ष्य तयोर्जनकजन्यभावः श्रुताविव साङ्ख्येष्वपि श्रूयते । स च महति साक्षात्, अहङ्कारादिषु च परम्परयाऽन्वेतीति न दोषः ।

इदञ्चादितेः सर्वतातित्वेन सर्वात्मकत्वेन सर्वकारणत्वेन च प्रकृतित्वं पूर्वमुक्ता श्रुतिः स्वयमपि प्रकाशयति—

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वेदेवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम् ॥
—ऋक्० १. ८९. १० ।

इत्यस्य मन्त्रस्य जैमिनीयोपनिषद्ब्राह्मणे (१. ४१. ७) विश्वेदेवा इत्यादि तदेषा अदितिरेवेति व्याख्यातम्, ऐतरेयारण्यके (३. १. ६) अदितिर्हीदं सर्वं यदिदं किञ्चेति विवरणमपीममर्थं समर्थयति ।

इदञ्चादितिपदस्य प्रकृतिवाचकत्वं भगवतो यास्काचार्यस्य 'अदितिः प्रकृतिरित्यध्यात्मम्' इति वचनेन, देवराजयज्वनः 'अदितिरात्मपक्षे प्रकृतिः' (निघण्टु० ४.१) इत्यनुमोदनेन, स्कन्दस्वामिनश्च 'अदितिरध्यात्मपक्षे प्रकृतिः' (निरुक्त० ४ । २२, २३) इति समर्थनेन च श्रद्धायात्र निरूपितम् । आप्तवाक्यत्वेन तदिदं विद्वद्भिरद्धा श्रद्धास्यत इति शम् ।

जगत आद्यभाषायाः प्रवर्तक 'इन्द्रः' स एव च देवनागरीलिपेरपि आविष्कर्ता

—आचार्यवात्स्यायनो धर्मनाथशर्मा,

बाइबिलस्य जेनिसिसोऽनुसारं (The whole earth was of one language, until the Lord fourised the mankind). धातुरभिशापात् पूर्वं सकलायामपि मह्यामेकैव भाषाऽऽसीत्'। तस्या एक-भाषाया उद्भावक-रूपेण पुरातना भारतीया इन्द्रं स्मरन्ति, ग्रीकाः 'हरमिसम्', ईजिप्शियनाः च 'थाथम्', यथा च न्यू इंग्लिश इन्साइक्लोपीडिया-इत्यस्य ३५५४ तमे पृष्ठे मुद्रितमस्ति' several ancient peoples attributed the origin of Language or speech to an important divinity—the ancient Egyptians to thoth, tne ancient Indians to Indra, the Greeks to Hermas.

भाषाया उद्भावक "इन्द्र" इति ऐतिह्येऽपि श्रूयते। यथा च शब्दानुशासने पस्पशाह्निके महामुनिः पतञ्जलिः निर्दिशति, "एव हि श्रूयते—बृहस्पतिरिन्द्राय दिव्यं वर्ष-सहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम। बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता।"

शब्दब्रह्मसाक्षात्कार-करणात् तस्य 'इन्द्र' उपाधिरभवत्। यथा च 'ऐतरेयोपनिषदि' ध्वनितम् 'इन्द्रो ह वै नाम (इदम् अहम् अद्राक्षम्) तमिन्द्रं सन्तम् इन्द्रमित्याचक्षते। इदमः आद्यो वर्णः 'इ' अहमः अन्तिमः 'म्', अद्राक्षमः मध्यमः 'द्र' एते समवेता भवन्ति 'इन्द्र' इति।

स्कन्द-पुराणे ऊनपञ्चाशतः मारुतानाम् उद्भावकम् इन्द्रं स्मरन्ति। दितेः गर्भं ध्वनिं सप्तधा सप्त विभज्य देवज्येष्ठः इन्द्रः 'मारुत मारुत' इति नाम चकार। मानव एव एकः स्पष्टवाक् प्राणी, अन्ये च पिण्डितमेव श्लिष्टं गर्भरूपं ध्वनिम् उच्चार-

यन्ति । शब्दब्रह्मसाक्षात्-कर्ता देवज्येष्ठः इन्द्रः ऊनपञ्चाशद्वर्णानाम् अनुसन्धानम-करोत् । सप्त सन्ति उच्चारणस्थानानि, मुखे पञ्च—कण्ठः तालुः, मूर्धा दन्तसमीपम्, ओष्ठौ च ; नासिका-काकले च द्वे मिलित्वा सप्त जायन्ते । तत्र च प्रयत्नाः यत्ना-श्चापि सप्तधा— विवृतम्, ईषद्विवृतं, स्पृष्टम्, ईषत्स्पृष्टम् (मुखे), (त्रयश्च काकले स्वरयन्त्रे संवार-विवारात्मकः ; अल्पप्राण-महाप्राणात्मकः ; उदात्तानुदात्तात्मकश्च । एभिः ऊनपञ्चाशन् मारुता वर्णा वा अजायन्त' ।

अ-आ, इ-ई, उ-ऊ, ऋ-ॠ, लृ, ए-ऐ, ओ-औ च त्रयोदश । त्रयोऽनुषङ्गाः अनुनासिकः, अनुस्वारः विसर्गश्च । त्रयस्त्रिंशद् व्यंजनवर्णाः कादयो मावसानाः पञ्च-विंशतिः स्पर्शाः, वर्णाक्षराः, 'य र ल वाः चत्वारः अन्तःस्थाः ईषत्स्पर्शाः, श ष-स हाश्च ऊष्माणः ईषद्विवृताः :

वर्गाक्षराणां प्रथमतृतीयपञ्चमाः य र ल वाश्च अल्प-प्राणाः, द्वितीय-चतुर्थवर्णाक्षराः शषसहाश्च महाप्राणाः । प्रथम-द्वितीयवर्णाक्षराः शषसाश्च त्रयोदश विवाराः, तृतीयचतुर्थपञ्चम-वर्णाक्षराः य र ल व हाश्च विंशतिः संवाराः—स्वराश्च ऊर्ध्वमुपात्ता उदात्ताः, न उदात्ता, समाहारश्च स्वरितः । एवमस्ति वर्णानां वैज्ञानिकमनुसन्धानम् यच्च शब्दब्रह्मसाक्षात्कर्ता इन्द्रोपाधिकः सर्वप्रथम-वैयाकरणः कश्चिदकरोत् । अत इन्द्रमेव सर्वप्रथमं वैयाकरणं स्मरन्ति भाषाया उद्भावक-रूपेण चापि ।

ऊनपञ्चाशद्वर्णानां वर्णमाला, अकारादिक्रमेण अद्यापि भारतीयासु त्रयो-दशविधासु भाषासु तासां च लिपिषु यथावत् तथैव एकरूपेण दृश्यते । एकस्यैव ध्वने-र्नियतः एक एव वर्णः । न ह्येको वर्णः अनेकान् ध्वनीन् वक्ति । सर्वे च वर्णा अक्षर-रूपा, न तेभ्यः क्षरलि किञ्चित् सर्वे च नियतरूपा अन्वर्थ-नामानश्च । अन्वग् भवति व्यंजनमिति हेतोः व्यंजनानामक्षररूपं भवत्यकारान्तम् । अकारमात्रारहितं अध-स्तिर्यग्रेखाङ्कितं हलन्तं वा व्यनक्ति शुद्धरूपं व्यञ्जनम् ।

अन्यासु अभारतीयासु भाषासु लिपिषु च एकस्यैव ध्वनेर्नियतमेकरूपं, वैज्ञा-निकं च ध्वनिविश्लेषणं, यथाक्रमम् अक्षररूपम्, लिखितोच्चारणादिकं किमपि न लभ्यते । एतच्च तासां भाषाणां द्योतयति धातुः शापाभिभूतत्वम्— सर्वास्वपि भाषासु आद्यं प्रधानभूतम् एकम् अकारम् आँग्लभाषायां सर्वैः स्वरैः मिलितैश्चापि लिख्यते तथाहि—

(1) a —arithmatic, (2) e —serve
(3) ea —earth (4) i —sir,

(5) io —action (6) eo —Surgeon

(7) o —son (8) o-e —some

(9) ou —touch (10) oo —blood

(11) u —up (12) u-e —Nature आदि।

एकमेव 'ज़' उर्दू भाषायां चतुर्भिर्वर्णैः लिख्यते ज़ाल, ज़े, ज्वाद, ज़ोय; एकमेव दन्त्यः 'स' से, सीन, स्वादवर्णैर्लिख्यते। आंग्लभाषायां 'फ़' ध्वनिः—त्रिविधैः प्रकीर्णैः वर्णैः उच्चरितो दृश्यते f—four; gh—laugh, nough, ieu—lieutinent.

'च' ध्वनेर्नास्ति कश्चिद् वर्णः; क्वचित् ch—church; tu-e—nature; tio—question,

नियतमेव निःसन्देहम् एते वर्णाः दैवशापात् पूर्वं जगतः आद्यायां भाषायां नाभवन्। इन्द्रानुसन्धानविषया अकारादिक्रमा वैज्ञानिका दिव्या उत्पत्तिवाराद् वर्णाः एव आद्यायां भाषायामभवन्, ये च अद्यापि नानाविधासु भारतीयासु भाषासु लिपिषु च यथावत् एकेनैव रूपेण दरीदृश्यन्ते सदैव च स्थास्यन्ति। यदा च मानवजातिः मानवतां अनुभविष्यति दैवशापान्मुक्ता च भविष्यति, तदापि इन्द्रानुसंहिता अकारादि-वर्णमाला एव उत्तमां एकां भाषां जनयिष्यतीति निश्चप्रचम्।

इन्द्रस्यैव वर्णक्रमः सर्वत्र भारते, सर्वासु भारतीयासु भाषासु लिपिषु कोशेषु च प्रचरति प्रचलति च। यद्यपि व्याकरणदृष्ट्या पाणिनेरक्षरसमाम्नायः कमप्यतिशयं चमत्कारमावहति। यथा च सिद्धान्तकौमुद्याः प्रास्ताविके पणशीकरोपाह्वः वासुदेव-शर्मा लिखति—'सत्स्वपि ऐन्द्रचान्द्रादिनिबन्धेषु विकलत्वात् जगदुद्दिधीर्षुणा परम-कारुणिकेन भगवता पाणिनिना अष्टकं सूत्रं प्राणायि' इति।

दिव्यस्य वर्णक्रमस्य कोऽस्ति मानदण्डः इति विषयेऽपि न्यू इंग्लिश इनसाइक्लो-पीडिया, इत्यस्य १६३ तमे पृष्ठे लिखितमेव विभावनीयम्—

Since the races of mankind have a common origin, it is possible to find more or less obscure similarities between the languages of many races.

The story of the alphabet since the 2nd millinniu B. C. is not very hard to trace its broad outline. There is obviously a real advantage in the use of single symbols for single sounds compared with the many symbols,

मानवजातेः समानप्रादुर्भावात् बह्वीनां जातीनां भाषासु समानतानुसन्धानं नातिदुर्लभम् । ईशातः सहस्राणि वर्षाणि पूर्वमपि लाभप्रदस्य द्रष्टव्यस्य च तथ्यस्य अन्वेषणं सुशकम् यत् "एकस्य ध्वनेः कृते एकस्यैव वर्णस्य प्रयोगः लाभप्रदः नतु बहूनां वर्णानां प्रयोगः ।" एकस्य ध्वनेः कृते बहूनां वर्णानां प्रयोगः अभारतीयासु भाषासु पूर्वं प्रदर्शित एव । तदपेक्षया भारतीयानां भाषाणां वर्णमाला वर्णक्रमश्च दिव्यतामावहतः । तेनेदं सिद्धं भवति यत् इन्द्रोपज्ञा भाषा वर्णमाला वर्णक्रमश्च धातुः शापात् पूर्वस्य दिव्यतां सम्पादयन्ति ।

इन्द्रोपक्रमा देवनागरी लिपिरपि तथैव दिव्यताम् आद्यतां च प्रद्योतयति । देवनागरी किल देवनगरादागता इति, प्रवृत्तिनिमित्तात् प्रतीयते । देवनगरम् किम् आसीत् । क्व च कदा चेति विचारणायां हिमालये देवप्रयागः तीर्थः समुपतिष्ठते । हिमालयो हि देवानां निवासः, उक्तं च महाकविना कालिदासेन कुमारसम्भवस्य प्रारम्भे—

'अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः ।'

शिवः अपि पार्वतीं तपःकारणं प्रष्टुमनाः परिपृच्छति—

'दिवं यदि प्रार्थयसे वृथा श्रमः
पितुः प्रदेशास्तव देवभूमयः' ।

देवप्रदेशात् उद्गता नद्यः देवनद्योऽभवन् । ताभिर्निर्मितं देशं देवनिर्मितं कथयन्ति स्म मनुप्रभृतयः ।

सरस्वती दृषद्वत्योर्देवनद्योर्यदन्तरम् ।
तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते ॥

दृषदः प्रस्तराणि, तद्वती प्रस्तरबहुला दृषद्वती सिन्धुः । सिन्धु-सरस्वत्योरन्तराले पञ्चनदप्रदेशः । एवं च सः प्रदेशः सप्तसिन्धुः 'ब्रह्मावर्त' इति नाम्ना देवनिर्मितो देशोऽभवत् ।

तदनु— **कुरुक्षेत्रं च मत्स्याश्च पाञ्चालाः शूरसेनकाः ।**
एष ब्रह्मर्षिदेशो वै, ब्रह्मावर्तादनन्तरः ॥

एष ब्रह्मर्षिदेशो देवनिर्मितो कथ्यते ।

एष एव प्रदेशः कालः च ब्राह्मणकालः, ज्ञान-देवी लिपिश्च ब्राह्मी । इतः पूर्वं वेदकालः देवानां निवासश्च हिमालयो नाम ; ज्ञानदेवी च विद्या

विद्यां चाविद्यां च यस्तद्वेदोभयं सह।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते।

ज्ञानदेवी वेदविद्या ब्रह्मावर्तनाम्ना ब्राह्मणमाजगाम। यथा च निरुक्ते प्रदर्शितम्—

विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि।
असूयकायानृजवेऽयवाय न मां ब्रूयात् वीर्यवती तथा स्याम्॥

ब्रह्मावर्तप्रदेशात् प्रवासिनः ब्राह्मणाः ब्रह्मर्षिदेशान् गताः। तत्र ज्ञानदेवी सरस्वती नाम्ना ख्यातिमलभत।

नतोऽग्रे— हिमवद्विन्ध्ययोर्मध्ये, यत्प्राग्विनशनादपि।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः॥

मध्यदेशे ज्ञान-देवी शारदादेवीनाम्ना स्थितिमलभत। तदनन्तरं यदा आर्यावर्तः उत्तरापथः दक्षिणावर्तेन सिन्धोरुत्तरपश्चिमभागे च संगतः भारतनाम्ना अमहीयत तदा ज्ञान-देवी अपि भारती इति नाम अलभत।

एवम् आर्याणां विकासः अभवत्—ते च चारित्र्येण ज्ञानेन च सर्वेषां प्रमाणभूताः अभवन्। तेषामासीद् उद्घोषः —

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥

अतएव च the whole earth was of one language before the lord's punishment. सर्वत्र भूमण्डले एकैव भाषा अभवत्।

आर्याः चारित्र्यविकासाय च श्रेष्ठतमं कर्म यजनं याजनं च अकुर्वन्। नद्योः संगमे प्रयागान् तीर्थनगराणि च अकुर्वन्। पवित्रनद्योः संगमे, यत्र प्रकर्षेण यागाः सम्पाद्यन्ते, स भवति प्रयागः। हिमालयस्य षट्सु प्रयागतीर्थेषु एको देवप्रयागः। स एव देवनगरम्। हिमालये एव प्रसिद्धं ज्वालामुखीतीर्थम् यत्र महादीपशिखा इव चास्ति ज्वाला। तत्रैव चेदं रहस्यं प्रकटितं भवति—

पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥

तत एव ज्वालामादाय इन्धनसमुच्चयेन अखण्डज्योतिष्कुण्डान् संस्थापयन्ति स्म आर्याः, तीर्थेषु, नदीसंगमेषु प्रकृष्टान् यागान् अयजन्त, तत्र च नगराणि अभवन्।

देवप्रयागः देवानां नगरमासीत् परमपुरातनकाले, अद्यापि च प्रतितिष्ठति। तस्य सन्निधौ भूर्जवृक्षाणां बाहुल्यमभवत्। तेषां बल्कलानि कोमलात् कोमलस्तरवन्ति कौशेय। वस्त्राणीव मसृणानि भवन्ति। तेषु सरला प्रभूता रमणीया रेखा भवन्ति समानान्तराः। ताभिः सरलाभिः समानान्तराभिः रेखाभिः शिरोरेखा-समलङ्कृताः वर्णाः प्रादुरभवन्। एकान्तराभिः चतसृभी रेखाभिः—इ ङ ड भ ह पञ्च वर्णा अजायन्त। एवं द्वयन्ताभिस्तिसृभी रेखाभिः—अ उ घ छ ध आदि वर्णाः। पूर्वं एकान्तरेण ततः द्वयन्तेरण तिसृभिः—ट ठ ढ द त ल ज्ञ आदि क्ष ज्ञ वर्णा आविरभवन्। एकान्तराभिः तिसृभिः रेखाभिः—क व ब च ज आदि वर्णा जन्म लेभिरे। द्वयन्तराभ्यां द्वाभ्यां रेखाभ्यां—ग न म स प भ प य फ थ श ष वर्णाः प्रवृत्तिमापद्यन्त।

इत्थमस्ति देवनागरीलिपौ शिरोरेखामहत्त्वम्। यथा यथा च आर्या भूर्जवृक्षबाहुल्यप्रदेशात् दूरीभूताः अभवन्, तथा तथा च शिरोरेखामहत्त्वमपि संकोचमापद्यत। गुर्जरप्रदेशं प्राप्ता देवनागरी लिपिः शिरोरेखा विहीना जाता। बंगप्रदेशमागता सत्यामपि शिरोरेखायां समानान्तररेखानां स्थाने त्रिकोणरेखाः अधारयत्। समुद्रतटप्रदेशमागता देवनागरी ताडपत्रेषु अलिख्यत। ताडपत्रेषु सूच्यग्रेण लिख्यते। सूच्यग्रेण समानान्तर-रेखाकरणेन पत्रस्फाटनमाशङ्क्य गोलाक्षरैरलिख्यत देवनागरी, वर्णमाला तु तथाविधा वर्णक्रमश्च स एव। एवमेव देवनागरी प्रदेशभेदेन भिन्ने नामरूपे अधारयत्। 'नामरूपे वाचारम्भणे, मृत्सुवर्णमेव च सत्यम्' तद्वदेव भाषालिपी वाचारम्भणे एव, देवनागरी वर्णमाला वर्णक्रमस्तु सत्यौ।

स्थानप्रयत्नकृतसंस्कारशुद्धमेव सदा भाषणीयम्। शब्दानुशासनकारः पतञ्जलिः सचेतयति।

'न म्लेच्छितवै नापभाषितवै, म्लेच्छो ह वा यदपशब्दः, म्लेच्छा मा भूम' इत्यध्येयं व्याकरणम्। शुद्धवर्णोच्चारणमेव व्याकरणस्य प्रयोजनम्। अशुद्धोच्चारणेनैव हेऽरयः इत्यस्य स्थाने हेलयः, हेऽलयः इति उच्चरन्तोऽसुराः पराबभूवुरिति'

अपशब्दोच्चारणं क्लिष्टोच्चारणमेव ईश्वरात् अभिशापस्य निमित्तं भवति। रोमन-परशियन-लिपी प्रयुञ्जानः क्लिष्टोच्चारणं तु कुर्वन्स्येव, भारतेऽपि मूर्धन्य षकारस्य, ऋकारस्य च तालुव्यञ्जनस्य शुद्धोच्चारणं विरला एव कुर्वन्ति। यकारमपि जकारमुच्चारयन्ति वबयोः शषसानामन्तरं नोच्चारयन्ति बंगदेशीयाः। यथालिखितं तथैवोच्चारणीयं भवति। लिखितस्यैव मान्यता भवति भारते। कथितमेव मान्यं वदन्तो भवन्ति म्लेच्छाः, भारतीया वा अभारतीया वा स्युः।

प्रचलितासु जनभाषासु या द्वादशाक्षरी बारहखड़ी क का कि की कु कू के

कै को कौ कं कः प्रयुज्यते तस्यां मा भूवन् ऋ ॠ लृ वर्णाः, परन्तु सर्वास्वपि भारतीयासु लिपिषु ऋ ॠ लृ वर्णाः सन्त्येव। तेषामवितथमुच्चारणं लिखिताक्षरानुसारं कर्तव्यमेव। महाकविः भट्टिः कथयति—

यद्यपि बहु नाधीषे, तथापि पठ पुत्र, व्याकरणम्।
स्वजनः श्वजनो माभूत् सकलं शकलं सकृत् शकृत्। इति।

अपशब्दोच्चारणमेवावहति परमेशशापम्' येन बह्वत्यः भाषाः बह्व्यश्च लिपयः च अभवन्। अभिशापापनयनमेव स्थानप्रयत्नसंस्कारशुद्धोच्चारणं लिखिताक्षरोच्चारणं वा।

इन्द्रकृतवर्णमाला-वर्णक्रमश्च अद्यापि सर्वासु भारतीयभाषासु समुपलभ्यते, देवनागरी-लिपिस्तु यद्यपि देशभेदेन, साधनभेदेन च भिन्ने नामरूपे वाचारम्भणे च धारयति तथापि इन्द्रकृतवर्णमाला-वर्णक्रम-देवनागरी-लिपिश्चवि सन्ति सत्याः इति विरमामि शमित्योम्।

स्फोटः

—डा० हर्षनाथ मिश्र

शब्द, पद या वाक्य से अर्थ की प्रतीति होती है, यह एक तथ्य है ; परन्तु उच्चारण के बाद तुरन्त नष्ट हो जानेवाले वर्णों का कोई समूह तो बन नहीं सकता जिन्हें हम पद मानें और उन पदों के समूह को वाक्य मानकर उन्हें अर्थबोध का कारण मानें। ऐसी स्थिति में "**रामः ग्रामं गच्छति**" इस वाक्य से जो अर्थबोध होता है, वह कैसे होता है ? यह एक समस्या है। इस समस्या का समाधान दार्शनिकों को अपने-अपने दर्शन की मान्यताओं की रक्षा करते हुए करना पड़ा है। शाब्दिकों ने इस अर्थबोध की समस्या को सुलझाने के लिए स्फोटतत्त्व की कल्पना की और उसी को अर्थबोध का आधार माना। वैयाकरणों के अनुसार उच्चरित प्रध्वंसी होने के कारण न वर्णों से अर्थबोध संभव है और न पद या वाक्य ही अर्थबोधक हो सकते हैं। जब वर्ण उच्चरित होते ही विनष्ट हो जाते हैं ; तब वे कोई समूह कैसे बना सकते हैं। जब वर्णों का सक्रम समूह नहीं बन पायेगा तब सुबन्त और तिङन्तरूप पद कैसे बनेंगे। जब पद की स्थिति ही असंभव है तब "**पदसमूहो वाक्यम् अर्थसमाप्तौ समर्थः**" के लक्षण से लक्षित वाक्य कहाँ ? इस तरह वर्ण या पद या वाक्य को अर्थ-बोध का आधार नहीं माना जा सकता है किन्तु स्फोट ही अर्थ का वाचक है। स्फोट, वर्णों, पदों और वाक्यों से अतिरिक्त एक पृथक् ही तत्त्व है। क्योंकि "**पटः**" में हम यह अनुभव करते हैं कि "**पटः**" **इत्येकं पदम्**। वर्ण इस एकत्वप्रतीति का आधार नहीं हो सकते। "**पटमानय**" में हम यह अनुभव करते हैं कि यह एक वाक्य है। पद इसका आधार नहीं बन सकते। परस्पर सम्बद्ध अनेक वाक्यों को हम एक महावाक्य के रूप में दखते हैं। इसलिए वर्ण, पद, वाक्य और महावाक्यों के अतिरिक्त किसी शब्दतत्त्व की सत्ता स्वीकार करना अनिवार्य है। वह शब्दतत्त्व ही स्फोट है। वह स्फोट अनादि है, अनन्त है, अक्षर है, नित्य और व्यापक है। इसलिए ब्रह्म है। इस-लिए भर्तृहरि ने लिखा है—"**अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्। विवर्ततेऽर्थ-भावेन प्रक्रिया जगतो यतः ॥**" शतपथ ब्राह्मण में कहा गया है—"**यद् वै प्रजापतेः परमस्ति वागेव तत्**" प्रजापति से भी जो परतत्त्व है, वह वाणी या वाक् ही है। यह वाक् वैदिक सृष्टि प्रकरण में वर्णित तीन प्रकार के पुरुषों—क्षर, अक्षर और अव्यय—की पाँच कलाओं—आनन्द, विज्ञान, मन, प्राण और वाक्—में से एक है।

इसी वागात्मक कला को स्फोट कहते हैं। इसी का विवर्त यह नामरूपात्मक जगत् है। महावैयाकरण भर्तृहरि ने कहा है "**स्वरूपज्योतिरेवान्तः परा वागनपायिनी**"।

यह वाक् अभिव्यक्ति की अवस्था के भेद से चार प्रकार की है—परा, पश्यन्ती, मध्यमा और वैखरी। इनमें परा नाम की वाक् को अन्तर्ज्योतिःस्वरूप और अनपायिनी (विनाश रहित) कहा गया है। इस तरह वह परब्रह्मस्वरूप सिद्ध होती है। वैयाकरणों का मुख्य स्फोट यही है। यह परा वाक् अत्यन्त सूक्ष्म है। सर्वजनसंवेद्य नहीं है। योगियों को भी निर्विकल्प समाधि में ही इसका अनुभव होता है। इसीलिए नागेश ने इसे मूलाधारस्थपवनसंस्कारीभूता, मूलाधारस्था, शब्दब्रह्मरूपा, स्पन्दशून्या, बिन्दुरूपिणी वाक्" कहा है। कुण्डलिनी का दूसरा नाम मूलाधार है। संगीत-रत्नाकार में इसका परिचय इस प्रकार दिया गया है—

गुदलिङ्गान्तरे चक्रमाधाराख्यं चतुर्दलम्।
अस्ति कुण्डलिनी ब्रह्मशक्तिराधारपङ्कजे॥ (१, २, ११६)

शिवसंहिता में कुण्डलिनी को संसार की सृजनशक्ति कहा गया है, उसको वाग्देवी और वाचामगोचरा सर्पाकृति और अपनी ही ज्योति से आलोकित बताया गया है।

जगत् संसृष्टिरूपा सा निर्माणे सततोद्यता।
वाचामवाच्या वाग्देवी सदा देवैर्नमस्कृता॥
(शिवसंहिता-पटल-२ श्लोक २४)

सुप्ता नागोपमा ह्येषा स्फुरन्ती प्रभया स्वया।
(शिवसंहिता-पटल ५, श्लोक ५८)

वैज्ञानिक इसे वेगस नर्व (Vagus Nerve) कहते हैं। हठयोग में इसे सबसे बड़ी शक्ति कहते हैं। ज्ञात अर्थ को बोलकर प्रगट करने के इच्छुक वक्ता की इच्छा से उत्पन्न प्रयत्न के साथ योग ही मूलाधारस्थ पवन का संस्कार है। ज्ञात अर्थ को प्रगट करने की इच्छा होने पर आत्मा बुद्धि से मिलकर मन से संपर्क करती है। तब मन शरीर की अग्नि को प्रेरित करता है। वह कायाग्नि वायु को ऊर्ध्वमुख होकर उठने को प्रेरित करती है ; उसी वायु की विभिन्न स्थितियों से वाणी की जो विभिन्न अवस्थाएँ प्रगट होती हैं ; उन्हें ही परा, पश्यन्ती आदि कहते हैं। मूलाधारस्थ वह पवन स्पन्दशून्य है। बोलने की इच्छा से उत्पन्न प्रयत्न से उसका योग जिस वाक् को अभिव्यक्त करता है वह परा वाक् है। नाभिपर्यन्त उठी हुई उसी वायु से अभिव्यक्त वाक् को पश्यन्ती कहते हैं। योगियों को इसका मानस-प्रत्यक्ष होता है। योगियों के

मन से समाधि के द्वारा सविकल्प ज्ञान के रूप में देखे जाने के कारण इसे पश्यन्ती कहा गया है । इसके बाद वही वायु जब हृदयदेश तक आती है, तो उससे जो वाणी अभिव्यक्त होती है, वही विविध अर्थों का वाचक शब्दतत्त्व है, स्फोट है, कान से ग्राह्य नहीं होने के कारण इसे सूक्ष्मा वाक् भी कहते हैं, यह जप आदि के समय बुद्धि से ग्राह्य है इसको मध्यमा वाक् कहा गया है । मुखपर्यन्त आयी हुई और ऊपर मूर्धा की ओर अर्थात् जिह्वा के ऊपर की छत की ओर बढ़ती हुई वही हवा जब मूर्धा से अर्थात् जिह्वा के ऊपर की छत से टकरा कर लौटती है और तालु, दन्त, ओष्ठ आदि में जिस वाक् को अभिव्यक्त करती है और श्रोताओं के श्रोत्र से भी ग्राह्य होती है, उसको वैखरी वाक् कहते हैं ।

परा वाङ् मूलचक्रस्था पश्यन्ती नाभिसंस्थिता ।
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा ।। (वा० प०)
(मञ्जूषा पृ० ७०)

वैखर्या हि कृतो नादः परश्रवण-गोचरः
मध्यमया कृतो नादः स्फोट व्यञ्जक उच्यते । (वा० प०)
(मञ्जूषा पृ० ७०)

मध्यमा और वैखरी दोनों से एक साथ नाद उत्पन्न होता है, उन दोनों में मध्यमा नाद अर्थवाचक स्फोटात्मक शब्द का अभिव्यंजक है । उस मध्यमानाद से व्यङ्ग्यशब्द ही स्फोट है, ब्रह्म है और नित्य है ।

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।।"

इस श्लोक में भर्तृहरि ने जिस शब्दतत्त्व का वर्णन किया है वह स्फोट ही है ।

जिस प्रकार ब्रह्म के चार स्वरूप कल्पित किये गये हैं (१) निष्कल, (२) सकल अर्थात् ईश्वर, (३) हिरण्यगर्भ तथा (४) विराट् स्वरूप । उसी प्रकार शब्दब्रह्म के भी चार स्वरूप शास्त्रों में बताए गये हैं—(१) निर्विकल्प ज्ञानरूप परा, (२) सविकल्प ज्ञानरूप पश्यन्ती, (३) स्फोटरूप मध्यमा, (४) कार्यरूप वैखरी । इस विवरण से स्पष्ट है कि शब्द ब्रह्म के चार स्वरूप होने पर भी परा और पश्यन्ती का प्रत्यक्ष योगियों को ही समाधि में निर्विकल्प और सविकल्प रूप में होता है । वह साधारण मनुष्यों की बुद्धि का विषय नहीं है । इसीलिए मध्यमानाद से अभिव्यक्त होकर ही वह साधारण

मनुष्यों की बुद्धि का विषय होता है। 'स्फुटति अर्थः यस्मात्' इस व्युत्पत्ति से मध्यमानाद व्यङ्ग्य स्फोटात्मक शब्द को ही अर्थवाचक माना जाता है। जिस प्रकार **'आत्मा आत्मना आत्मानं जानाति'**, यहाँ एक ही आत्मा उपाधिभेद से कर्ता, करण और कर्म होता है और उपाधि के भेद से भिन्न होता हुआ भी एक ही आत्मा शब्द से व्यवहृत होता है, उसी तरह स्फोटात्मा वस्तुतः एक होकर भी मूलाधार आदि उपाधि के भेद से भिन्न प्रतीत होता है, परन्तु वह एक ही है, वही शब्दब्रह्म है और नित्य है।

वैखर्या हि कृतो नादः परश्रवण-गोचरः।
मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते॥ (वा० प०)

इस कारिका में मध्यमा नाद से अभिव्यक्त शब्द को ही जो स्फोट का अभिव्यंजक बताया गया है, उसका तात्पर्य केवल यह लेना चाहिए कि मध्यमावाक् में स्फुटता सर्वजनसंवेद्य है। उसका तात्पर्य परा, पश्यन्ती आदि में स्फोटत्व का निराकरण करना नहीं है। वस्तुतः सब नाद एक ही स्फोटतत्त्व के अभिव्यञ्जक होते हैं।

यह स्फोट यद्यपि अखण्ड है, एक है तथापि व्यञ्जक ध्वनि के भेद से उसके वाक्यस्फोट और पदस्फोट आदि भेद किये जाते हैं। **"पदे न वर्णा विद्यन्ते वाक्येष्ववयवा न च। वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन॥"** इस वाक्यपदीय की कारिका में उसी अखण्डता की ओर संकेत है। ध्वनिस्वरूप बैखरीनाद से अभिव्यक्त स्फोट अर्थ का वाचक होता है। वैखरी शब्द वक्ता के मुख से उच्चरित होकर श्रोता की श्रवणेन्द्रिय का विषय होता है। उसे अर्थ का बोधक नहीं माना गया है। वैखरीनाद से हृदयस्थ मध्यमानाद में क्षोभ पैदा होता है। तभी मध्यमा में अवस्थित व्यापक स्फोट की अभिव्यक्ति होने से अर्थ का बोध होता है। वैखरी ध्वनि का प्रयोजन इतना ही है कि वह हृदयस्थ स्फोट को अभिव्यक्त कर दे। बैखरी ध्वनि के बिना भी जब कोई गूंगा केवल अपनी मुद्रा से मध्यमावागात्मक स्फोट की अभिव्यक्ति में सफल हो जाता है; तो अर्थ की अभिव्यक्ति द्रष्टा को हो ही जाती है। लेख से भी मध्यमा नादात्मक स्फोट अभिव्यक्त होता है। वहाँ बिना शब्द श्रवण के ही शाब्दबोध हो जाता है। मौन स्वाध्याय के समय वैंखरी वाणी का कुछ भी व्यापार श्रुत नहीं होता फिर भी लिपि संकेत से ही मध्यमावागात्मक स्फोट अभिव्यक्त हो जाता है और अर्थबोध हो जाता है। शब्दों का संकेतग्रह मध्यमावाक् अर्थात् स्फोट के रूप में ही होता है। इसलिए मध्यमा को ही अर्थ का बोधक मानना स्वाभाविक प्रतीत होता है। भर्तृहरि ने इसी अभिप्राय से लिखा है—

वैखर्या हि कृतो नादः परश्रवणगोचरः ।
मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते ।।

और नागेश ने परमलघुमञ्जूषा में लिखा है—वैखरी नादो ध्वनिः **सकलजनश्रोत्र-मात्रग्राह्यः, भेर्यादिनादवन्निरर्थकः"** । वैखरीनाद ध्वनि को जन्म देता है, वह केवल दूसरों के श्रवण का ही विषय होता है, उससे अर्थबोध नहीं होता । इससे स्पष्ट है कि हम लोग जिस वैखरी का उच्चारण करते हैं और सुनते हैं वह वैयाकरणों के विचार में शब्द नहीं है, शब्द तो वह मध्यमावाक् है जो बुद्धिस्थ है, हृदयदेशस्थ वायु से अभिव्यक्त और वैखरीध्वनि से उपरञ्जित है वही स्फोट है। वैखरी वाणी में उत्पन्न स्थूल वर्ण श्रोताओं के कर्ण-कुहर द्वारा हृदय में प्रवेश कर वहाँ अवस्थित मध्यमावाणी को जहाँ कि संकेतग्रह हुआ करता है, प्रबुद्ध करते हैं उसी से शाब्द-बोध होता है । बैखरी के द्वारा उच्चरित ध्वनि-विशेष से उपरक्त होकर वह अखण्ड स्फोट भी वर्णों, पदों और वाक्यों में विभक्त होकर अर्थबोध करता है ।[1]

मध्यमावागात्मक स्फोटात्मक शब्दों और बौद्ध अर्थों का ही तादात्म्य माना गया है । नागेश ने मञ्जूषा में लिखा है—**"वस्तुतः बौद्ध एवार्थः** शक्यः **पदमपि स्फोटात्मकं प्रसिद्धम्, तयोस्तादात्म्यम् ।"** बात यह है कि व्याकरणजगत् में शब्द और अर्थ दोनों के दो-दो भेद हैं बौद्धशब्द और बौद्धअर्थ । उनमें बौद्धार्थ के साथ बौद्ध शब्द का सम्बन्ध है । बाह्य अर्थ और बाह्य शब्द का नहीं । यदि बाह्य अर्थ और बाह्य (श्रूयमाण) शब्द के बीच तादात्म्य माना जाता तो वह्नि शब्द के उच्चारण काल में मुख जल जाता । बहुत से लोगों को मिठाई का नाम सुनते ही मुँह में जो पानी आने लगता है ; वह भावना का परिणाम है । बाह्यार्थ के साथ शब्द के तादात्म्य का नहीं । **"ओमित्येकाक्षरं ब्रह्म, रामेति द्वयक्षरं नाम मानभङ्गः पिनाकिनः"** यहाँ जिन शब्दार्थों में तादात्म्य दिखाया गया है उसकी सिद्धि भी स्फोट के मानने पर ही होती है । तुलसीदास जी ने **"गिरा अर्थ जलबीचि सम कहियत भिन्न न भिन्न । बन्दों सीताराम पद जिन्हहिं परमप्रिय खिन्न"**[2] में वाणी और अर्थ के सम्बन्ध को जल और तरङ्ग की तरह बताकर यह सिद्ध कर दिया कि स्थिर, अविचाली और कूटस्थ स्फोट की क्षुब्धावस्था ही अर्थ है । वायुजन्य ध्वनि से स्फोट में उसी प्रकार क्षोभ पैदा होता है, जिस प्रकार कि वायु के आघात से जल में क्षोभ या तरंग उत्पन्न होता है । इसलिए स्फोट शब्द और बौद्ध अर्थ में केवल नाम का भेद है । योगदर्शन

---

१. परमलघुमञ्जूषा, पृ० ४३
२. रामचरितमानस, बालकाण्ड; दोहा १८ ।

में भी लिखा है[1]—"**शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः**" **अर्थात् विकल्प**[2] **वह ज्ञान है जो वस्तु के अभाव में शब्दों पर आश्रित रहता है।** जितना ज्ञान पुस्तकों में भरा है, वह सब विकल्प है।[3] विकल्प शब्द की व्युत्पत्ति देते हुए नागेश ने लिखा है—"**बुद्ध्या विशेषेण कल्प्यत इति विकल्पः बुद्धिपरिकल्पित इत्यर्थः शब्दज्ञानानुपाती शब्दज्ञानमात्रेणानुपाती बुद्धावनुपतनशीलो वस्तुशून्योः** बाह्यार्थरहितः। अर्थात् शब्द-जन्यज्ञान के बाद जो ज्ञान इसकी अपेक्षा नहीं करता कि इस प्रकार का अर्थ बाह्य-जगत् में है या नहीं किन्तु ग्राह्य हो जाता है, उसी ज्ञान को विकल्प कहते हैं। इसी-लिए "**शशशृङ्गम्**" इत्यादि पद में अर्थवत् मानकर प्रतिपादिक संज्ञा और स्वाद्यु-त्पत्ति हुई।

इस प्रकार विचार करने पर यह प्रगट होता है कि बुद्धि में अर्थबोधक अखण्ड शब्दतत्त्व पहले से ही स्थित है; उसे ही वैयाकरणों ने स्फोट कहा है। वह नित्य हैं। इसलिए अर्थबोध की समस्या सुलझ जाती है।

अन्य दर्शनों ने अर्थबोध की समस्या को सुलझाने के लिए स्फोट की सत्ता को अस्वीकार किया और अन्य उपाय सुझाए। उनके दिखाए गए उपायों की वैयाकरणों ने युक्तियुक्त मीमांसा की और उन्हें सदोष साबित किया है।

नैयायिक शब्द को अनित्य मानते हैं। भला, जब वे देखते हैं कि उन्होंने उच्चा-रण के द्वारा शब्द को उत्पन्न किया है, उनके उच्चारण के नाश के साथ-साथ उन वर्णों का भी नाश हो गया तब वे कैसे विश्वास करते कि शब्द नित्य है? बात यह है कि शब्द, स्पर्श, रूप, रस, गन्ध इनका ज्ञान इन्द्रियों के प्रयोग से होता है। कान से हम शब्द सुनते हैं, त्वचा से हम ताप को जानते है, आँख रंग और विस्तार को देखती है, नाक से सूँघते हैं और जिह्वा से रस लेते हैं। साधारण मनुष्य इन सब गुणों को एक स्तर पर रखता है। नदी का जल शीतल है, नदी का विस्तार है; जब कोई चेतन प्राणी पास नहीं होता, तब भी नदी में ये गुण विद्यमान होते हैं। परन्तु दार्शनिक इन गुणों में प्रधान और अप्रधान का भेद करते हैं।[4] जान लॉक ने कहा है कि फूल को देखनेवाला न हो, तो उसका रंग नहीं, सूँघनेवाला न हो तो गन्ध नहीं, कोई सुननेवाला न हो तो चट्टानों पर नदी के गिरने का शब्द होता ही नहीं है।

---

१. पातञ्जलयोगसूत्र ९।
२. दर्शनसंग्रह : डा० दीवानचन्द पृ० ७२
३. प० ल० मं० ४३।
४. दर्शनसंग्रह, १२८

रंग, शब्द, रस, गन्ध और ताप बाह्यपदार्थों में नहीं, ये सब हमारी मानसिक अवस्थाएँ हैं ; जो पदार्थों के सम्पर्क से पैदा होती हैं। विस्तार, आकृति और अप्रवेश्यता प्राकृत-पदार्थों के अपने गुण हैं, जो उनमें विद्यमान रहते हैं, चाहे उनका ज्ञाता हो या न हो। दूसरी श्रेणी के गुणप्रधानगुण हैं। न्यायसूत्र कहता है कि शब्द आकाश का गुण है। ध्वनि तुरन्त आकाश में फैल जाती है। उसकी गति ११२० फुट प्रति सेकेण्ड है। परन्तु जब यह विद्युतलहरियों में परिवर्तित कर दी जाती है, तब यह प्रकाश की तरह एक सेकेण्ड में एक लाख छियासी हजार मील की गति से हर जगह पहुँच जाती है। रेडियो में हमें पृथ्वी के प्रत्येक भाग से शब्द सुनने का अवसर मिलता है। क्या यह मानना सम्भव नहीं है कि जिस तरह विस्तार, आकृति आदि पदार्थों का स्थायी गुण है और हमारा बोध ही क्षणिक है, उसी तरह जो शब्द हम सुनते हैं, वह तो नित्य है, केवल स्थिति-विशेष में हमें उनका बोध होता है। प्लेटफार्म पर घण्टी बजती है, हमें गाड़ी के आने की सूचना मिलती है। इंजन की सीटी बजती है ; हम रेल गाड़ी में बैठ जाते हैं। दरअसल में घण्टी और सीटी की आवाजें तो आकाश में सदा से विद्यमान थीं ; हमें उन्हें सुनने का अभी अवसर मिला है। इस बात को अगर मान लें तो सारी समस्या सुलझ जाती है। परन्तु नैयायिकों को इस पर विश्वास नहीं होता है। भला विश्वास हो कैसे ? वे देखते हैं कि उनके बोलने पर शब्द उत्पन्न होता है इसलिए शब्द सादि है, उत्पन्न होकर तृतीय क्षण में विनष्ट हो जाता है इसलिए वह सान्त भी है , अतः अनित्य है। तत्त्वज्ञान स्थायीसत्ता और उसके प्रकटनों में भेद करता है। इन्द्रियों का क्षेत्र प्रकटनों तक सीमित है। सत्ता के सम्बन्ध में बुद्धि या आन्तरिक ज्योति ही जान सकती है। शब्द एक इन्द्रिय का विषय होने से प्रकटन है, इसलिए अनित्य है। शब्द की अनित्यता में तीसरा हेतु है उसकी बनावट। ईंट, पत्थर, चूना और लकड़ी को जोड़कर भवन तैयार करते हैं। भवन को गिराते हैं। उसके अवयव अलग किये जाते हैं। उन्हें और जगह जोड़कर कोई दूसरा भवन बनाया जाता है, इसलिए भवन अनित्य है। भवन की तरह सारे मिश्रित पदार्थ अनित्य होते हैं। भवन की तरह भाषा भी व्यवहार के लिए बनाया गया एक मिश्रित पदार्थ है। वाक्य, पद और वर्णों के मिश्रण से बनी हुई भाषा व्यवहार के लिए बनी हुई मिश्रित वस्तुओं की तरह अनित्य है। "रामः ग्राम गच्छति" इसका अपने काम के लिए निर्माण किया। काम समाप्त होने पर तोड़ दिया और उसके कुछ अवयवों को मिलाकर दूसरा वाक्य बनाया 'रामः वनं गच्छति।' इस तरह सिद्ध होता है कि शब्द अनित्य है। यद्यपि शब्द कार्य नहीं है ; उसका निर्माण नहीं हुआ करता है। वह तो शाश्वतिक पदार्थ है इस प्रकार महाभाष्यकार ने कहा है **'लोकेऽर्थमर्थमुपादाय शब्दान् प्रयुञ्जते नैषां निवृत्तौ यत्नं कुर्वन्ति। ये पुनः कार्याभावानिवृत्तौ तावत्तेषां यत्नः क्रियते। तद्यथा घटेन कार्यं करिष्यन् कुम्भकारकुलं गत्वाऽऽह, कुरु घटं कार्यमनेन**

करिष्यामि इति न तद्वच्छब्दान् प्रयुयुक्षमाणो वैयाकरणकुलं गत्वाऽऽह कुरु शब्दान् प्रयोक्ष्य इति।' अर्थात् शब्द यदि अनित्य होता तो उसके निर्माण और उत्पादन के लिए वैसा ही प्रयत्न करना पड़ता जैसा कि घट के लिए करना पड़ता है। हम देखते हैं कि घट से कार्य करनेवाला व्यक्ति कुम्हार के यहाँ जाता है और कहता है मुझे कुछ घड़ों की आवश्यकता है, बनाकर दो, वह उसे घड़ा देता है तब वह अपनी आवश्यकता की पूर्ति करता है। शब्द का प्रयोक्ता शब्द के लिए शाब्दिक के पास आजतक कभी जाते नहीं देखा गया है; वह अपने अभिप्राय या विचार के अनुरूप शब्द अनादि वृद्धव्यवहार परम्परा से स्वयं प्राप्त कर लेता है और प्रयोग किया करता है। इस भाष्य से सिद्ध हो गया कि शब्द अन्य मिश्रितपदार्थों की तरह निर्मित वस्तु नहीं है फिर भी नैयायिक शब्द को अनित्य ही मानता है। अनित्य शब्द से शाब्द-बोध कैसे हो सकता है? इस प्रश्न का उत्तर वे और ढंग से देते हैं। नैयायिकों के विचार में अर्थवाचकता पदों में रहती है। वर्ण अनित्य हैं। वे यद्यपि उत्पन्न और विनष्ट होते हैं; तथापि संस्कार के रूप में वे मौजूद रहते हैं। संस्कार रूप में विद्यमान उन वर्णों के सहभाव से पद बनते हैं। संस्काररूप में स्थित पदों के सहभाव से वाक्य बनते हैं और शाब्दबोध होता है। यद्यपि उच्चरित वर्ण नष्ट हो चुका है और उच्चार्यमाण वर्ण अभी मौजूद है, नष्ट और विद्यमान में अव्यवहितोत्तरत्व सम्बन्ध स्थापित करना असम्भव है और एक के बाद दूसरे वर्ण का क्रम जब तक निश्चित नहीं होगा तब तक पद नहीं बनेंगे तथापि वीचीतरङ्गन्याय से उठनेवाली शब्द-धाराओं में अव्यवहित स्थिति मानी जा सकती है; जिसके आधार पर वर्णसमूहात्मक पद की सत्ता मानी जा सकती है।

तात्पर्य यह है कि जैसे तालाब में पत्थर फेंकने पर जो लहर उत्पन्न होती है वह तो मिट जाती है परन्तु वह दूसरी लहर को, और दूसरी लहर तीसरी लहर को पैदा करती है और उन लहरों में क्रम देखा जाता है, इसी तरह पूर्व-पूर्व वर्णों से उत्पन्न शब्दों की धारा अन्तिम वर्ण तक पहुँचती है। इस प्रकार पद का निर्माण और उनका श्रावणप्रत्यक्ष सम्भव है।

नैयायिकों ने स्वयं अपने इस मत में अनुभव किया कि उनकी यह कल्पना त्रुटिपूर्ण है; क्योंकि सर्वप्रथम उच्चरित वर्ण की अन्तिम शब्दलहरी अत्यन्त क्षीण होगी। उसकी अत्यन्त क्षीण शब्दधारा और अन्तिम वर्ण की पुष्ट शब्दधारा एक साथ उत्पन्न होगी। एक साथ उत्पन्न दो वस्तुओं में वह पौर्वापर्य नहीं बन पायेगा जो कि क्रम बनाने के लिए आवश्यक होता है। "रामः" के रेफ की अन्तिम शब्द-धारा और विसर्ग की शब्दलहरी एक साथ उत्पन्न होने के कारण आगे और पीछे

के क्रम से नहीं आ पायेगी फिर निश्चितक्रम के बिना अर्थबोध कैसे होगा ? इस दोष को परमलघुमञ्जूषा की ज्योत्स्ना व्याख्या में दिखाते हुए लिखा गया है कि **"आद्ये नष्टविद्यमानयोः पौर्वापर्यस्य वक्तुमशक्यत्वेन द्वितीये तु युगपदेवोत्पन्नत्वेन तदसम्भव इति"**। इस तरह वीचीतरङ्गन्याय के आधार पर कल्पित पद की संभावना को सदोष जानकर नैयायिकों ने अर्थबोध की सिद्धि के लिए संस्कार का पल्ला पकड़ा और कहा, 'पूर्व-पूर्व वर्णों के अनुभव से उत्पन्न संस्कारों के साथ चलनेवाले अन्तिम वर्ण के अनुभव से शाब्दबोध होता है।' यह तब सम्भव था जब कि जिस क्रम से वर्णों का अनुभव हुआ है उसी क्रम से भावनात्मक संस्कारों की स्थिति रहे परन्तु संस्कारों की स्थिति में अनुभवों के क्रम का त्याग देखा गया है। हमें परसों की बात याद रहती है ; आज की नहीं। स्मृतिरूप कार्यों में विपर्यय देखकर उसके कारण संस्कारों में विपर्यय का अनुमान होता है। बाद में किया गया कार्य स्मृतिपथ में पहले आता है और पूर्व में किया गया बाद में। स्मृति, संस्कारजन्य ज्ञान को कहते हैं। इसलिए विपरीत स्मृति के आधार पर यह अनुमान सहज में किया जा सकता है कि भावनात्मक संस्कार में भी विपर्यय होता है। ऐसी स्थिति में '**रसः**' के उच्चारण में '**सरः**' और 'नदी' के उच्चारण से 'दीन' का शाब्दबोध होने लगेगा। ऐसा होता नहीं है। इसलिए पूर्वोक्त संस्कार को अर्थबोध का आधार मानकर शाब्दबोध की समस्या का समाधान नहीं निकाला जा सकता। इसमें दूसरा दोष यह भी आता है कि नैयायिकों के द्वारा शाब्दबोध में स्वीकृत पद की कारणता समाप्त हो जाती है। 'पूर्व-वर्णानुभवजन्यसंस्कारसध्रीचीनचरमवर्णानुभव' को ही यदि शाब्दबोध का कारण मानें, तो पद समुदायात्मक वाक्य की तरह, वर्णसमुदायात्मक पद की वह सत्ता और शाब्दबोध में वह कारणता समाप्त हो जाती है जिसे नैयायिक स्वयं स्वीकार कर चुके हैं। **"पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः। शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी।"** में नैयायिक पद को शाब्दबोध का कारण मान चुके हैं, पूर्व-पूर्व वर्णों के अनुभव से उत्पन्न संस्कारसहित अन्तिम वर्ण के अनुभव से शाब्दबोध मानने पर इस सिद्धान्त का भङ्ग हो जाएगा। इस तरह नैयायिक शाब्दबोध की समस्या को नहीं सुलझा सके। स्फोट को बिना माने यह समस्या सुलझ नहीं सकती, यह सिद्ध है।

"एकः इन्द्रशब्दः क्रतुशते प्रादुर्भूतो युगपत् सर्वयागेष्वङ्गं भवति" अर्थात् एक ही इन्द्रशब्द अनेकों यज्ञ में एक साथ प्रादुर्भूत होकर सभी यज्ञों का अङ्ग बन जाता है। यह वैदिक लोगों का अबाधित व्यवहार भी पद को उत्पन्न और विनष्ट वर्णों का समुदाय मानने पर सिद्ध नहीं होता। क्योंकि उत्पन्न और विनष्ट अवयवों से बने हुए पदार्थों को एक नहीं माना जा सकता, ऐसे पदार्थों का एक साथ अनेक

स्थानों पर प्रादुर्भाव भी नहीं माना जा सकता। इसलिए शब्द शब्द से स्फोटात्मक शब्द लेना चाहिए। इस तरह स्फोट की सिद्धि होती है।

औदुम्बरायणाचार्य ने **'इन्द्रियनित्यं वचनम्'** कहकर शब्द को अनित्य माना और शब्द के अनित्य होने के कारण शब्द के माने गये चार विभाग को गलत बताया, कहा कि **'तत्र चतुष्ट्वं नोपपद्यते'** और **'अयुगपदुत्पन्नानां वा शब्दानामितरेतरोपदेशः (नोपपद्यते)'** के द्वारा यह भी बताया कि शाब्दबोध में आख्यातार्थ की प्रधानता सिद्ध नहीं होगी जैसा कि 'भावप्रधानमाख्यातम्' में कहा गया है। सचमुच शब्द यदि उसको कहें जिसे वक्ता अपनी जिह्वा से उत्पन्न करता है और श्रोता कानों से सुनता है तो शब्द तब तक ही स्थित है जब तक वह उच्चरित और श्रुत नहीं हुआ है। उसके पहले और बाद में उसका अस्तित्व नहीं सिद्ध होता। एक प्रयत्न, एककरण और एक स्थान से एक व्यक्ति एकसाथ अनेक वर्णों या शब्दों का उच्चारण नहीं कर सकता जैसे 'रामः' में र आ म अ और विसर्ग का उच्चारण एक साथ नहीं किया जा सकता, न 'गच्छति' में गकार अकार चकार छकार अकार तकार और इकार का उच्चारण एक साथ किया जा सकता है। इस तरह स्वाभाविक है कि एक वर्ण या शब्द उच्चरित होकर विनष्ट होगा और दूसरा शब्द उच्चार्यमाण होगा। ऐसी स्थिति में नाम, आख्यात, उपसर्ग और निपात का सहभाव सम्भव नहीं है फिर ये चार भेद नहीं किये जा सकते ; क्योंकि गणना तभी सम्भव है जबकि कई वस्तुएँ एक साथ एक काल में एक जगह हों।

दूसरी बात यह है कि एक साथ आनेवाली वस्तुओं में ही प्रधान और अप्रधान की व्यवस्था होती है। नाम और आख्यात जब एक साथ आ नहीं सकते उनमें यास्कसम्मत प्रधानाप्रधान की व्यवस्था कैसे हो सकती है? यदि औदुम्बरायणाचार्य वैयाकरण और यास्काचार्य की तरह स्फोट को स्वीकार करते तो यह प्रश्न ही नहीं उठता। शाब्दबोध में कोई अर्थ प्रधान रहता है कोई अप्रधान, प्रयोग में भी उपसर्ग क्रिया के पहले ही आता है। इन सब अनुभूत तथ्यों के आधार पर सिद्ध है कि दरअसल में शब्द वह नहीं है जो बोला और सुना जाता है, शब्द तो कोई आन्तरिक तत्त्व है जो ध्वनियों से अभिव्यक्त होता है। **"येन उच्चारितेन अभिव्यक्तेन सास्नालांगूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः"**। निरुक्तकार ने कहा **'व्याप्तिमत्वात्तु शब्दस्य।'** शब्द में व्याप्त होने की शक्ति है। वह अनित्य नहीं है, किन्तु नित्य है। उच्चरित ध्वनि के बनने और बिगड़ने से उसशब्द तत्त्व का कुछ नहीं बनता बिगड़ता जो स्फोटस्वरूप होकर श्रोता और वक्ता दोनों की बुद्धि में व्याप्त

है। इस तरह निरुक्तकार ने जिस शब्दतत्त्व को व्याप्तिमान् माना है, वह स्फोट या स्फोट के समान का ही कोई आन्तरिक तत्त्व है।

मीमांसक स्फोट को नहीं मानते हैं। उनका कहना है कि वर्ण नित्य है और वही अर्थबोधक हैं। **गौरित्यत्र कः शब्दः—गकारौकारविसर्जनीयाः।** श्रवणेन्द्रिय का जो विषय हो, वही शब्द हो सकता है। इसलिए कण्ठ और तालु आदि के अभिघात से अभिव्यक्त और श्रवणेन्द्रिय ग्राह्य वर्ण ही शब्द है और नित्य होने से वही वाचक है। इसीलिए प्रकरणपञ्चिका में शालिकनाथ ने कहा है '**कः शब्दोऽभिमतः ? वर्णाः तेषामेव श्रोत्रग्राह्यत्वात् इति।**' उसका भाष्य भी यही कहता है कि श्रोत्रग्रहणे हि अर्थे लोकेशब्दशब्दः प्रसिद्धः।' यह वही 'ग' है यह वही 'औ' है यह वही विसर्ग है इत्यादि प्रत्यभिज्ञा से शब्द की नित्यता सिद्ध होती है। इस प्रत्यभिज्ञा को भ्रम इसलिए नहीं कह सकते हैं कि उत्तरकाल में इस ज्ञान का बाध नहीं देखा गया है। भ्रम का उत्तरकाल में बाध देखा गया है। यह तो अबाधित है। प्रत्येक मनुष्य यह अनुभव करता है कि यह वही गकार है। भ्रम रहता तो अनेकों के अनुभव में समान रूप में आकर वह अबाधित नहीं रहता। इसे संशयात्मक ज्ञान भी नहीं कहा जा सकता; क्योंकि संशय में ज्ञान दोलायमान रहता है। "**एकस्मिन् धर्मिणि विरुद्ध-धर्मद्वयावगाहिज्ञानं संशयः यथा स्थाणुर्वा पुरुषो वेति**"। इस तरह सोऽयं गकारः इस प्रतीत से वर्णात्मक शब्द की नित्यता प्रमाणित होती है। वर्ण नित्य है फिर भी उच्चारणकर्ता अपनी सीमित शक्ति के कारण, अर्थात् दस बीस तालुस्थान या दस बीस जिह्वा और दसबीस मन नहीं होने के कारण एकसाथ अनेक वर्णों का उच्चारण नहीं कर पाता और न श्रोता अपनी मर्यादित कर्णशक्ति के कारण उनको एकसाथ सुन पाता। इसलिए पूर्वपूर्व वर्णों से उत्पन्न संस्कार सहित अन्तिम वर्ण को अर्थ का प्रत्यायक मानना चाहिए। दण्ड और घट के बीच भ्रमिव्यापार का व्यवधान होने पर भी जैसे लोग उस भ्रमिव्यापार को व्यवधायक नहीं मानते और कहते हैं '**दण्डाद् घटो जायते**' उसी प्रकार पूर्वपूर्व वर्णजन्य-संस्कार रूप शब्दगत व्यापार को व्यवधायक नहीं मानते हुए लोग कहते हैं '**शब्दादर्थः प्रतीयते**' अथवा अन्तिम वर्ण उच्चार्यमाण होने के कारण सत् है और पूर्वपूर्व वर्ण उच्चरित हो चुकने के कारण तिरोहित हो गये हैं इसलिए उन्हें असत् कह सकते हैं परन्तु शब्द स्वभाव की विचित्रता के कारण उन सत् और असत् वर्णों की स्मृति के रूप में एक चित्रस्वरूप विचित्र बुद्धि उत्पन्न होती है, वही बुद्धि अर्थप्रत्यायक है। जैसे सफेद, हरे, नीले, पीले रंग के ज्ञान को एकसाथ हुआ मानकर चित्ररूप मानते हैं, इसी तरह सभी वर्ण-जन्य संस्कारों का सहभाव माना जा सकता है यही है चित्ररूप विचित्र बुद्धि। और इससे जब अर्थबोध सम्भव है तब स्फोट क्यों माना जाय ? मीमांसकों का कहना है

शब्दों का व्यवहार करेगा तब भी एक-एक वर्ण के ग्रहण के बाद समस्त वस्तु को ग्रहण करने की क्षमतावाली बुद्धि में ये उसी आनुपूर्वी के साथ अवभासित होंगे और संकेतित अर्थ का बोध करायेंगे।

परन्तु स्फोटवादियों को वर्ण को नित्य मानना अनुभव विरुद्ध दिखाई पड़ता है। उनके मत में 'सोऽयं गकारः' इस प्रत्यभिज्ञा का आधार गकारों की अभिन्नता नहीं, किन्तु सादृश्य है। **'तदेवेदं कार्षापणं भवन्तं प्रत्यर्पयामि यन्मथुरायां प्रसादक्रयाय मया भवतो गृहीतम्'** में सादृश्य के कारण ही आरोप हुआ है। मीमांसक प्रभाकर अर्थबोध की समस्या को हल करने के लिए एक अतिरिक्त संस्कार की कल्पना करते हैं, उसमें गौरव है ही। पातञ्जल योगवादियों ने पदस्फोट और वाक्यस्फोट की कल्पना को स्वीकार किया है। शाब्दिकों के यहाँ भी वाक्यस्फोट को मुख्य स्फोट माना गया है।

नागेश ने लिखा है **'तत्र वाक्यस्फोटो मुख्यः, तस्यैव लोकेऽर्थबोधकत्वात् तेनैवार्थसमाप्तेश्च।'** पातञ्जलयोग के अनुयायियों के विचार में अवयवों से अवयवी की अलग सत्ता मानने की प्रथा है। पंखुड़ियों से अतिरिक्त फूल की सत्ता मानते हैं उसी तरह वर्णों से पृथक् अखण्डपद की सत्ता माननी चाहिए और अखण्डपदों से पृथक् अखण्ड वाक्य की सत्ता स्वीकार करनी चाहिए उस अखण्ड वाक्य या अखण्ड पर से अर्थ की प्रतीति होती है उसे इसलिए स्फोट कहते हैं कि उसमें 'स्फुटति अर्थः यस्मात्' इति व्युत्पत्ति से लब्धयोगार्थ पूर्णतः घटता है।

सांख्य आनुपूर्वीविशिष्ट वर्णसमुदाय को ही अर्थबोध का कारण मानता है। परन्तु वह आनुपूर्वीविशिष्टवर्ण का उच्चारण तो होता नहीं है फिर अर्थबोध की समस्या रह ही जाती है।

भाषा की बनावट पर ध्यान दें तो अनेक प्रश्न ऐसे उठ खड़े होंगे जिनके समाधान के लिए स्फोट की कल्पना आवश्यक हो जाती है। मेरी गाय, मेरा भाई और मेरे हाथ, **'मदीयं गृहं, मदीया कविता, मदीयो भ्राता, मदीयया चित्तवृत्त्या'** आदि में पूर्व उच्चरित मेरा, मेरी, मेरे आदि में जो लिङ्ग और वचन आदि में परिवर्तन देखे जाते हैं, उनके कारण वे परवर्ती शब्द हैं जिनका उच्चारण परिवर्तन के समय नहीं हुआ है। अनुच्चरित अवस्था में रहनेवाले उन शब्दों का प्रभाव उच्चरित शब्दों पर पढ़ता है इससे सिद्ध है कि ये दोनों शब्द कहीं न कहीं स्थित हैं। वह आधार स्फोट ही हो सकता है, संस्कार नहीं, यह बताया जा चुका है। उच्चरित ध्वनि को यदि शब्द मानें तो अनुच्चरित ध्वनि के आधार पर भाषा में कोई परिवर्तन नहीं होना चाहिए। **"युस्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः"** सूत्र में अपि शब्द के

प्रयोग द्वारा सूत्रकार ने सिद्ध कर दिया कि तिङ्वाच्य कर्ता या कर्म को प्रगट करनेवाले युष्मद् शब्द का शब्दशः प्रयोग रहे या न रहें मध्यम पुरुष होगा। इससे सिद्ध है स्फोट में युष्मद् शब्द का रहना मध्यमपुरुष की व्यवस्था का कारण है; न कि उसकी श्रुतध्वनि। "**अनभिहिते**" सूत्र का स्वारस्य भी स्फोट की सिद्धि का सहायक है। "अनुक्त कर्म से द्वितीया हो, युक्त से नहीं, यही इसका तात्पर्य है। '**अभिधानं च प्रायेण तिङ्कृत्तद्धित**' इसलिए 'मया चन्द्रो विलोकितः' में चन्द्र से द्वितीया नहीं हुई किन्तु 'अहं चन्द्रं विलोकितवान्' में द्वितीया हुई। उक्त और अनुक्त करने की व्यवस्था परवर्ती शब्द विलोकितः और विलोकितवान् के हाथ में है जो चन्द्रः और चन्द्र पर के जन्म के समय है ही नहीं, फिर उसने उक्त और अनुक्त होने की व्यवस्था कैसे कर दी? इससे स्पष्ट है ये सब शब्दजाल स्फोट रूप में स्थित हैं। जैसे बीज में पत्र, पुष्प, शाखा, प्रशाखा तना आदि की व्यवस्था पहले से है, कारण विशेष उसके अभिव्यञ्जक होते हैं, कारक नहीं, उसी तरह स्फोट में स्थित यह सारी व्यवस्था, सारा वाक्य-विन्यास ध्वनि से अभिव्यक्त हुआ है; वक्ता और श्रोता के हृद्देश में ये पहले से ही मौजूद है, शाश्वत है।

इसीलिए पतञ्जलि ने शब्द का जो प्रथम लक्षण किया, वह स्फोटपरक है। '**येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः**' **अर्थात्** '**अभिव्यञ्जकैः ध्वनिभिरभिव्यक्तेन येन गोरूपस्फोटतत्त्वेन सास्नादिवतां ज्ञानं भवति स शब्द इत्यर्थः**।' कैयट ने भी प्रदीप टीका में लिखा है '**तस्मात् अर्थात् वर्णानामनित्यत्वात् तद् व्यतिरिक्तः स्फोटो नादाभि व्यङ्ग्यो वाचकः**।' दूसरा लक्षण ध्वनिपरक है इसे स्पष्ट करते हुए उद्द्योतकार ने कहा है, '**लोके व्यवहर्तृषु पदार्थबोधकत्वेन प्रसिद्धः श्रोत्रेन्द्रियग्राह्यत्वात् वर्णरूपध्वनिसमूह एव शब्दः। तस्यार्थबोधकताऽप्यविचारित-रमणीयस्यैव लोके सिद्धा। तादृशस्यैव शास्त्रेणान्वाख्यानम्**।' अर्थात् गम्भीरता से विचार नहीं करनेवाले ही ध्वनि को शब्द कहते हैं। मम्मट के विचार में उच्चरित शब्द को ध्वनि इसलिए कहते हैं कि वह स्फोट को ध्वनित करता है। ठीक उसी तरह ध्वनिकाव्य उसे कहते हैं जहाँ शब्द और अर्थ अपने से अधिक चमत्कारी रसादि को अभिव्यक्ति देते हैं। इस तरह मम्मट ने भी स्फोट को स्वीकार किया है।

यद्यपि पाणिनि के सूत्रों में स्फोट का उल्लेख नहीं मिलता है, परन्तु उनके '**अनभिहिते**, तथा **युष्मद्युपपदे**' आदि सूत्रों के स्वारस्य से तथा '**सिद्धे शब्दार्थसम्बन्धे**' इस वार्तिक के प्रमाण से यह माना जा सकता हैं कि पाणिनि और कात्यायन स्फोट सिद्धान्त को मानते थे। पतञ्जलि के ग्रन्थ में स्फोट का स्पष्ट उल्लेख मिलता है। '**तपरस्तत्कालस्य**' सूत्र के भाष्य में लिखा गया है—'स्फोटः शब्दः ध्वनिः शब्दगुणः।'

शब्दगुणः की व्याख्या करते हुए कैयट ने लिखा है 'शब्दस्य गुणः उपरञ्जकः व्यञ्जकत्वेनेत्यर्थः।' यदि ध्वनि को शब्द मानें तो ध्वनि के द्रुत, मध्यम और विलम्बित होने के कारण एक ही अभिन्न हो जाएगा, ऐसी स्थिति में यदि "अदेङ् गुणः" में अ को द्रुत मानेंगे तो मध्यम और विलम्बित अ अत्पदग्राह्य नहीं होगा। इसलिए ध्वनि को उपरंजक मात्र माना गया है। जैसे कि नील, पीत और रक्त वस्तुओं की आभा पड़ने से स्फटिक में भेद नहीं आता, उसी तरह ध्वनि के द्रुत, मध्य और विलम्बित होने से स्फोट में भेदभाव नहीं किया जाता। भाष्यकार ने कहा हैं "ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते। अल्पो महाँश्च केषाञ्चिदुभयं तत् स्वभावतः॥" इस श्लोकवार्तिक की व्याख्या करते हुए कैयट ने लिखा है कि **'ध्वनिः व्यञ्जकः स्फोटो व्यङ्ग्यश्च स्तः तत्र शब्दानां व्यङ्ग्यानां स्फोटाख्यानां व्यञ्जकत्वेन सम्बन्धी यो ध्वनिः स एव महान् अल्पश्च लक्ष्यते, व्यङ्ग्यस्तु अभिन्न एव। केषाञ्चित् अर्थात् व्यक्तानामुभयं गृह्यते व्यक्ते शब्दे संस्कृतभाषाद्यात्मके व्यङ्ग्यो व्यञ्जकश्चोभयं गृह्यते अव्यक्तानां भेरीघातादिजन्यानां तु ध्वनिरेव गृह्यते।'** स्फोट शब्द का स्पष्ट उल्लेख 'ऐऔच्' सूत्र के महाभाष्य में भी पाते हैं वहाँ 'कृपो रोलः' की चर्चा करते हुए भाष्यकार ने कहा है 'उभयतः स्फोटमात्रं निर्दिश्यते रश्रुते, र्लश्रुतंभवतीति।' इसकी व्याख्या करते हुए नागेश ने लिखा है वस्तुतः **'स्फोट एव श्रोत्रग्राह्यः श्रोत्रग्राह्यध्वनिव्यङ्ग्यत्वात् वायुनिष्ठ-रत्वादिना तस्याभिव्यक्ति: एवञ्च साक्षाद्रत्ववतोऽभावेन कल्पते इत्यत्राप्यप्रवृत्त्याऽस्य वैयर्थ्यापत्तिः एवञ्च रेफावभासिनः स्फोटस्य प्रसंगे लकारावभासः स्फोटः।'** इस तरह यहाँ रश्रुति और लश्रुति को जो स्फोट कहा गया है वह स्फोट नहीं किन्तु स्फोटावभास है।

स्फोट का स्पष्ट उल्लेख सर्वप्रथम महाभाष्य में मिलता है। हरदत्त ने **'अवङ् स्फोटायनस्य'** सूत्र में आए हुए स्फोटायन की व्याख्या करते हुए लिखा है 'स्फोटोऽयनं परायणं यस्य स स्फोटायनः, स्फोट-प्रतिपादन परो वैयाकरण आचार्यः।' **नागेश ने भी अपने स्फोटवाद के अन्त में लिखा है—**

वैयाकरणनागेशः स्फोटायनऋषेर्मतम्।
परिष्कृत्योक्तवान् तेन प्रीयतां जगदीश्वरः॥

इससे सिद्ध होता है स्फोट की सत्ता की स्वीकृति इस देश में अतिप्राचीन है।

पदमञ्जर्याः संस्कृतव्याकरणे स्थानं तन्महत्त्वञ्च

—डा० तीर्थराजस्त्रिपाठी

'उपासनीयं यत्नेन शास्त्रं व्याकरणं महत् ।
प्रदीपभूतं सर्वासां विद्यानां यदवस्थितम् ।।

किं बहुना,

इदमाद्यं पदस्थानं मुक्तिसोपानपर्वणाम् ।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ।।
रूपान्तरेण ते देवा विचरन्ति महीतले ।
ये व्याकरणसंस्कारपवित्रितमुखा नराः ।।''[1]

इत्युपरि निर्दिष्टेन पदमञ्जरीकारेण हरदत्ताचार्योक्तदिशा, 'प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः[2]', 'तत्त्वावबोधः शब्दानां नास्ति व्याकरणाद् ऋते'[3] इति भर्तृहरिपादोक्तदिशा, ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति-प्रधानं च षट्स्वङ्गेषु व्याकरणम् । प्रधाने च कृतो यत्नः फलवान्भवती'ति[4] भाष्योक्तदिशा च सन्ध्योपासनादिवदवश्यं कर्त्तव्यं व्याकरणाध्ययनमित्युक्तं भवति ।

विद्वत्पुङ्गवेन हरदत्ताचार्येणाऽप्युक्तं पदमञ्जर्याम् —

''तत्र यथाऽनुपासीनः सन्ध्यां प्रत्यवैति, तथाऽनधीयानोऽपि व्याकरणम्, तत्र

---

१. द्र०—न्यासपदम० सहितायाः काशि० वृत्तेः प्र०भा० अनुबन्धचतु० निरूपणे १४ तमे पृ० पदम० ।

२-३. द्र०—वाक्यपदीये ब्रह्मका० ११ तमा, १३ तमा च कारिका ।

४. द्र० प्रो० चारुदेवशास्त्रिसम्पा० पस्पशा० महाभा० ५-६ पृ० ।

व्याकरणं ज्यौतिषं निरुक्तं शिक्षा छन्दोविचितिः कल्पसूत्राण्यङ्गानि । अङ्गत्वं चाङ्गसंस्तवात् ।

मुखं व्याकरणं तस्य ज्यौतिषं नेत्रमुच्यते ।
निरुक्तं श्रोत्रमुद्दिष्टं छन्दसां विचितिः पदे ॥
शिक्षा घ्राणं तु वेदस्य हस्तौ कल्पान् प्रचक्षते ।
इत्युपकारकत्वाच्च ।[1]

तत्रेन्द्र-चान्द्र-कापिशल-कौमार-शाकटायन-सारस्वत-आपिशल-शाकल-पाणिनीय-केत्यष्टविधेष्वपि व्याकरणेषु पाणिनीयव्याकरणस्यैवाद्यत्वे किञ्चिदुच्चैस्तरं महत्त्वमूरीक्रियते ।

उक्तञ्च—

'पाणिनीयं शब्दशास्त्रं पदसाधुत्वलक्षणम् ।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन ॥'

पाणिनीयाष्टकञ्चाधिकृत्य ग्रथितासु व्याडि-कुणि-वररुचि-देवनन्दि-श्वोभूति-चुल्लिभट्टि-निर्लूर-चूर्णि-वामन-जयादित्य - भट्टजयन्त - मैत्रेयरक्षित - पुरुषोत्तमदेव-भट्टोजीदीक्षित-अप्पयदीक्षित-अन्नम्भट्टादिविरचितासु विविधासु वृत्तिषु गणपाठादि-सन्निवेशाद्, वैदिकवाक्यांश-पौरस्त्योदाहरण-प्रत्युदाहरणानाञ्च समावेशात्काशिकावृत्ते-रस्ति किमप्युत्कृष्टतरं स्थानम् ।

वृत्तेरस्या व्याख्यानभूतौ द्वावेव ग्रन्थौ भगवत्या भारत्या भाण्डागारं बिभृतः । प्रथमस्तत्राचार्यजिनेन्द्रबुद्धिकृतः (वैक्रमाब्दः ७८२-८००) 'काशिकाविवरण-पञ्चिका' 'न्यासो' वाऽपरनामधेयो ग्रन्थोऽस्ति । अपरश्च श्रीहरदत्तमिश्रविरचितः (१११५ वैक्रमाब्दः) 'पदमञ्जरी' नामा काशिकाया बृहद्व्याख्यानभूतो ग्रन्थो विद्वत्स्वपर्याप्तं प्रसृतिङ्गतः । तामिमां स्वप्रणीतां पदमञ्जरीमधिकृत्योक्तं पदमञ्जरीकारेण—

'यश्चिराय हरदत्तसंज्ञया विश्रुतो दशसु दिक्षु दक्षिणः ।
उज्जहार पदमञ्जरीमसौ शब्दशास्त्रसहकारपादपात् ॥'[2]

---

१. द्र० न्यासपदम० सहितायाः काशि० वृत्तेः प्र०भा०अनुब०चतु० निरूपणे षष्ठे पृ० पदम० ।

२. द्र०—न्यासपदम० सहि० काशिकावृत्तेः प्र० भा० मङ्गलाचरणे, तृ० पृष्ठे ।

तामिमामनुपथेन चेतसा भावयन्तु भुवि भव्यबुद्धयः।
कः खलु प्रणयिनि प्रियंवदे मत्सरी भवति मद्विधे जने ॥[1]

हरदत्तमिश्रः शब्दशास्त्रेणात्र सहकारपादपेनोपमिमीते। आम्रेषु प्रकार-विशेषः सौरभेणातिरिच्यमानः 'सहकार' इत्युच्यते। यथाहुराभिधायिकाः, 'सहकारोऽतिसौरभः' इति। 'मञ्जरी वल्लरिः समे' इत्यमरान्मञ्जरीशब्दः वल्लर्याः समानार्थकः। एवमभिहितेऽपि मञ्जरीशब्दः कमर्थविशेषमभिधत्ते इति न स्पष्टतरं प्रतीतिं याति। वस्तुतो रसालस्य पुष्पिता लता मञ्जरीत्युच्यते। केनाभिप्रायेण ग्रन्थकारः स्वकृतिं 'मञ्जरी'ति व्यपदिशति। शाखिनः सहकारस्य सौरभं मञ्जर्यामेव प्राप्यते इत्यवधेयम्। आम्रवणं निकषा यातो जनस्य मञ्जरीणां सौरभेणातिरिक्तेनोद्गतेन कथं घ्राणतृप्तिर्जायते इति सर्वस्य लोकस्य विदितोऽर्थः। मूलभूतं शब्दशास्त्रं जिज्ञासूनां हृदयानि आवर्जयति, तथैवेयं पदमञ्जर्याख्येति व्याख्यापि मदीयेति मनुते ग्रन्थकारः। अनुमीयते च यच्छ्लोकान्तर्गत—'पदमञ्जरी'ति पदमधिकृत्य ग्रन्थकारेण 'पदमञ्जरी'ति नाम्ना व्यवहृतोऽयं ग्रन्थ इति।

किञ्च—

"अविचारितरमणीयं कामं व्याख्याशतं भवतु वृत्तेः।
हृदयङ्गमा भविष्यति गुणगृह्याणामियं व्याख्या॥"[2]

अयमाशयोऽविचारितं यथा स्यात्तथा रमणीयं व्याख्यापरश्शतं भवतु नाम काशिकावृत्तेरस्याः। परं नूनं हि गुणगृह्याणां सहृदयानामियं मदीया व्याख्या हृदयहारिणी स्यादिति मनुते ग्रन्थकारः।

अपरञ्च—

"प्रक्रियातर्कगहनप्रविष्टो हृष्टमानसः।
हरदत्तहरिः स्वैरं विहरन् केन वार्यते॥"[3]

तत्र 'न धातुलोप आर्धधातुके' (१।१।४) इति सूत्रे व्याख्यानान्ते हरदत्ताचार्येणात्मनः पाण्डित्यमुच्चकैरुद्घुष्यताऽत्मानञ्च स्तुवता प्रत्यपादि—

---

१. द्र०—न्यासपदम० सहि० काशिवृत्तेः प्र० भा० मङ्गलाचरणे, तृती० पृष्ठे।
२. द्र० तत्रैव न्यासपदम० सहितायाः काशि० वृत्तेः मङ्गलाचरणे।
३. द्र० न्यासपदम० सहितायाः काशि० वृत्तेः प्र० पादे न धातुलोप'सूत्रे प्र० भागे।

प्रक्रियायां विषये यस्तर्क ऊहापोहात्मकस्तद्रूपं गहनं कालन्तरं तत्प्रविष्टस्तत्र लब्धप्रवेश इत्यर्थः। हृष्टमानसः प्रमना विस्रब्ध इति यावत् प्रतिद्वन्द्विनोऽभावात्। महती खलु सम्भावनाऽस्य विवरणकारस्यात्मनि, यद्व्याकरणशास्त्रकान्तारे स्वच्छन्द-गामिनमात्मानं हरिं मन्यते इत्यर्थः।

तत्र प्रकृतिप्रत्ययादिविश्लेषण - मूलभूतशब्दान्वेषण - धातुप्रत्ययादिनिर्धारण-दिशा च पदमञ्जरी नूनमेव व्याख्यानान्तराण्यतिशेते। परं हन्त! पाण्डित्यातिशयत्वाद्, भाषा भावादिगाम्भीर्यातिरेकाच्चेमां शास्त्रार्थसौरभजुष्टाम्, भाष्यहरिकैयटादि-सिद्धान्तोपगूढां पदमञ्जरीमधिकृत्य नाद्यावधि अंशतोऽपि शोधकार्यं दृष्टिपथमायाति।'[1]

अतोऽत्र 'पदमञ्जर्याः संस्कृतव्याकरणे स्थानं तन्महत्त्वञ्चे'ति विषयमधिकृत्य संक्षिप्य किञ्चित्प्रस्तूयते।

तत्रास्यां पदमञ्जर्यां यत्र शास्त्रार्थविषयो महताडम्बरेण स्फोरितस्तत्र चास्याः शास्त्रार्थसरणावभ्यार्हितत्वाद् वर्तमानविद्वत्समाजे महदादर इति सर्वैरेवानुभूयते। किञ्च श्रीजिनेन्द्रबुद्धिपादानां व्याख्याशैली प्रौढा, पाण्डित्यपूर्णा, अधिगमितयाथातथ्या च, अतस्तस्या एव महत्त्वमधिकतरं वर्ततेऽधिगन्तॄणामधिजिगमिषूणाञ्च कृते, तथापि प्राच्य-भारतीप्रकाशनसम्पादकाभ्यां श्रीद्वारिकाप्रसादशास्त्रि—श्रीकालिकाप्रसादशुक्ल-महाभागाभ्यां स्वसम्पादिते प्राच्यभारतीसंस्करणे श्रीहरदत्तमिश्रविरचितायाः पद-मञ्जर्या एव पूर्वनिपातो विहितः। मन्ये पदमञ्जर्याः शास्त्रार्थशैली, गूढाभिव्यञ्जनयुता-ऽपूर्वा रचनाचातुरी च तस्या अद्याप्यध्ययनाध्यापनप्रसक्तानां विद्वद्धुरीणानां सहृदयानाञ्च हृदयानि हठादावर्जयति।

---

१. अत एव पदमञ्जरीमधिकृत्य ग्रथिते 'पदमञ्जर्याःपर्यालोचनमि'त्येतस्मिन् शोध-प्रबन्धे मदीये अष्टावध्याया विलसन्ति, यत्र पदमञ्जरीमधिकृत्य साङ्गोपाङ्गविवरण-मुपन्यसितमवलोक्यते। तत्र प्रथमेऽध्याये विषयावताररूपेण पौरस्त्यपाश्चात्यविदुष आ-श्रित्य हरदत्ताचार्यस्याविर्भावकाल-जन्मस्थान-रचनादिचातुर्यं सोपत्तिकमुपपादितम्। द्वितीये, 'पदमञ्जर्याः संस्कृतव्याकरणे-स्थानम्', तृतीये 'पदमञ्जर्यां पूर्ववर्ति-वैयाकर-णानां प्रभावः', चतुर्थे 'पदमञ्जर्याः परवर्तिव्याकरणग्रन्थेषु प्रभावः' पञ्चमे 'पदमञ्जर्याः प्रतिपादनशैली काशिकावृत्तिव्याख्याने चोपकारः', षष्ठे 'पदमञ्जर्याः संस्करणानि मातृकाग्रन्थानामितिवृत्तञ्च', सप्तमे काशिकावृत्तेर्व्याख्यानानि', अष्टमे 'न्यासपदमञ्जर्योस्साम्यं वैषम्यञ्चेति' विविधा विषया युक्तिप्रामाण्याभ्यामुपपादिताः। अन्त्ये चोपसंहारात्मकेऽध्याये पूर्वाध्यायेषु विहितानां विमर्शाणां ससङ्ग्रहमावृत्तिरिति सर्वोऽपि प्रतिपाद्यविषयो निपुणं परीक्ष्य सन्निधापितः।

हरदत्ताचार्यस्य वैदुष्यं रचनाचातुर्यञ्च —

विद्यमानायामपि न्याससमाख्यायां काशिकाव्याख्यायां व्याख्यानान्तरे प्रयासोऽस्य विद्वत्पुङ्गवस्य साहसं नाम। यत्र तत्रानुकुर्वन्नपि न्यासस्य बहुलं प्रकर्षमाधत्ते तत्स्थेषु सूत्रवार्तिकादिव्याख्यानेषु। कैयटमुपजीवन्नपि नाविशेषेण तं यत्रतत्राशङ्कितमनुसरति। किन्तर्हि स्वदर्शनमनुसन्धानः क्वचिदुपाध्यायजैयटपुत्रकैयटमतं सोपपत्तिकं निराकरोति। किञ्च पदमञ्जर्याख्यमिदं व्याख्यानं हरदत्ताचार्यस्य निरतिशयं पाण्डित्यं सूत्रवार्तिकादिव्याख्यानावसरेष्वभिव्यक्तापूर्वपाटवान्वितं च प्रतिभातीति।

किञ्च महाभाष्य-महाभाष्यदीपिका-प्रदीप-वाक्यपदीय - न्यासादिग्रन्थरत्नसारभूतायाः पदमञ्जर्याः नूतनोद्भावनायाः, समन्वयात्मकज्ञानगुम्फनप्रतिभादिहेतोश्च संस्कृतव्याकरणे वर्तमानविद्वत्समाजे च किमप्यपूर्वमद्वितीयञ्च पदमस्तीति बोध्यम्। अत एव भाष्य-कैयटप्रदीप-न्यास-शब्दकौस्तुभादिग्रन्थोद्धरणैस्तुलनात्मकेन सूक्ष्मेक्षिकया पर्यवेक्षणेन च ग्रन्थस्यास्य संस्कृतव्याकरणे स्थानं तन्महत्त्वं च कतिपयैरुदाहरणैः प्रपञ्चयिष्यते। तत्रादौ हरदत्ताचार्येण 'णेरणौ यत्कर्म णौ चेत्स कर्ताऽनाध्याने' (१।३।६७) इति सूत्रं व्याख्यातवता पदमञ्जर्यां पञ्चधा विभक्तम्। तद्यथा—'णेरात्मनेपदं भवति अनाध्यानादन्यत्रेत्येकं वाक्यम्, ततोऽणौ यत्कर्मेति द्वितीयम्, ततोऽणौ चेदिति तृतीयं वाक्यम्, ततः स कर्तेति चतुर्थम्, 'अनाध्याने' इत्येतदपि प्रसज्यप्रतिषेधे पञ्चमं वाक्यम्।"[१]

ततश्च वृत्तिकाराणामपि मतं विवृण्वता प्रत्यपादि तेन पदमञ्जर्याम्—'तत्र वृत्तिकारेण त्रीणि वाक्यानि स्ववाचा दर्शितानि ण्यन्तादात्मनेपदं भवतीत्येकं वाक्यम्, अणौ यत्कर्म णौ चेत्तदेव कर्मेति द्वितीयम्, स एव कर्ता भवतीति तृतीयम्। 'णौ चेद्' ग्रहणं समानक्रियार्थमिति तु वक्ष्यति, अतस्तदपि वाक्यमभ्युपगतमेव।"[२] भाष्यकारेण तु'णेरणौ' (१।३।६७) प्रभृति सूत्रे त्रिधा विभज्य व्याख्यातम्। तद्यथा—'णेः' आत्मनेपदं भवति। ततः 'अणौ यत्कर्म णौ चेत्' अण्यन्ते यत्कर्म णौ चेत् णौ यदि तदेव कर्म भवति। ततः स कर्ता', कर्ता चेत्स भवति णाविति।"[३]

---

१. द्र० न्यासपदम० सहितायाः काशि० वृ० प्र० भा० ४६४-४६५ तमे पृ० 'णेरणौ' प्रभृति सूत्रे पदम०।

२. द्र०-तत्रैव 'णेरणौ' प्रभृतिसूत्रे प्र० भा० ४६५ तमे पृ० पदम०।

३. द्र० व्याकरणमहा० मोतीला० बनार० प्रका० १९६७ तमे क्रै० संस्क० 'णेरणौ' इति सूत्रे १७८ तमे पृ० प्र० ख०।

कैयटेनाऽपि 'महाभाष्यप्रदीपे' भाष्यवत्सूत्रमिदं त्रिधैव विभक्तम्, परन्तु 'अणौ यत्कर्म णौ चेदि'ति द्वितीयवाक्ये यत्तदोर्नित्यसम्बन्धादिकमधिकृत्य तत्रैव प्रत्यपादि—'अत्र वाक्ये यत्तदोर्नित्यसम्बन्धावच्छेदेन तच्छब्द आक्षिप्यते। धर्मान्तरस्य चानिर्देशात्कर्मत्वमेव संनिधानात्प्रतिनिर्दिश्यते। प्रतिनिर्देशेन च कर्मान्तरव्यावृत्तिः क्रियते।"[१]

न्यासकारेण तु पूर्वापरपक्षोपस्थापनपुरस्सरं सूत्रमिदमधिकृत्य किञ्चदपि न व्याख्यायि। किञ्च श्रीमद्भट्टोजीदीक्षितेन 'शब्दकौस्तुभे' 'णेरणौ' प्रभृतिसूत्रं त्रिधैव विभक्तम्। तद्यथा—'ण्यन्तादात्मनेपदं' 'स्यादनाध्याने' इत्येकं वाक्यम्, अणौ यत्कर्म णौ चेदिति द्वितीयं वाक्यम्, ततः स कर्तेति तृतीयं वाक्यम्।"[२] परं श्रीमद्भट्टोजीदीक्षितेन 'सिद्धान्तकौमुद्याम्' इह चत्वार्यवान्तरवाक्यानीत्यनेन प्रकारेण सूत्रमिदं चतुर्धा विभक्तम्।

तदेवं काशिका-महाभाष्य - कैयटप्रदीप-न्यासशब्दकौस्तुभादिव्याख्यानग्रन्थैस्सह पदमञ्जर्याः सूक्ष्मेक्षिकया पर्यवेक्षणेनाध्यवसीयते यद्धरदत्ताचार्याणां पदमञ्जर्याख्यमिदं व्याख्यानं प्रतिभान्वितम्, बुद्धिग्राह्यम्, यौक्तिकम्, मौलिकोद्भावनान्वितञ्च प्रतिभाति। अत्र च ग्रन्थकारेण सूत्रमिदं पञ्चधा विभज्य यद्व्याख्यातम् तन्नितरामेव वैशिष्ट्यमावहति।

'विप्रतिषेधे परं कार्यम्' (१।४।२) इत्यस्ति सूत्रं पदमञ्जर्यां व्याख्यातम्। तत्र हरदत्तचार्येण 'विप्रतिषेधेति' सूत्र-घटकं 'सेधे'तिपदमधिकृत्याधोऽङ्कितेन विधिना व्याख्यायि—' षिधु शास्त्रे" "षिधु गत्याम्" इति भौवादिकयोरन्यतरस्य रूपम्, तस्य हि 'सेधसिचसञ्जस्वञ्जाम्' (४।३।५) इति षत्वम्। उपसर्गवशाच्च विरोधार्थत्वम्। धातूनां ह्युपसर्गवशादन्यश्चार्थ उपजायते। तद्यथा-प्रहारः, उपहारः, अनुहारः, संहार इति। 'षिधू संराद्धौ' इत्यस्य तु दैवादिकस्य षत्वं नास्ति, 'सेधषिच' इति शपानिर्देशात्। 'आदेशप्रत्यययोः' इति विहितस्य तु 'सात्पदाद्योः' इति निषेधः।"[३]

महाभाष्यकारेण तु व्याकरणमहाभाष्ये 'विप्रतिषेधे'ति सूत्रघटकं 'सेधे'ति पदमधिकृत्य प्रत्यपादि—

---

१. द्र०-तत्रैव व्याकरणमहा० प्रदीपे० १ अ० ३ पा० २ आ० 'णेरणौ' सूत्रे १७८ तमे पृ० प्र० ख०।

२. द्र०-श्रीभट्टोजीदी० विर० 'शब्दकौस्तुभे' द्वि० भा० ८१ तमे पृ० १९८५ तमे वैक्र० संस्क०।

३. द्र० न्यासपदम० सहितायाः काशि० वृत्तेः प्र०भा० विप्रतिषेधेति सू० ४९८ तमे पृ० पदम०।

'विप्रतिपूर्वात्सिधेः कर्मव्यतिहारे घञ् । इतरेतरप्रतिषेधो विप्रतिषेधः । अन्योऽन्यप्रतिषेधो विप्रतिषेधः' इति ।[१] कस्य सिधेरत्र ग्रहणमिति तु नोट्टङ्कितं भाष्यकारेण। किञ्च कैयटनागेशाभ्यामपि 'विप्रतिषेधे'ति सूत्रघटकं 'सेधे'ति पदमधिकृत्य न किमप्युपपादितम् ।

न्यासकारेणाऽपि सूत्रघटकं 'विप्रतिषेधे'ति पदमधिकृत्य तस्य व्युत्पत्तिनिष्पत्त्यादिकञ्चाधिकृत्य किञ्चिदपि न व्यमर्शि । विप्रतिषिद्धमित्यनेन विरुद्धमित्येव बोध्यमिति तस्याशयः ।

भट्टोजीदीक्षितेन 'शब्दकौस्तुभे' तु 'विप्रतिषेधे'तिपदमधिकृत्यामुना व्याख्यायि —

"विप्रतिपूर्वात्सेधतेर्घञ्, 'उपसर्गात्सुनोति (८।३।६५) इति षत्वम् । उपसर्गवशाच्च विरोधार्थकत्वम् ।"[२] इति ।

ततश्च सूत्रघटकं 'परमि'ति पदमधिकृत्य हरदत्ताचार्येण न्यबन्धि पदमञ्जर्याम्—

"परशब्दोऽयं त्रिलिङ्गः—परो देशः, परा सेना, परं कार्यमिति । अतोऽयमव्युत्पन्नः, पचाद्यन्तो वा, न तु 'ऋदोरप्' इत्यबन्तः, तथा हि सति त्रिलिङ्गता न स्यात् ।"

"कृल्ल्युट् नपुंसके भावे स्त्रियां क्तिन्नादयो यतः ।
अतो घञाद्याः पुंस्येव यथा पाकश्चयो लवः ।।"[३] इति ।

भाष्यकारेणाऽपि सूत्रघटकं 'परमि'ति पदमधिकृत्य न्यबन्धि—"परशब्दोऽयं बह्वर्थः । अस्त्येव व्यवस्थायां वर्तते, तद्यथा—'पूर्वः परः 'इति । अस्त्यन्यार्थे वर्तते—परपुत्रः परभार्या 'अन्यपुत्रोऽन्यभार्ये'ति गम्यते । अस्ति प्राधान्ये वर्तते, तद्यथा—

---

१. द्र० विप्रतिषेधे' सू० १ अ० ४ पा० १ आ० २०४ तमे पृ० व्याक० महाभाष्ये ।
२. द्र० श्रीभट्टोजीदीक्षि० विर० शब्दकौ० 'प्रथ० अध्या० चतु० पादे० प्रथमा० ९३ तमे पृ० द्वि०भा० ।
३. द्र० तत्रैव 'विप्रतिषेधेति सूत्रे न्यासपदम०सहि० काशि० प्र० भा० ४९८ तमे पृ० पदम० ।

'परमियं — ब्राह्मण्यस्मिन्कुटुम्बे प्रधानमिति गम्यते, अस्तीष्टवाची परशब्दः, तद्यथा— 'परं धाम गतः' इष्टं धाम गत इति गम्यते । तद्य इष्टवाची परशब्दस्तस्येदं ग्रहणं "विप्रतिषेधे परं यदिष्टं तद्भवति"[1] इति ।

तदेवं भाष्य-प्रदीप - न्यास - शब्दकौस्तुभादिव्याकरणशास्त्रीयमूर्धन्यग्रन्थानां पदमञ्जर्या सह सूक्ष्मेक्षिकया पर्यालोचनेनाध्यवसीयते यदत्र सूत्रे 'षिधु शास्त्रे' 'षिधुगत्या-मि'ति भौवादिकधातुद्वयप्रतिपादनेन, भाष्य-प्रदीप-न्यासादिशास्त्रेष्वप्यनुपलब्धेन, 'परशब्दोऽयमव्युत्पन्नः, पचाद्यजन्तो वे'ति विवरणेन च पदमञ्जरी ग्रन्थेतरानतिशेते ।

किञ्च यत्र तत्र वाक्यपदीयाभिः कारिकाभिः स्ववर्ण्यविषयं परिपुष्य कैयटानुमतमेव निर्णयं प्राकाशि हरदत्तेनेति बोध्यम् ।

'ध्रुवमपायेऽपादान'मिति (१।४।२४) सूत्रं पदमञ्जर्यां विशदय्य व्याख्यातम् । तत्र 'ध्रुवमि'ति पदमधिकृत्य हरदत्तमिश्रेण प्रत्यपादि—"ध्रुवमिति ।" ध्रु गति-स्थैर्ययोः 'इत्यस्मात्कुटादेः पचाद्यचि रूपम् । ये तु 'ध्रुवगतिस्थैर्ययोः' इति पठन्ति, 'तेषामिगुपधलक्षणः कः प्रत्ययः' ।[2]

ततश्च 'ध्रुवमि'त्यनेन कोऽर्थः प्रत्याय्यते, इत्यधिकृत्य हरदत्तेन व्यमर्शि— "ध्रुवमित्येकरूपमुच्यते—ध्रुवमस्य शीलम्, ध्रुवमस्य रूपमिति । इह तदपायेन विशेष्यते—अपाये यद्ध्रुवमिति, न तु सार्वत्रिकम्, तच्चापाये ध्रुवमुच्यते—यदपायेनानाविश्यते उपयुज्यते चापाये, तच्चार्थादवधिभूतम् ।"[3]

न्यास-भाष्यकाराभ्यामपि सूत्रस्थं ध्रुवमित्यादिकमधिकृत्य यन्न व्याख्यायि तद्धरदत्तेन सुतरामेव निष्पादितमित्यनेन ग्रन्थकारवैदुष्यं स्वत एव ध्वन्यते ।

ततश्चापायेति पदमधिकृत्य कैयटेन महाभाष्यप्रदीपे न्यबन्धि —

"अपायोऽत्र विभागजसंयोगानुकूलोऽवधिसाकाङ्क्षो गतिविशेषः । 'गतिर्विना

---

१. द्र० 'विप्रतिषेध'सूत्रे मोतीलालबनार० प्रका० महाभा० प्र०ख० २०७ तमे पृ० ।

२. द्र०—न्यासपदम० सहि० काशि०वृत्तेः प्र०भा० 'ध्रुवमपाये' इति सूत्रे ५३५ तमे पृ० पदम० :

३. द्र०—'ध्रुवमपाये' इति सूत्रे ५३५ तमे पृ० पदम० ।

त्ववधिना नापाय इति कथ्यते' इति हर्युक्तेः"[१] एवं च सार्थाद् हीनः, रथात्पतितः, धावतः पतित इत्यादौ सत्यपि क्रियान्तरावेशाच्चलत्वे तत्तद्धावनादिक्रियानावेशात्तन्निमित्तमपायं प्रत्यौदासीन्यादस्त्येव ध्रुवत्वमिति भवत्येव संज्ञा। उद्धृता च हर्युक्ता कारिका पदमञ्जर्याम्—

'अपाये यदुदासीनं चलं वा यदि वाचलम्।
ध्रुवमेवातदावेशात् तदपादानमुच्यते ॥ इति।

पततः पतित इत्यत्रापि परगतपातापेक्षया ध्रौव्यमेव। तथा हि—

पततो ध्रुव एवाश्वो यस्मादश्वात्पतत्यसौ।
तस्य त्वश्वस्य पतने कुड्यादिर्ध्रुव उच्यते ॥

इह तु परस्परस्मान्मेषावपसर्पत इति—

मेषान्तर-क्रियापेक्षमवधित्वं पृथक् पृथक्।
मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक्पृथक् ॥
गतिर्विना त्ववधिना नापाय इति कथ्यते ॥"[२]

अत्र हि 'परस्परस्माद् मेषौ अपसरतः' इति वाक्ये मेषान्यस्य मेषान्तरं प्रति क्रियामादाय द्वयोरवधित्वं, भिद्यते, तथैव द्वयोरेकतरस्य च क्रियामादाय कर्तृत्वमपि भिद्यते।[३]

जिनेन्द्रबुद्धिना तु 'किन्नाम ध्रुवत्वमि'त्यादिकमधिकृत्य भर्तृहरिकारिकादिभिः स्वपक्षो नोपबृंहितः, किञ्च कैयटेनापि महाभाष्यप्रदीपे 'मेषो मेषादपसर्पती'त्यत्राभ्यधायि—"मेषो मेषादपसर्पतीत्यत्रैकस्य कर्तृत्वविवक्षापरस्यापादानविवक्षा। यदा तु मेषावपसरत इति प्रयोगस्तदाऽवध्यन्तरमपेक्षणीयम्।"[४]

---

१. द्र० मोतीला० बनार० प्रका० महा० १ अ० ४ पा० ३ आ० ध्रुवमपाये सूत्रे २४८ तमे पृ० प्र०ख०।

२. द्र०—'ध्रुवमपाये' इति सू० ५३६ तमे पृ० पदम०।

३. द्र०—श्रीधरानन्दविर० वैया० सिद्धा० कौमु० 'ध्रुवमपाये' प्रभृतिसूत्रे ११७ तमे पृ०।

४. द्र०—मोतीलाल बनार० प्रका० १ अ० ४ पा० ३ आ० 'ध्रुवमपाये' सूत्रे २५० तमे पृ० महाभा० प्रदीपे।

परन्तु नागेशेन महाभाष्यप्रदीपोद्योते 'परस्परस्मान्मेषावपसरतः' इत्यत्राभ्यधायि—

"मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक् ।
मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक् पृथग् ॥
इति बोध्यम् ।"[1]

तदेवं पदमञ्जरी-न्यास-महाभाष्य-प्रदीप-प्रदीपोद्योतादिग्रन्थप्रमुखानां पारस्परिकेण तुलनात्मकेन पर्यवेक्षणेनाध्यवसीयते यदत्र सूत्रे 'ध्रुवापायये'व्याख्यानं यथा खलु हरदत्तेन, 'ध्रुवमस्य रूपम्, ध्रुवमस्य शीलम्', 'अपायः विश्लेषः, विभागस्तद्धेतुभूतश्च गतिविशेषोऽवधिसापेक्षेत्यादि रूपेण, हरिकारिकाभिश्चापोद्बलितम्, न तथान्यैर्वैयाकरणप्रमुखैर्व्यवसितमत्रेति हरदत्तस्य संस्कृतव्याकरणे स्थानं तन्महत्त्वञ्च स्फुटमेवेति नात्र संशयावकाशलेशोऽपि ।

एवमेव 'न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच्' (७।३।३) इति सूत्रे हरदत्तेन स्वविहितायां पदमञ्जर्यां स्वव्याख्यानं व्याडिकृतसंग्रहश्लोकाभ्यामप्युपोद्बलितम्, तद्यथा—'य्वाभ्यां पूर्वावैचौ भवतस्तौ चाङ्गस्यावयवा विति । अत्र संग्रहश्लोकौ—

नाप्राप्ताया हि वृद्धेः प्रतिपदविधिरैज्बाधको नञ्किमर्थो ।
याभ्यां य्वाभ्यां परस्येच् प्रसजति तत एवेष पूर्वो यथा स्यात् ॥
मादाध्यश्वादिके ऽ भूदिति ननु विहितौ यावचां स्थान आदे ।
य्वौ ताभ्यामेजिहैवं न भवति इति चेद् द्वे अशीती अधीष्टे ॥
स्यादैज् द्व्याशीतिकेऽङ्गाद्यच इति विहितस्यैवमैच्चेत्प्रसङ्गाद् ।
य्वौ न स्यातां विशिष्टौ श्रुतमपि च सकृन्नोभयं भेत्तुमर्हम् ॥
स्यादेतस्योत्तरत्राप्यधिकृतिरिह च पदस्यात्तरस्यैवपूर्वे ।
त्रैयालिन्दे भवति, न च भवेद् द्वे अशीती अधीष्टे"[2] ॥

तदिह सूत्रे ह्याचार्यव्याडिविहिताल्लक्षैकश्लोकमितात्संग्रहाख्यग्रन्थादप्याहृताभ्यां श्लोकाभ्यां ग्रन्थकारेण स्वव्याख्यानमुपबृंहितम्, तेन ग्रन्थकारस्य पाण्डित्यातिशयं नूनमेवाभिव्यज्यते । किञ्च न्यासे एतादृग्वर्णनं सर्वथैव नोपलभ्यते ।

१. द्र०—तत्रैव सूत्रे महाभाष्यप्रदीपोद्योते ।
२. द्र०—न्यासपदम० सहि० काशिवृत्तेः षष्ठे भा० 'न य्वाभ्यां' प्रभृतिसूत्रे अष्टमे पृ० पदम० ।

"निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम्" (८।१।३०) इति सूत्रं वामन-जयादित्यविरचितायां काशिकायां सुष्ठु व्याख्यातम्। तत्र चानेन सूत्रेण यत्, यदि, हन्त, कुवित्, नेत्, चेत्, चण्, कच्चित्, यत्र—इत्येतैर्निपातैर्युक्तं तिङन्तं नानुदात्तं भवतीत्यनुदात्तविधिर्निषिध्यते। ततश्च सूत्रमिदं हरदत्तेन स्वप्रणीतैश्श्लोकैर्व्याख्यातवता प्रत्यपादि पदमञ्जर्याम्—

"यद्यदार्थे च हेतौ च विचारे यदिचेच्चण:।
हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयो:॥
कच्चित्प्रश्ने नेन्निषेधे प्रशंसायां कुवित्स्मृतम्।
यत्राधारे निपातत्वं यदादीनां विशेषणम्॥
समासे गुणभूतानामपि गत्यन्तरं न हि।
नैव वाऽयं समास: सुबव्ययत्वेन लुप्यते॥[1]

तदेवमुपरिनिर्दिष्टैश्श्लोकैर्नानादृशां सूत्रघटितानां निपातादीनां विविधान्निर्दिश्यार्थान्बह्वृचानां मतान्युद्धरता पुनर्न्यबन्धि पदमञ्जरीकारेण—

"तत्र बह्वृचा:—'नेच्चेद्' इति निपातसमाहारमधीयते—नेदेवमायुनजन्नत्र देवा:। अन्यश्चेन्नाभिगच्छतीति चेदर्थे वर्तते इति। य एव समुच्चयादिषु दृष्टश्च शब्द: स एव चेदर्थे वर्तते। तथा च चादयोऽनुदात्ता इत्ययं चेदर्थोऽप्यनुदात्त: इन्द्रश्च मृडयाति न:, इन्द्रश्चेदस्मान्मृडयेत्। त्वं च सौम नो वशो जीवातुं न परामहे।"[2]

अत्रोपरितनेनोद्धरणेनाध्यवसीयते यद्बह्वृचा यत्र 'नेच्चेदि'ति निपातसमाहारमधीयते, तत्र 'नेदेव' 'अन्यश्चेन्नाभिगच्छती'त्युद्धरणैरेतयो: पृथक्त्वमप्यक्षिलक्षीक्रियते। अथ च समुच्चयादिषु दृष्टश्च शब्दश्चेदर्थ: 'चादयोऽनुदात्ता:' इत्यनेन चेदर्थोऽप्यनुदात्त एवेति बोद्धव्यम्। किञ्च इन्द्रश्च मृडयाति न: "इन्द्रश्चेदस्मान्मृडये"दित्यादि छान्दसोद्धरणेभ्योऽपि हरदत्ताचार्यस्य वेद-ब्राह्मण-व्याकरणादिशास्त्रेषु पारगामित्वं नितरामेवाभिव्यज्यते।

तद्वेवं 'पदमञ्जर्या: संस्कृतव्याकरणे स्थानं तन्महत्त्वञ्चे'त्यस्मिन्निबन्धे शास्त्रार्थसौरभजुष्टाया:, सूत्रवार्तिकादिव्याख्यानप्रसक्ताया:, ग्रन्थकारमौलिकोद्भावना-

---

१. द्र—न्यासपदम० सहि० काशि० वृत्ते: षष्ठे भा० 'निपातैर्यद्यदि' सूत्रे २७८ तमे पृ० पदम०।

२. द्र०—तत्रैव 'निपातैर्यद्यदि' प्रभृति सूत्रे ष० भा० २७८-७९ तमे पृ० पदम०।

न्वितायाः, सूत्रघटकप्रतिपदव्युत्पत्तिनिर्वचनादिव्यग्रायाः भाष्य-प्रदीप-प्रदीपाद्योत-न्यासादिसिद्धान्तोपगूढायाः पदमञ्जरीविशिष्टायाः श्रीहरदत्तमिश्रविरचितायाः पदमञ्जर्याः महत्त्वं-णेरणौ-ध्रुवमपाये-विप्रतिषेधेपरम्-नय्वाभ्यां पदान्ताभ्याम्-निपातैर्यद्यदि-प्रभृतिसूत्रोद्धरणैस्तेषाञ्च सूक्ष्मेक्षिकया पर्यालोचनेन, निर्धार्य विषयोऽयमुपसंह्रियते । अतो हि निश्चप्रचमेव यत्पदमञ्जरी संस्कृतव्याकरणे किमप्यपूर्वं गौरवास्पदञ्च स्थानं बिभर्ति, तस्मात् स्थान एवोक्तं ग्रन्थकारेण—

> "यश्चिराय हरदत्तसंज्ञया विश्रुतो दशसु दिक्षु दक्षिणः ।
> उज्जहार पदमञ्जरीमसौ शब्दशास्त्रसहकारपादपात् ॥"

अग्रे विद्वांस एव प्रमाणमित्यलमतिविस्तरेण ।

विज्ञानवादी सहोपलम्भनियम तथा अद्वैतवेदान्त

—डॉ० अभेदानन्द

आचार्य दिङ्नाग के अनुसार बाह्यवस्तुओं का कोई अस्तित्व नहीं है। जो कुछ भी घट-पटादिकों के रूप में दिखाई देते हैं, वे सब विज्ञान के ही आकार हैं। वस्तुतः विज्ञान ही बाह्य-वस्तुओं के रूप में अवभासित हो रहा है। दिङ्नाग के अनुसार बाह्य-वस्तुओं की कल्पना दो रूपों में की जा सकती है—अणुरूप में या संघात रूप में। अणु अविभाज्य एवं अमूर्त है। अणुओं का प्रत्यक्ष सम्भव नहीं, तब अणुओं के सङ्घात के विषय में भी वही बात होगी, अर्थात् अणुओं के संघात का भी प्रत्यक्ष असम्भव है। इस प्रकार बाह्यवस्तुएँ न अणुरूप हो सकतीं हैं और न ही अणुओं का सघातरूप ही। बाह्यवस्तुएं प्रत्यक्षगोचर होती हैं। अणु या संघात बाह्यवस्तुओं के कारण नहीं बन सकते।[1] दिङ्नाग के अनुसार आन्तरिक प्रत्यय ही बाह्यवस्तुओं के रूप में भासित होते हैं। ये ही आन्तरिक प्रत्यय ग्राह्य-ग्राहकता के रूप में अवभासित होते हैं। वस्तुतः ग्राह्य और ग्राहक दोनों ही आन्तरिक हैं। बाह्यता अलीक है।

धर्मकीर्ति के अनुसार "सत् वह है जो प्रभावोत्पादन में समर्थ हो। जो वस्तु किसी कार्य को उत्पन्न करने में समर्थ है, वह असत् है, अतः अर्थक्रियाकारित्व-प्रभावोत्पादन सामर्थ्य" परमार्थ का लक्षण है। धर्मकीर्ति के अनुसार बाह्यवस्तुएँ असत् हैं, फिर भी अनादि वासना के कारण नानात्व एवं बाह्यत्व दिखायी देता है। परम सत् ग्राह्य-ग्राहकत्व से परे है। पाण्डुरोगी रोग के कारण जिस प्रकार शंख को पीला देखता है—उसी प्रकार अविद्याग्रस्त होने के कारण चित्त को परम सत्

---

३. आलम्बन परीक्षा का० १।
एवं आलम्बन परीक्षावृत्ति पृ० ३ तथा ४१

नहीं समझ पाते, न ही बाह्यवस्तुओं को ही असत् समझते हैं। आन्तरिक प्रत्ययों को ही बाह्य वस्तुएं मान बैठते हैं। एकमात्र चित्त ही शुद्ध सत् है, वह स्वयंप्रकाश एवं स्वतः देदीप्यमान है।[1]

शान्तरक्षित ने भी धर्मकीर्ति के समान अर्थक्रियाकारी सामर्थ्य को ही परमार्थ कहा है। वह प्रभावोत्पादन में समर्थ है तथा क्षणिक है। संसार की सभी वस्तुएँ शान्तरक्षित के अनुसार क्षणिक हैं, क्योंकि वे विनाशी हैं। क्षणिक वस्तु की उत्पत्ति का अर्थ है, उसका विनाश अवश्यम्भावी है।[2] विनाश वस्तु में कहीं बाहर से नहीं आता, किन्तु वस्तु के साथ ही होता है।[3] अविनश्वर और नित्य वस्तु असम्भव है। यह विवेक और तर्क के विपरीत है। यदि कोई वस्तु नित्य और शाश्वत है तो उसमें उत्पन्न होनेवाले सभी कार्यों की एकसाथ उत्पत्ति होनी चाहिये, क्योंकि निमित्तकारण या प्रभावोत्पादककारण विद्यमान होने के कारण विलम्ब का कोई हेतु नहीं है। इस प्रकार की कल्पना यथार्थजीवन के विपरीत है। वस्तुएँ प्रतिक्षण परिवर्तनशील हैं। भ्रमवश उनकी सादृश्यता को हम एकरूपता मान बैठते हैं, और लगने लगता है कि वस्तुएँ नित्य हैं। वस्तुतः वस्तुएँ क्षणिक हैं। इस क्षणिक विज्ञानवाद का प्रतिपादन करते हुए शान्तरक्षित ने कहा है कि विज्ञान के अतिरिक्त बाह्यता नहीं है। ये सब क्षणिक विज्ञान के ही विलासमात्र हैं। इस क्षणिक विज्ञान का प्रकाशक अन्य नहीं है। यदि प्रकाश्य प्रकाशक हैं भी, तो भी वे विज्ञानमात्र हैं, इसीलिये विज्ञानवाद में ज्ञान और ज्ञेय को अभेद कहा है। दोनों में भेद नहीं है। इसी को धर्मकीर्ति ने प्रमाणविनिश्चय में 'सहोपलम्भ नियम' कहा है।[4] इस नियम के अनुसार वस्तु और वस्तु के ज्ञान में पार्थक्य नहीं है। प्रत्ययवाद का यह मूल और प्रधान तर्क है कि विज्ञान और विज्ञेय में अन्तर नहीं किया जा सकता, क्योंकि प्रत्ययवादी का कहना है कि कोई भी वस्तु ज्ञान के बिना उपलब्धि का विषय कैसे बन सकती है? ज्ञान के बिना वस्तु को जानना वदतोव्याघात है। ज्ञान के बिना

---

१. प्रभास्वरमिदं चित्तं प्रकृत्यागन्तवो मलाः। प्रमाणवार्तिक २-२०८ धर्मकीर्ति, सम्पा० राहुल सांकृत्यायन, किताबमहल, इलाहाबाद १९४३।

२. तत्त्वसंग्रह कारिका ३७५।

३. वही, पृ० ३७६।

४. सहोपलम्भनियमादभेदो नीलतद्धियोः।
भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दाविवाद्वये॥
—भामती में उद्धृत पृ० ५४४

वस्तु की सिद्धि करना असम्भव है। जहाँ भी वस्तु की सिद्धि की जायेगी, ज्ञान वहाँ पर होगा। ज्ञान और ज्ञेय में एक प्रकार यह व्याप्ति है, किन्तु प्रत्ययवादी का कहना है कि ज्ञान विषय-निरपेक्ष हो सकता है, विषय ज्ञान निरपेक्ष नहीं हो सकता। बर्कले ने भी इसी तर्क से बाह्य वस्तुओं का प्रत्याख्यान किया है। उनके अनुसार "सत्ता सर्वदा अनुभवमूलक होती है"[1] जहाँ अनुभव नहीं, सत्ता नहीं। इसी प्रकार विज्ञानवादी बौद्ध का भी यही कथन है कि ज्ञान के बिना ज्ञेय के अस्तित्व की सिद्धि कैसे सम्भव है? वहां पर भी घट को जाना गया वह ज्ञात पाया गया है। धर्मकीर्ति का सहोपलम्भ नियम भी यही बतलाता है कि विषय नील और उसकी धी अर्थात् ज्ञान दोनों अभिन्न हैं—नील वस्तु और नील ज्ञान दोनों अभिन्न पदार्थ हैं। जिसे ज्ञान का विषय कहा जाता है वह भी ज्ञान का ही आकारविशेष है। नीलाकार विज्ञानविशेष ही नील वस्तु है। घटाकार विज्ञानविशेष ही घट है। ज्ञानातिरिक्त विषय की पृथक् सत्ता नहीं है। ज्ञानातिरिक्त विषय असत् है। विज्ञानवादी ज्ञान और वस्तु में अभेद सिद्धि करने के लिए "सहोपलम्भनियमात्" इस प्रकार "सहोपलम्भ" का हेतुरूप से उपन्यास करते हैं। और इसी हेतुबल से अनुमान करके ज्ञान-ज्ञेय में नील और नीलज्ञान में अभेद सिद्धान्त की स्थापना करते हैं। ज्ञान और ज्ञेय के इस अभेद-सिद्धान्त को जानने के लिये उक्त अनुमान के हेतु "सहोपलम्भनियमात्" को जानना आवश्यक है। यहाँ पर "सह" और "नियम" दो विशेष शब्द हैं। ज्ञान के साथ ज्ञेय नीलादि की उपलब्धि होती है। ज्ञान के बिना ज्ञेय विषय की उपलब्धि नहीं हो सकती यही उक्त 'सह' शब्द का अर्थ है, किन्तु सह शब्द के इस प्रकार अर्थ करने पर ज्ञान और ज्ञेय में अभेद की सिद्धि नहीं हो सकती। "किसी के होने पर किसी का होना" इससे दो पदार्थों की सिद्धि होती है, न कि अभेद की। "सह" शब्द का स्वअर्थ है, साहित्य। साहित्य या सहभाव दो भिन्न पदार्थों में ही सम्भव है। अभेद में सहभाव कैसा? इसी कारण भदन्त शुभगुप्त ने कहा है "विरुद्धोऽयं हेतुः" यह सहोपलम्भ नियम हेतुविरुद्ध हेतु है।[2] ज्ञान और ज्ञेय पूर्णरूप से अभेद होने पर सहभाव सम्भव नहीं, अतः उक्त हेतु ज्ञानज्ञेय में अभेद का साधक न होकर भेद का ही साधक हुआ। इसीलिये विपरीत हेतु होने के कारण विरुद्ध हेतु हुआ। विरुद्ध हेतु का अर्थ हुआ हेत्वाभास। हेत्वाभास अनुमान से साध्य की सिद्धि नहीं हो सकती। उक्त हेत्वाभास दोष से मुक्त होने के लिये शान्तरक्षित ने "तत्त्वसंग्रह" में सह शब्द का प्रयोग न करके प्रकारान्तर से ज्ञान और ज्ञेय के अभेद सिद्धान्त की स्थापना की

1. Esseest Percipi. बर्कले
२. तत्त्वसंग्रह पंजिका ६९२। कमलशील बौद्धभारती, वाराणसी १९६८।

है। शान्तरक्षित का कहना है कि नील ज्ञान और नील वस्तु ज्ञान दोनों एक हैं।[1] एक या अभिन्नोपलब्धि ही सहोपलम्भ है। सर्वत्र ज्ञानाकार ही विषयाकार है, अतः ज्ञान की उपलब्धि ही विषय की उपलब्धि है, अतः ज्ञान और ज्ञेय में भेद नहीं है। ज्ञान और ज्ञेय एक हैं। जिस प्रकार चन्द्रमा एक होने पर भी नेत्ररोग के कारण द्विचन्द्रमा दर्शन किया करते हैं। वस्तुतः चन्द्रमा दो नहीं हैं उसी प्रकार ज्ञान-ज्ञेय एक हैं, फिर भी अज्ञानवश लोग दो समझ बैठते हैं।[2] शान्तरक्षित ने एकोपलब्धि को सहोपलम्भ कहा है। इनके अनुसार "सह" शब्द का अर्थ एक है, न कि साहित्य। तत्त्वसंग्रहपंजिका में किसी विज्ञानवादी आचार्य के अनुसार "सह" शब्द का अर्थ 'एक काल" किया है इनके अनुसार कालभेद वस्तुभेद का व्याप्य है। "कालभेदस्य वस्तुभेदेन व्याप्यत्वात्" अर्थात् कालभेद होने पर वस्तु में भी भेद अवश्य होगा। ज्ञान और ज्ञेय की उपलब्धि एक काल में है, अतः दोनों एक हैं। इस प्रकार विज्ञानवादानुसार ज्ञान की उपलब्धि ही ज्ञेयसत्ता को सिद्ध करती है, अतः ज्ञान-व्यतिरिक्त ज्ञेय की पृथक् सत्ता नहीं है। अद्वैतवेदान्त के अनुसार भी दृग्व्यतिरेक दृश्य की सिद्धि सम्भव नहीं क्योंकि अध्यस्त कभी भी अधिष्ठानातिरिक्त नहीं होता। अधिष्ठान सापेक्ष होता है। उक्त सहोपलम्भ नियम का और उससे साधित बाह्य-सत्ता रहित विज्ञानवाद का अद्वैताचार्यों ने जोरदार शब्दों में प्रत्याख्यान किया है। अद्वैत आचार्यों का कहना है कि नील और नीलज्ञान अथवा एक साधक हेतु हेत्वाभासमात्र है क्योंकि घट और घटदर्शन का भेद संसार में प्रसिद्ध है। ज्ञानज्ञेयप्रभेद सिद्धान्त अथवा ज्ञानज्ञेय एक सिद्धान्त प्रत्यक्ष प्रमाण द्वारा बाधित है। प्रत्यक्ष प्रमाण प्रबल प्रमाण है, अतः प्रबल प्रमाण प्रत्यक्ष द्वारा बाधित होने के कारण विरुद्ध हेत्वाभास, है, अत एव प्रकार हेतु से विज्ञानवादी विज्ञान और विज्ञेय में एकत्व या अभेदत्व साधन नहीं कर सकते। आचार्य शंकर ने "नाभाव उपलब्धेः" (२।२।२८) ब्रह्मसूत्र के इस सूत्रभाष्य में विज्ञानवाद के उक्त सहोपलम्भ-नियम का जोरदार खण्डन किया है। बहिर्विश्व को विज्ञानातिरिक्त न मानने के सिद्धान्त के खण्डन में शंकर ने उपलब्धि का प्रश्न उठाया है, अर्थात् बहिर्विश्व घट-पटादि कैसे नहीं है? हमारे सामने जो स्तम्भ-या घट दिखायी दे रहे हैं उन्हें नहीं हैं ऐसा कैसे कहा जा सकता है? क्योंकि उनकी उपलब्धि हो रही है। उपलभ्यमान वस्तु के अस्तित्व का

---

१. यत्संवेदनमेव स्याद्यस्य संवेदनध्रुवम्।
तस्मादव्यतिरिक्तं तत् ततो वा न विभिद्यते॥
—तत्त्वसंग्रहपृष्ठ ६६१।

२. आलम्बनपरीक्षा का० २ पृ० १

अपलाप नहीं किया जा सकता।[1] वाचस्पति मिश्र का कहना है कि बाह्यवस्तु घटादि की उपलब्धि इतनी स्पष्ट है कि उनका अपलाप नहीं किया जा सकता। मात्र स्पष्ट अनुभव ही नहीं "यह घट है", "यह पट है" इत्यादि सार्वजनिक अनुभव हुआ करता है अर्थात् एक व्यक्ति के लिए जो घट प्रत्यक्ष सिद्धबाह्य वस्तु है, वह सभी के लिये प्रत्यक्ष सिद्ध घट है, अतः उनका अभाव सिद्ध नहीं किया जा सकता।[2] एक बात और है कि जो भी बाह्य विषय की उपलब्धि करता है, वह उपलब्धि की ही उपलब्धि नहीं करता, अपितु बाह्य विषय की उपलब्धि विषयतया करता है, अतः बाह्यार्थ का अभाव नहीं है।

अद्वैत वेदान्ती बाह्य वस्तुओं को विज्ञानातिरिक्त व्यावहारिक बाह्य वस्तु स्वीकार करते हैं, इसी कारण विज्ञानवाद के ऊपर उनका आक्षेप है कि वे बाह्य वस्तु को स्वीकार किये बिना ठहर नहीं सकते, क्योंकि बाह्यता का खण्डन करने के लिये भी उसे स्वीकार करना होगा।

आचार्य दिङ्नाग ने आलम्बन परीक्षा में विज्ञानवाद की स्थापना करते हुए कहा है कि—"यदन्तर्ज्ञेयरूपं तु बहिर्वदवभासते"[3] अर्थात् जो आन्तरविज्ञान है वही बहिर्विश्व में ज्ञेय रूप से भासता है। ज्ञान के समान ज्ञेय वस्तु भी आन्तर है बाह्य नहीं है। बाह्यता अलीक है, अलीक बाह्यता ही मन में भासती है और उस बाह्यता को हम सत्य समझ बैठते हैं। आचार्य दिङ्नाग की इस उक्ति को उद्धृत करते हुए अद्वैताचार्यों ने इसका प्रत्याख्यान किया है। आचार्य शंकर का कहना है कि यदि बहिर्विश्व विज्ञान के अतिरिक्त कुछ भी नहीं है, तब तो घटादि भी अलीक वस्तु हैं। इस प्रकार सम्पूर्ण बहिर्वस्तुएं अलीक हैं। यदि ऐसी बात है कि बाह्य वस्तुयें अलीक हैं तब उस अलीक वस्तु का उपमान कैसे सम्भव है? विज्ञानवादी जो कहते हैं— "बहिर्वत्" यहाँ वहिर्वस्तु के अभाव "बहिर्वत्"—"बाह्य वस्तु के समान "यह शब्द किस अर्थ में प्रयुक्त हुआ है? अर्थात् यदि बाह्य वस्तुएँ हैं ही नहीं तब उन्हें उपमान

---

१. न खल्वभावो बाह्यस्यार्थस्याध्यवसातुं शक्यते। कस्मात् उपलब्धेः।
—ब्रह्मसूत्रशांकरभाष्य, पृष्ठ ५४७।

२. नहि स्फुटतरे सर्वजनीन उपलम्भे सति तदभावः शक्यो वक्तुम्।
—भामती पृ० ५४७।

३. आलम्बनपरीक्षा—पृ० २ कारिका ६।

के रूप में कैसे लिया जा सकता ?[1] बहिर्वस्तु यदि आकाशकुसुम के समान अलीक है, तब तो "बहिर्वत्" करके उपमान नहीं दिया जा सकता, आकाशकुसुम के समान देखा जा रहा है ऐसा कथन नहीं होता। "विष्णुमित्र वन्ध्यापुत्र के समान है" ऐसा कथन कोई भी नहीं करता।[2] विज्ञानवादी बहिर्विश्व के अस्तित्व को नहीं स्वीकार करते, फिर भी "बहिर्वत्" शब्द का प्रयोग करते हैं। इस प्रकार वे विरुद्धोक्ति करते हैं। ज्ञेय विषय से ही ज्ञान में विशेषता आती है। यदि ज्ञेय विषय के स्वतन्त्र अस्तित्व को स्वीकार न किया जाय तब ज्ञान में विशेषता कहाँ से आयेगी ? घट-ज्ञान, पट-ज्ञान आदि सभी में ज्ञान है ऐसी अवस्था में घट पटादि को अलीक कह दिया जाय, तब तो ज्ञान ही मात्र रह जायेगा जिसमें घट-पटादि विशेषताएँ होंगी नहीं। इस पर यदि वासनावैचित्र्य के कारण ज्ञान में वैचित्र्य माना जाय तो भी समाधान नहीं हो पाता, क्योंकि वासनावैचित्र्य भी तो ज्ञेयवैचित्र्यता पर निर्भर करेगा। बिना ज्ञेय-वैचित्र्य के वासना में विचित्रता सम्भव नहीं। विज्ञानातिरिक्त बाह्यसत्ता के अभाव होने पर सर्वत्र ज्ञान का ही ज्ञान होगा, किन्तु व्यवहार में "मैंने ज्ञान को जाना है" ऐसा बोध न होकर "मैंने घट को जाना है" ऐसा होता है। यदि काल्पनिक बाह्य-वस्तु को माना जाय, तब उसे मिथ्यारूप में स्वीकार करना ही होगा।

आचार्य शंकर ने ब्रह्मसूत्रभाष्य में (२।२।२९) जाग्रत् और स्वप्न के वैधर्म्य भी बतलाये हैं। विज्ञानवाद के अनुसार बाह्यवस्तुएँ स्वप्न की वस्तुओं के समान निःस्वभाव हैं, किन्तु आचार्य शंकर यहाँ पर बाह्यवस्तुओं को स्वप्नतुल्य कहने के भी विरुद्ध हैं। उनका कहना है, जाग्रत् और स्वप्न में महदन्तर है। प्रथम वैधर्म्य तो बाध-अबाध है, अर्थात् स्वप्नदृष्ट वस्तुएँ जाग्रत् में बाधित हो जाती हैं। स्वप्नदृष्ट महाजन समागम जागने पर नहीं रहता। स्वप्न में सिंह देखकर भीत हुआ व्यक्ति जागने पर भीत नहीं रहता। इस पर स्वाप्निक वस्तुएं जाग्रत् में बाधित हो जाती हैं, अतः जाग्रत् से स्वाप्निक वस्तुएँ कम सत्ता वाली हैं[3] और भी जाग्रत् में अनुभूत वस्तुएँ होती हैं, जबकि स्वप्न की वस्तुएँ स्मृति में निहित होती हैं। स्वप्न व्यक्तिगत होता है जाग्रत् सार्वजनिक है, अर्थात् स्वप्न में देखी हुई वस्तुएँ उसी स्वप्नद्रष्टा को

---

१. प्रत्याख्यातुकामाश्च बाह्यर्थं बहिर्वदितिवत्कारं कुर्वन्ति।

—ब्रह्मसूत्रभाष्य, पृ० ५४८।

२. न हि विष्णुमित्रो वन्ध्यापुत्रवदवभासत इति क्वचिदाचक्षीत।

—ब्रह्मसूत्रभाष्य, पृ० ५४८।

३. ब्रह्मसूत्रभाष्य—पृ० ५५५

ही दिखायी देती हैं, पास में सोये हुए को नहीं दिखायी देतीं, जबकि जाग्रत् की वस्तुएँ सभी को समानरूप से दिखायी देती हैं। इस प्रकार शंकर ने जाग्रत् स्वप्न में वैधर्म्य दिखाकर बाह्य वस्तुएँ स्वप्नवत् नहीं हैं, सिद्ध किया है।

हमने ऊपर के विवरणों में देखा है कि किस प्रकार आचार्य शंकर और उनके अनुयायी बौद्ध विज्ञानावाद के खण्डन के प्रसंग में वस्तुवादी दृष्टिकोण को अपनाते हैं। इससे कुछ स्पष्ट हो जाता है कि अद्वैतवादी प्रत्ययवादी होते भी बाह्यवस्तुओं की सत्ता को अस्वीकार नहीं करते, यह दूसरी बात है कि वे बाह्य वस्तुओं को व्यावहारिक सत्ता प्रदान करते हैं। सहोपलम्भ नियम के प्रत्याख्यान से तथा जाग्रत् स्वप्न-वैधर्म्य के कथन से अद्वैतवादी बाह्यविषयक धारणायें और भी स्पष्ट हो जाती हैं। बाह्य वस्तुओं का अद्वैत अपलाप नहीं करता। वाचस्पति मिश्र ने विज्ञानवाद के ज्ञेयनिरपेक्ष विज्ञान के विषय में कहते हुए अद्वैत की बाह्यवस्तुविषयक धारणा को और स्पष्ट किया हैं। उन्होंने कहा है कि "ब्रह्मवादी नीलादि की आकार वाली वित्ति को नहीं मानता किन्तु नील से अनिर्वचनीय को मानता है।[1] इसी कारण महायानिक मत में उसका अनुप्रवेश नहीं होता। कल्पतरुकार ने भी भामती का समर्थन करते हुए कहा है कि बौद्ध विज्ञानवादी नीलादि आकार को विज्ञानाकार मानते हैं न कि वेदान्ती।[2] न्यायमकरन्दकार आनन्द भट्टारक ने भी अद्वैतमत को विज्ञानवाद से भिन्न प्रकार का बतलाने के लिए कहा है कि हम प्रपंच को आकाशकमल नहीं कहते। यदि प्रातीतिक प्रपंच को स्वीकार न करते तब तो विज्ञानवाद में ही अनुप्रवेश हो जाता।[3]

इस प्रकार हमने देखा कि अद्वैतवेदान्ती जगत् की अनिर्वचनीयता की रक्षा के लिये व्याकुल हैं, जबकि बौद्धविज्ञानवादी जगत् को वस्तुओं के आकारों को भी विज्ञानकार बतलाते हैं। अद्वैतवेदान्त में दृष्टिसृष्टिवाद नामक एक सिद्धान्त है, जिसकी तुलना विज्ञानवाद से की जा सकती हे। प्रो० दास गुप्ता के अनुसार अद्वैत में

---

१. न हि ब्रह्मवादिनो नीलाकांरा वित्तिमभ्युपगच्छन्ति। किन्तु वृत्तिनिर्वचनाय नीलादिति।

—भामती पृ० ५४१।

२. बौद्धा हि वित्तेविज्ञानस्यान्तरं नीलादिरूपमाचक्षते न वयमिति।

—कल्पतरु पृ० ५४१।

३. न्यायमकरन्द—पृ० ६१।

दृष्टिसृष्टिवादी आचार्य मण्डनमिश्र और बाद में उनका अनुयायी प्रकाशानन्द है। इस मत के अनुसार भी दृष्टि समकालीन सृष्टि मानी गई है। ज्ञान में प्रतिभास होता है, इसलिये विषय है, ज्ञान प्रातिभासिक न होने पर विषय भी नहीं है। समस्त वस्तुएँ इस मत के अनुसार साक्षी भास्य हैं। यदि द्रष्टा जीव न हो तो जगत् दर्शन भी नहीं रहेगा, क्योंकि द्रष्टा के बिना दृश्य नहीं है, दृश्य द्रष्टा के अधीन है। मण्डनमिश्र के अनुसार बाह्य वस्तुएँ सिद्ध होतीं तो उन्हें ज्ञाननिरपेक्ष कह सकते; किन्तु दृष्टि के बिना दृश्य असिद्ध है।[1]

मण्डनमिश्र के उक्त सिद्धान्त का अनुसरण प्रकाशानन्द ने किया है और दृष्टि-निरपेक्ष सत्ता का उन्होंने भी प्रत्याख्यान किया है।[2] प्रकाशानन्द के अनुसार बौद्ध-विज्ञानवाद के समान ही ज्ञान और ज्ञेय साथ में पाये जाने के कारण सब कुछ ज्ञान का ही प्रतिभास है।[3] किन्तु अद्वैतवेदान्त के विवरण सम्प्रदाय के आचार्य पद्मपाद और प्रकाशात्मयति इस दृष्टिसृष्टि के विरोधी हैं। उनके अनुसार ज्ञानव्यतिरिक्त भी बाह्य वस्तुओं का व्यावहारिक अस्तित्व है।[४] अद्वैतसिद्धिकार ने उक्त दृष्टिसृष्टि का अर्थ ही व्यावहारिक सत्तापरक किया है। उनके अनुसार दृष्टिसृष्टि का अर्थ "दृष्टिरेव-सृष्टि" नहीं है, क्योंकि दृष्टि ही सृष्टि मानने पर बौद्ध विज्ञानवाद में अनुप्रवेश होगा। न ही उन्होंने दृष्टि-व्यतिरिक्त सृष्टचभाव को ही "दृष्टिसृष्टि" माना है। "दृष्टि समकालीन सृष्टि" इस पक्ष का भी प्रत्याख्यान करके उन्होंने "ज्ञातैकसत्त्व" अथवा "अज्ञात-सत्त्वाभाव" को ही "दृष्टिसृष्टि" कहा है।[५] घट-पटादि वस्तुएँ तब भी ज्ञानपूर्वक हैं, अर्थात् उनकी सत्ता ज्ञात होती है। कोई भी वस्तु अज्ञातसत्त्व नहीं होती। इस प्रकार अद्वैतसिद्धिकार ने बाह्य वस्तुओं को ज्ञानभिन्न माना है। साथ में वे वस्तुएँ ज्ञात-सत्त्व होने के कारण दृगध्यस्त भी हैं। दृष्टिसृष्टि के अद्वैतसिद्धिकार द्वारा प्रदर्शित अर्थ से वस्तुएँ ज्ञानातिरिक्त होते हुए भी ज्ञानाध्यस्त सिद्ध होती हैं। इस प्रकार अद्वैत

---

1. Indian Idealism P. 170

2. The world appearance and all objects contained in it have no existence while they are not perceived. Ibid. P. 172.

3. Indian Idealism. P. 173, S. Dasgupta, Cambridge. 1962.

४. वही, पृ० १७८।

५. अद्वैतसिद्धि—पृ० ५३३।

का अनिर्वचनीय वस्तुवाद शान्तरक्षित और धर्मकीर्ति के क्षणिक विज्ञानवाद से भिन्न सिद्ध होता है, क्योंकि इनके अनुसार "ज्ञातैकसत्त्व" होना ज्ञान ही हो जाना नहीं है। घट ज्ञात है, किन्तु ज्ञान से भिन्न सत्त्ववाला है। वह सत्त्व न सत् है न असत् है, किन्तु सदसदनिर्वचनीय है। उक्त स्वतन्त्र विज्ञानवाद से अद्वैत मत का अन्तर यह है कि अद्वैत मत में स्थिर अधिष्ठान में अध्यस्त मिथ्या जगत् को माना जाता है, जबकि विज्ञानवाद में क्षणिक विज्ञान ही सत् है।[1]

सहोपलम्भनियम से उक्त विज्ञानवाद ने सिद्ध किया है कि विज्ञानातिरिक्त वस्तुएँ हैं नहीं, जबकि अद्वैत में ज्ञानातिरिक्त वस्तु की सिद्धि के लिये बहुत प्रयास देखा जाता है। "अन्तर्ज्ञेयरूपबहिर्वत्" के प्रत्याख्यान में देखा है कि किस प्रकार शंकर और उनके अनुयायी बाह्य वस्तुओं को विज्ञानरूपता से भिन्न सिद्ध करने को तत्पर हैं। इसी प्रकार जाग्रत् स्वप्नवैधर्म्य विचार में भी अद्वैताचार्य दोनों में अन्तर दिखाते हैं। तात्पर्य यही निकलता है कि स्वप्न प्रातिभासिक है। स्वाप्निक वस्तुएँ भी प्रातिभासिक हैं, किन्तु जाग्रत् के घटादि पदार्थ उससे भिन्न व्यावहारिक हैं। घटादि पदार्थ सार्वजनिक होने के कारण व्यावहारिक हैं। घटादि का बाध ब्रह्म के ज्ञान से पूर्व नहीं होता, अतः घटादि बस्तुएँ प्रातिभासिक स्वप्न या रज्जुसर्प के समान मिथ्या न होकर अन्य प्रकार मिथ्या हैं, अर्थात् व्यवहार विषय होते हुये भी त्रिकालाबाध्य न होने के कारण मिथ्या हैं। स्वप्नादि के दृष्टान्त अद्वैत में भी दिये गये हैं, किन्तु व्यवहार में दोनों में सत्ताभेद को स्वीकार करते हुए ही ऐसे दृष्टान्त दिये गये हैं।[2]

१. संक्षेपशारीरिक, २।२८ पृ० २०। सर्वज्ञात्ममुनि काशी, सं० १६४४।

1. Indian Idealism. P. 180.

अहिंसा

—डॉ० बदरीनारायणपञ्चोली

संसारेऽस्मिन् प्रायशः सर्वत्र वातावरणमिदमशान्तिमयं समवलोक्यते सन्देग्धि च परस्परङ्कौटुम्बिकोऽपि जनवर्गः । समस्यामयमिवेदञ्जनजीवनं साम्प्रतिकं संवृत्तम् । निखिलोऽपि जनः समुत्पन्नामेकां समस्यां समाधातुं सन्नद्धो भवति तावद्-द्वितीयान्तृतीयायाश्चोपस्थिताम्पुरतः पश्यति । समस्याभिराभिः समाक्रान्तः सन् सुबहून् सांसारिकान् सदुपायान् समुपादत्ते परन्न तैः समस्याः समाहिता भवन्ति न च परमां शान्तिञ्जीवमात्रस्य परमलक्ष्यभूतामधिगन्तुं प्रभवति । तत्र बीजमेतदेवास्ति यत् साम्प्रतं सुबहूनामन्तःकरणेषु हिंसाराज्यं विराजतेतराम् ।

भगवता हिरण्यगर्भेण समुपदिष्टम्भगवता पतञ्जलिना च पुनरुज्जीवितं व्यास-वाल्मीकिवाचस्पतिविज्ञानभिक्षुप्रभृतिभिश्च सुस्पष्टीकृतं योगदर्शनं यदि समाश्रियेत-तर्हि सुनिश्चितरूपेण सांसारिक्यः सर्वाः समस्याः सर्वथा समाहिताः स्युः । समुपलब्ध-शरीरमाध्यमेन प्रारब्धकर्माशयवासनाश्च समुपभुज्य जीवन्मुक्तिं देहपाते च परमङ्कै-वल्यमपि समधिगन्तुनूनमेव प्रभवेत् । नात्र सन्देहलेशोऽपि ।

"सूचिप्रवेशे मुसलप्रवेशः" लौकिकमिदमाभाणकं समनुसृत्य योगस्य प्रथममङ्ग यममपि यदि कदाचित् कश्चित् पुमान् परिपालयेत्तथापि समुपस्थिताः सांसारिक्यः समस्यास्तु नूनमेव समुपशान्ताः स्युः । योगपथे प्रवृत्तश्चायं पुमान् क्रमशः योगाङ्गा-न्तराण्यपि संसाधयन् परमंपुरुषार्थमपि साधयितुम्प्रभवेदेव । श्रीमद्भगवद्गीतायामपि लिखितमस्ति यदिह यः पुमान् शुभकर्मणि प्रवृत्तो भवति तस्य कदाचिदपि दुर्गतिर्न भवति[१] स तु नूनमेवोत्तरोत्तरं शुभकर्मणि प्रवृत्तिप्रवणः सन् स्वीयम्परमंल्लक्ष्यन्नूनमेव समधिगच्छति । यदि जीवनमेतदास्माकीनं स्वल्पीयः, साध्यञ्च सुविपुलसमयं

---

१. न हि कल्याणकृत् कश्चिद् दुर्गतिन्तात ! गच्छति । —श्रीमद्भगवद्गीता ।

यावत्समुपासनयैव समधिगन्तुं शक्यम् न तदिह जीवने साधयितुं शक्यमिति चेद् भगवता प्रोक्तं यदिहैकस्मिन् जीवने येन योगसिद्धिर्नोपलभ्यते तेन जन्मान्तरेष्वपि सा सिद्धिः समधिगन्तुं शक्यत एवेति निश्चितम्[१] ।

उपर्युक्तप्रकारेण सुविचार्य सिद्धान्तोऽयं सुस्थिरीकर्तुं शक्यते यदिहास्मदादिभिः सर्वैश्चापि सांसारिकैः सहैव योगोपासना समारब्धव्या येनास्मिन् संसारे साम्प्रतं समुपस्थिताः समस्याः सर्वथा समाहिताः स्युर्न च समस्यास्तदितराः समुपतिष्ठेयुः । योगारम्भे च सर्वतः प्रागस्माभिः समुपासनीयम्भवति योगस्य प्रथममङ्गं यमस्तस्यापि चाङ्गमहिंसानामधेयम् ।

भगवता पतञ्जलिना यमस्य अहिंसा, सत्यम्, अस्तेयम्, ब्रह्मचर्यम्, अपरिग्रहश्चेति पञ्च भेदाः सुस्पष्टन्निगदिताः[२] । एतेषु पञ्चस्वपि वर्तते सुमहत्प्रथमं स्थानमहिंसायाः । हिंसायाः सामान्यरूपेण तात्पर्यमिदमेव स्वीक्रियते—हिंसनं प्राणवियोजनं, हिंसा सा यत्र न स्यात् तत्राहिंसा । परमत्र सूत्रे अहिंसाशब्दे प्रयुक्तस्य हिंसाशब्दस्य तात्पर्यन्न केवलमेतावदेवापितु मनोवाक्कर्मभिः कश्चिदपि प्राणी कञ्चिदपि प्राणिनङ्केनापि प्रकारेण कथञ्चिदपि क्लेशलेशेनापि संयोजयेदिति वर्तते । तस्याश्चापि हिंसायाः सर्वथाऽत्यन्ताभावः सम्पद्येत सा भवत्यहिंसा । वयं सर्वेऽपि प्राणिनः परस्परमेव क्लिश्यामहे । केवलं स्वीयं स्वार्थमेवानर्थकरमपि समाद्रियामहे । आस्माकीनम्प्रयोजनन्तदपि केवलमैहिकमेव संसिध्येदित्येतदर्थमन्येषाङ्कियती हानिर्भवति तेषाम्मनस्तापः कियान् भविता का च तेषां स्थितिर्भविष्यतीति सर्वथाऽ विचार्यैव प्रयतामहे । "यथाऽऽत्मनि सुखदुःखे भवतस्तथा सर्वत्र विज्ञेयम्" सद्वचो ह्येतत् समाद्रियेत परिपाल्येत चाहिंसाव्रतमिदन्तर्हि नूनमेव सर्वत्र सुखशान्तिः स्यात् ।

सांसारिकाणीमानि यानि वस्तूनि सुखसाधनत्वेन सङ्कलयन्तो न गणयामस्तज्जान्यन्येषान्दुःखानि तानि सर्वाण्यपि वस्तूनि क्षणभङ्गुराणि वर्त्तन्ते ; स्थूलमिदमास्माकीनं शरीरमपि क्षणभङ्गुरं वर्तते, यत्सुखाभासमधिगत्य सुखित्वमस्माभिरनुभूयते तदपि क्षणिकम् । यस्यामवस्थायामेतेभ्यः सांसारिकसुखसाधनेभ्यः सांसारिकाणि सुखानि समधिगम्यन्ते तस्यामप्यवस्थायान्न जाने कस्मिन् क्षणे सुखमेतन्नङ्क्षयतीति भीरस्माकञ्चेतःसु समुपतिष्ठते तदानीन्तद्वियोगस्थितिकल्पनात्मकन्दुःखमेवास्माभिरुप-

---

१. "अनेकजन्मसंसिद्धस्ततो याति पराङ्गतिम् ।" गीतायाम् ।

२. अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः यमाः । २।३०

—पातञ्जलयोगदर्शनम्,

लभ्यते। संसारेऽस्मिन् विद्यमानन्न किमपि वस्त्वेतादृशं वर्तते यत् सर्वथा सुखमयम्भवेत्, तस्मिन् लेशतोऽपि दुःखन्न स्यात्। यतोऽत्र सांसारिकं सर्वमपि वस्तुजातन्त्रिगुणमयं वर्तते; त्रिगुणात्मकत्वाच्च सुख-दुःख-मोहमयम्, सुख-दुःख-मोहमयत्वाच्च परमसुखाभिलाषिभिः सर्वथा त्याज्यमेव भवति। साम्प्रतिकसुखदायिन्यपि वस्तूनि परिणामे दुःखदान्येव भवन्ति। यथा काचित् प्रेयसी तस्याः पत्युः परमोपकारकर्त्री वर्तते तदानीं सा सुखप्रदा भवति, किन्तु सैव यदि गतप्राणा स्यात्तर्हि नूनमेव तस्मै दुःखदायिनी सम्पद्यते; सैव च पुनः परमदुःखयुक्तावस्थायाम्मोहदायिन्यपि नूनमेव जायते। इत्थमेव यानादीनि सांसारिकाणि सुखसाधनानि स्वस्थावस्थायां सुखदानि भवन्ति, भ्रष्टावस्थायाञ्च तान्येव दुःखदानि मोहदानि चापि भवन्तीति परिणामतापसंस्कारदुखैः गुणानां स्वाभाविकीनां वृत्तीनामपि दुःखास्वीकृतौ विरोधः स्यादिति तत्त्वज्ञानी सर्वमपि सांसारिकं वस्तुजातन्दुःखमयमेवेति स्वीकुरुते[1]।

पारमार्थिकरूपेण दुःखमये नश्वरे वस्तुजाते समासक्तः पुमान् सुतुच्छकमिदं सुखाभासात्मकं सुखमधिगन्तुं हिंसामपि करोतीति परमखेदावहेयम्परिस्थितिः, परमशोचनीया चेयमवस्था।

सांसारिकमिदम्प्रत्येकं वस्तु मूलरूपेण विचारयन्नहिंसाव्रतमिदम्परिपालनपरो यदि प्रत्येकम्पुमान् भवेत्, सांसारिके निखिलेऽपि मिथ्याभूते चाकचक्ये तत्त्वदृक् स्यात्, स्वार्थपरायणतापरं वातावरणमुच्छिद्य स्वातन्त्र्येण योगाङ्गङ्गमिदं समाश्रयेत, तर्हि संसारेऽस्मिन् कुत्रचिदपि कथञ्चिदपि कदाचिदपि कस्यचिदपि मनसः प्रतिकूलतया वेदनीयत्वन्नोपतिष्ठेत्। सर्वोपि प्राणिवर्गः निःसन्दिग्धः सन् परस्परङ्क्लेशलेशमपि नानुभवन् स्वीयं स्वीयन्नियोगमनुतिष्ठन् प्रोन्नतिमधिगच्छन् सांसारिकाणि सुखान्यञ्जसैवाधिगच्छेदिति हिंसकानान्नियन्त्रणात्मिका तद्भयपारवश्याच्च यथासमयं स्वकर्त्तव्यपालनाक्षमतात्मिका च समस्या सर्वथा समहिता स्यात्। सर्वोऽपि च सांसारिकः स्वीयञ्जीवनं सफलयन् प्रारब्धकर्माणि परिसमाप्य निष्कामकर्मयोगित्वमधिगत्य परमम्पुरुषार्थमप्यधिगच्छेदित्यहिंसाव्रतस्य परिपालनं नूनमेव निखिलैश्चापि सांसारिकैः सम्यक् प्रकारेण विधेयम्। अहिंसाव्रतस्यास्य परिपालनेन स्वभावत एव तदुत्तराः सत्यास्तेयब्रह्मचर्यापरिग्रहाः सुतरां सेत्स्यन्त्येवेति योगस्य मूलभूतमहिंसानामधेयमङ्गाङ्गम्परमोपकारि वर्तते। आधारशिलायाः सुदार्ढ्यमेव भवनदार्ढ्याय प्रेप्स्यते, तथैवात्र संसारे निखिलसमस्यासमाधानपूर्वकञ्चरमम्परमञ्च लक्ष्यम्परमपुरुषार्थमधिगन्तुमहिंसै-

---

१. परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च सर्वं दुःखं विवेकिनः। २।१५
—पातञ्जलयोगदर्शनम्,

वेयमाधारशिलात्वम्भजते । शरीरवाङ्मनोभिः सर्वथा सामर्थ्ये सत्यपि कञ्चिदपि कथञ्चिदपि च घातप्रतिघातशून्यत्वमहिंसात्वम् । इत्थञ्च सर्वत्र सर्वथा सौख्यमेव परिलक्ष्येत । शान्तिसाम्राज्यञ्च सर्वेषामप्यन्तःकरणेषु व्याप्नुयादिति लौकिकपारलौकिकाभ्युन्नत्यै ऐहिकामुष्मिकपरमलाभाय चेयमहिंसा परमोपायभूता चकास्तितरामिति शम् ।

ज्ञेयज्ञानयोः स्वरूपविमर्शः

—डा० उमेशचन्द्रपाण्डेयः

सर्वं जगद् ज्ञेयज्ञानात्मना द्विधा विभक्तम् । तत्र ज्ञेयज्ञानयोः कः स्वरूपविशेष इति जिज्ञासायां संक्षेपतः किञ्चिदुपन्यस्यते ।

ज्ञानस्य विषये मतत्रयं प्रसिद्धम् ।

(१) ज्ञानं नित्यं जन्यं चेत्युभयविधमिति न्यायवैशेषिकयोः साङ्ख्ययोगयोः वेदान्तदर्शनस्य च मतम् ।

(२) ज्ञानं जन्यमेवेति सौगतं मतम् ।

(३) ज्ञानं स्यान्नित्यं जन्यं चेत्यार्हतं मतम् ।

आद्ये मते न्यायवैशेषिकानुसारेण ज्ञानमात्मनो विशेषगुणः । आत्मा जीवात्म-परमात्मभेदात् द्विधा । तत्र परमात्मनो गुणभूतं ज्ञानं नित्यमेव । तच्च एकमेव सर्व-विषयकमपरोक्षं च । जीवात्मनो गुणभूतं ज्ञानं जन्यमेव । अनुभवस्मरणभेदात् तद् द्विविधम् । अनुभवः प्रमाणचातुर्विध्येन चतुर्धा प्रत्यक्षम्, अनुमितिः, उपमितिः शाब्दश्च ।

प्रत्यक्षं करणभूतस्याक्षस्य षोढात्वेन षड्विधम्—

घ्राणजं, रासनं, चाक्षुषं, स्पार्शनं, श्रावणं मानसं च । प्रत्येकं प्रत्यक्षं लौकि-कालौकिकभेदाद्' द्विधा । लौकिकसन्निकर्षः संयोग-संयुक्तसमवाय-संयुक्तसमवेत-समवाय-समवाय-समवेतसमवाय-विशेष्य-विशेषणभेदात् षोढा । अलौकिकः सन्निकर्षः सामान्यलक्षण-ज्ञानलक्षण-योगजभेदात् त्रिधा । लौकिकालौकिकयोः लौकिकं निर्विकल्पकसविकल्पकनृसिंहाकारभेदात् त्रिधा । विशेष्यविशेषणयोः संसर्गानवगाहि स्वरूपमात्रावगाहि ज्ञानं निर्विकल्पकम् । तद्धि विषयेन्द्रियसन्निकर्षाव्यवहितोत्तरक्षणमेव जायते । तदीया विषयता विशेष्यताविशेषणतासंसर्गताभ्यो भिन्ना तुरीया । विशेष्य-विशेषणयोः संसर्गगोचरं ज्ञानं सविकल्पकम् । अंशे निर्विकल्पकमंशे च सविकल्पकं ज्ञानं

नृसिंहाकारम् । यथा— घटज्ञानं ज्ञानत्वं चावगाहमानं ज्ञानं ज्ञाने घटस्य विषयिता-सम्बन्धावगाहनाद् ज्ञाने च ज्ञानत्वस्य सम्बन्धानवगाहनात् ।

साङ्ख्ययोगानुसारेण ज्ञानं नात्मनो गुणः किन्तु आत्मानात्मभेदात् द्विधा । तत्रात्मभूतं ज्ञानं चैतन्यापरपर्यायं पुरुषपदेनापि व्यपदिश्यते । तन्न कस्यचिद् गुणो न वा केनचिद् गुणेन गुणी, किन्तु गुणगुणिभावधर्मधर्मिभावाश्रयाश्रयिभावकार्यकारण-भावादिभ्यो विधुरं कूटस्थं नित्यं नाना च । अनात्मभूतं ज्ञानं महत्त्वभूतायाः बुद्धेः विषयाकारपरिणामरूपस्तदीयो धर्मः स एव नित्यचैतन्यभूतं ज्ञानमुपारुह्य वस्तुनः प्रकाशकम् । तच्च बुद्धेः परिणामतया प्रभवप्रलयशालित्वान्नित्यम् ।

वेदान्तदर्शनानुसारेणापि ज्ञानमात्मानात्मभेदाद् द्विधा । आत्मभूतं ज्ञानं ब्रह्मस्वरूपं ब्रह्मण एव तन्नये आत्मपदार्थत्वाद् ब्रह्मरूपतया च तन्नित्यमेकमसङ्गं च । अनात्मभूतं ज्ञानं वृत्तिरूपं वृत्तिश्च क्वचिद् अज्ञानस्य क्वचिच्च बुद्धेः । प्रतिभासज्ञानं स्वप्नज्ञानं सौषुप्तं ज्ञानं च अज्ञानस्य वृत्तिरूपम् । जाग्रत्कालिकं सर्वं व्यावहारिकं ज्ञानं बुद्धेः वृत्तिरूपम् । वृत्त्यात्मकं सर्वमेव ज्ञानं ब्रह्मात्मनो ज्ञानस्यच्छायालाभेन वस्तुनः प्रकाशकम् ।

द्वितीयस्मिन् मते प्रवृत्तिविज्ञानमालयविज्ञानं चेति ज्ञानं द्विविधम् । प्रवृत्ति-विज्ञाने प्रवृत्तिशब्दो निवृत्तेरप्युपलक्षकः । अतो यज्ज्ञानमिष्टानिष्टसाधनवस्तुगोचर-तया प्रवृत्तिं निवृत्तिं वा निवर्तयति, तत्प्रवृत्तिविज्ञानमित्यभिधीयते । यथा—"इदं रजतम्' 'अयं सर्प" इत्यादिकम् । इदं विज्ञानमालयविज्ञानमाश्रित्य प्रवर्तते आलय-विज्ञानं च प्रवृत्तिनिवृत्त्योः, तन्मूलभूतानां तन्मूलकानां च धर्माणामालयेतया अथवा आलयं लयशब्दव्यपदेश्यनिरुपप्लवज्ञानोदयमलक्षणनिर्वाणपर्यन्तं प्रवहमानतया आलय-विज्ञानमित्याख्यायते । तच्च 'अहम्' इत्याकारकमनादिकालादनन्तकालं यावत् निरु-पप्लवतालाभं निर्वाणलाभं वा यावदविच्छिन्नभावेन प्रवहति ।

तृतीयस्मिन् मते ज्ञानमात्मनो भिन्नाभिन्नम्, आत्मा च द्रव्यपर्यायोभया-त्मकतया द्रव्यात्मना नित्यः पर्यायात्मना च जन्यः, तत्स्वरूपतया ज्ञानमपि द्रव्यात्मना नित्यं पर्यायात्मना जन्यम् ।

उक्तेषु मतेषु सौगतातिरिक्ते सर्वमते ज्ञेयज्ञानयोर्भेदोऽभ्युपेयते । तत्र वेदान्तमते ब्रह्मभूताज् ज्ञानाद् भिन्नं यद्यपि किमपि परमार्थभूतं वस्तु नोपगम्यते, तथापि व्यावहारिकेषु प्रातिभासिकेषु च पदार्थेषु ज्ञेयज्ञानयोर्भेदो निर्विवादः । वृत्त्यात्मकं ज्ञानं स्वव्यतिरिक्तमेव विषयं प्रकाशयतीति वेदान्तसिद्धान्तडिण्डिमः सर्वत्र सुश्रवः । सौगतं

मतमेवेदृशं विद्यते यत्र क्षणिकविज्ञानाद्वयवादिनो योगाचारा ज्ञानभिन्नतया ज्ञेयस्य सत्तां न स्वीकुर्वन्ति । अस्मिन् निबन्धे तन्मतमेव मुख्यतया परीक्ष्यम् ।

विज्ञानवादिनो बौद्धाः "ज्ञानभिन्नं वस्तु अप्रामाणिकम्" इत्येतन्मतमुद्घोषयन्तः स्वकं तात्पर्यं प्रायस्त्रिधा वर्णयन्ति । तथाहि —

(१) ज्ञानज्ञेययोरभेदः ।
(२) ज्ञानज्ञेययोरेकजातीयत्वं तयोरवैजात्यपर्यवसायि ।
(३) ज्ञानमेव सत्यं ज्ञेयमसत्यम् ।

तत्र प्रथमस्य ज्ञानज्ञेययोरभेदपक्षस्य समर्थनाय बहुधा त्रयो हेतवः प्रयुज्यन्ते ।

(१) सहोपलम्भनियमः ।
(२) ग्राह्यत्वम् ।
(३) प्रकाशमानत्वं च ।

१—सहोपलम्भनियमो नाम नियमेन सहैवोपलभ्यमानत्वम् । एतद्बलेन ज्ञानज्ञेययोरभेद इत्थं साधयितुं शक्यते यद् 'ज्ञानं ज्ञेयतोऽभिन्नं ज्ञेयेन सहैव नियमेन उपलभ्यमानत्वात्, यदि ज्ञानं ज्ञेयाद् भिन्नमभविष्यत् तदा कदाचिद् ज्ञेयं विनाऽपि उपलभ्यमानमभविष्यत्, यतो हि यद् यतो भिन्नं भवति तत् तद्विनापि उपलभ्यते । यथा— घटाद् भिन्नः पटो घटं विनापि उपलभ्यते । परं ज्ञानं तु ज्ञेयं विना कदापि नोपलभ्यते । 'घटं जानामि', 'पटं जानामि' इत्यादिरूपेण घटपटाद्यात्मकैः ज्ञेयैः विशेषितस्यैव ज्ञानस्योपलभ्यमानताया आनुभविकत्वात् । अतो मिथोभिन्नवस्तुभ्यो नियमेन सहोपलभ्यमानत्वलक्षणवैलक्षण्याद् ज्ञानस्य ज्ञेयाभेदाभ्युपगम एव न्याय्यः ।

२—ग्राह्यत्वम्— ज्ञानविषयत्वम्, अनेन हेतुना ज्ञानज्ञेययोरभेदोऽनया रीत्या समर्थयितुं शक्यते यत् 'ज्ञेयं ज्ञानाद् अभिन्नं ज्ञानसामान्यस्याविषयत्वे सति ज्ञानविशेषस्यैव विषयत्वात् । यदि ज्ञेयं स्वतो भिन्नस्य ज्ञानस्य विषयो भवेत् तदा तद्भिन्नत्वस्य ज्ञानमात्रे सत्त्वेन सर्वस्यैव ज्ञानस्य विषयो भवेत्, परमेवं नास्ति, ज्ञेयः खलु स्वोल्लेखिनो ज्ञानस्यैव विषयो भवति । स्वानुल्लेखिनो ज्ञानस्य विषयो न भवति । यथा घटः घटोल्लेखिनः "अयं घटः, स घटः, घटो नीलः, घटो द्रव्यं, घटो नास्ति" इत्यादिरूपेण जायमानस्यैव ज्ञानस्य विषयो भवति । यानि ज्ञानानि घटं नोल्लिखन्ति घटस्तेषां ज्ञानानां विषयो न भवति । यथा—"अयं पटः, स घटः, पटो नील" इत्यादिकानां घटानुल्लेखिज्ञानानां घटो विषयो न भवति । एतेनेदमायाति यद् ज्ञेयो घटादिः यस्माद् ज्ञानाद् अभिन्नो भवति तस्यैव ज्ञानस्य विषयो जायते । अभिन्न-

श्च भवति स्वोल्लेखिनो ज्ञानाद्, अतः स्वोल्लेखिन एव ज्ञानस्य विषयो भवति। स्वानुल्लेखिनो ज्ञेयाद् भिन्नतया तस्य विषयो न भवति। तदित्थं ज्ञेये ज्ञानविशेषस्यैव विषयताया नियमनाय ज्ञेये ज्ञानाभेदोपगम आवश्यकः।

३—प्रकाशमानत्वं—(भासमानत्वम्, अनेन, हेतुना ज्ञानज्ञेययोरभेदोऽनया दिशा साधयितुं शक्यते। यद् ज्ञानमिव ज्ञेयमपि प्रकाशते। यथा—अप्रकाशमानस्य ज्ञानस्य सत्तायां किमपि प्रमाणं नास्ति, तथैव अप्रकाशमानस्य ज्ञेयस्यापि सत्तायां किमपि प्रमाणं न विद्यते। यदि ज्ञेयं ज्ञानाद् भिन्नं स्यात्, तदा ज्ञेये ज्ञानवैधर्म्यमपि भवेत्। न तु समानरूपेण प्रकाशमानत्वात्मकं साधर्म्यमेव भवेत्। यद्यपि अन्योन्यं भिन्ना घटपटादयोऽपि प्रकाशन्ते परं तेषु नैकोऽपरेण सहैव प्रकाशते। ज्ञानज्ञेयौ तु सहैव प्रकाशेते। अतस्तयोरभेदोऽनिवार्यः।

इत्थमुक्तैस्त्रिभिर्हेतुभिर्बौद्धा ज्ञानज्ञेययोरभेदमुपवर्णयन्ति। परमेते त्रयोऽपि हेतवो हेत्वाभासतया ज्ञानज्ञेययोरभेदसाधने समर्था न भवन्ति। तथा हि केनचिद् हेतुना कस्यचित् साध्यस्य सिद्धये मुख्यतया वस्तुद्वयमपेक्ष्यते—

१—साध्यहेत्वोर्भेदः।

२—अनुमितिपरामर्शयोर्भेदश्च।

यथा साध्यस्य वह्नेः हेतोर्धूमस्य च मिथोभेदस्य, पर्वते वह्न्यनुमितेः पर्वते वह्निव्याप्यधूमवत्तापरामर्शस्य च मिथोभेदस्य सत्त्वेन पर्वते धूमाद् वह्नेरनुमितिः सम्पद्यते। यदि पुनः हेतुः साध्यादभिन्नो भवेत्तदा साध्यस्यैव तस्याप्यनुमितेः पूर्वपक्षेऽसिद्धतया ततः साध्यं कथं साधयितुं शक्येत। 'स्वयमसिद्धः परं कथं साधयेत्' एवमेव यदि अनुमितिपरामर्शयोरन्योन्यं भेदो न भवेत्तदा तयोः कार्यकारणभावस्य दुर्घटतया परामर्शादनुमितेरुत्पत्तिः कथं निर्वहेत् कारणं हि तदैव भवति यत् कार्योत्पत्तिदेशे कार्याव्यवहितपूर्वक्षणे वर्तेत, कार्यनियतपूर्ववर्तित्वस्य कारणतात्वात् ये च वस्तुनी परस्परं न भिन्ने, तयोः पूर्वापरीभावो नोपपद्यते। अनुपपन्ने च पूर्वापरीभावे कार्यकारणभावो न घटेत।

अतोऽनुमितेः परामर्शादुत्पत्तेः सम्भवत्वोपपादनाय तस्यास्ततो व्यतिरेकोऽपरिहार्यः। परं विज्ञानवादिनः बौद्धस्य नये साध्यहेत्वोरनुमितिपरामर्शयोश्च भेदो न सङ्गच्छते। यतो ज्ञानज्ञेययोरभेदपक्षे साध्यं हेतुं चावगाहिनो ज्ञानस्य साध्यहेतूभयरूपताया अवश्यं स्वीकार्यतया तदभिन्नाभिन्नाभिन्नस्य तदभिन्नत्व-नियमेन हेतौ साध्याभिन्नसाध्यहेतूभय-ज्ञानाभिन्नत्वेन साध्याभेदस्यापरिहार्यताऽतो नैतन्मते तयोरन्योन्यं भेदः सम्भवी। एवमेव परामर्शस्याप्यनुमितिपरामर्शोभयावगाहिज्ञानादभिन्नतया तत्रानु-

मिथ्यभेदस्य तयोरप्यन्योन्यं भेदो दुर्घटः। फलतया मिथोऽन्यत्वनियतस्य साध्यहेतुभावस्य कार्यकारणभावस्य च असम्भवतया सर्वासिद्धिप्रसङ्गो दुर्निवारः।

ज्ञानज्ञेययोरभेदपक्षेऽन्योऽपि दुस्समाधेयो दोषः प्रसज्ज्यते। तथाहि ज्ञानज्ञेयौ यदि परस्परमभिन्नौ भवेतां तदा पशुमनुष्ययोरप्यभेदः प्रसभमापद्येत। यतो हि ज्ञानज्ञेययोरभिन्नत्वमते तयोरेकज्ञानविषयताया उपपत्तये तयोरभेदो दुर्निवारः। अन्यथा भिन्नयोस्तयोरेकज्ञानाभिन्नत्वस्यासम्भवेन एकज्ञानविषयत्वं दुर्घटम्। तन्नये तत्तज्ज्ञानाभिन्न एव तत्तज्ज्ञानविषयत्वोपगमात्। न चेष्टापत्तिस्तथा सति देवदानवविषयकसमूहालम्बनज्ञानानुरोधेन देवदानवयोरभेदस्यापरिहार्यतया देवज्ञानदानवज्ञानयोर्भिन्नाकारतायाः लोपेन देवस्य देवज्ञानस्य च समस्तकार्याणां दानवेन दानवज्ञानेन च, एवं दानवस्य दानवज्ञानस्य च समस्तकार्याणां देवेन देवज्ञानेन च उत्पत्त्यापत्तेः। न चेयमापत्तिरपि इष्टतया घोषयितुं शक्या तथा सति सर्वस्या लोकव्यवस्थाया विघातापत्तेः।

यदि विज्ञानवादिभिरेवं समाधातुं प्रयत्येत यत् प्रस्तुतो दोषस्तदैव प्रसज्ज्यते, यदि ज्ञानानां समानरूपता विभिन्नरूपता वा विषयोपजीविनी स्याद् ज्ञानतदाकारयोः कार्येषु च भेदो भवेत्। परं विज्ञानवादे नैतदभ्युपगम्यते। तन्मतं तु इदमस्ति यद् ज्ञानं तत्सन्तानश्च उभावेव क्षणिकौ असंख्यौ मिथो विलक्षणौ च। वैलक्षण्यमपि तयोस्तत्कारणायत्तम्। स्वकारणतो वैलक्षण्येन ज्ञातैः कारणैः तत्तज्ज्ञानानि विलक्षणाकाराण्येव उत्पाद्यन्ते। बाह्यार्थवादवद् विज्ञानवादे विषयाणां मिथो भेदो विषयभेदेन च ज्ञानेषु भेदो न मान्यः। विषयो हि ज्ञानस्यैवाकारविशेषः, स च ज्ञानोत्पादकाधीनः। 'पूर्वपूर्ववर्तीनि विलक्षणाकाराणि ज्ञानानि उत्तरोत्तरं विलक्षणाकाराणि ज्ञानानि जनयन्ति' इत्येव तन्मतम्। इत्थं चेदमतिस्पष्टं यद् यथा देवानवगाहिदानवज्ञानस्य दानवानवगाहिदेवज्ञानस्य चाकारभूतौ देवदानवौ मिथो भिन्नौ स्तः। तथैव देवदानवोभयावगाहिसमूहालम्बनज्ञानस्यापि आकारभूतौ देवदानवौ परस्परं भिन्नावेव वर्त्तेते। ज्ञानव्यतिरेकेण ज्ञानाकारसत्ताया अप्रामाणिकतया ज्ञानसत्ताया इव ज्ञानाकारकाया ज्ञानकारसत्ताया अपि ज्ञानानुभवाधीनतया यथानुभवमेव ज्ञानतदाकारयोर्व्यवस्थापनीयत्वेनायमेवाभ्युपगमो न्याय्यः। यद् देवदानवयोः देवदानवोभयविषयकज्ञानाकाररूपता-सम्पादकस्तज्ज्ञानाभेदो देवदानवयोः विलक्षणकार्यकारित्वेऽपि अनुभवबलादास्थातुं शक्यः अतो ज्ञानज्ञेययोरभेदपक्षे पूर्वोद्भावितो दोषः पदमाधातुं न प्रभुः।

परं विज्ञानवादिनामिदं समाधानं समीचीनं न प्रतिभाति। यतो हि देवदानवोभयावगाहिसमूहालम्बनज्ञानदशायां यदि तज्ज्ञानाकारयोः देवदानवयोर्भेदस्तदा भिन्नयोरेकज्ञानाभेदस्य दुर्घटतया एकज्ञानविषयत्वानुपपत्तिः। यदि तदानीं तयोरभेदस्तर्हि एकेनापरकार्याणामुत्पत्तिप्रसङ्गो दुष्परिहरः। तथा च यथा देवदानवाभ्यां सहैव

तदुभयगोचरज्ञानस्योपलम्भनियमेऽपि न तयोस्तदवगाहिनो ज्ञानस्योपलम्भनियमेऽपि न एकैकज्ञेयस्यापि तत्तज्ज्ञानतोऽभेदः। ज्ञानाभेदं विनैव यथा समूहालम्बनज्ञानविषयता नियम्यते तथा ज्ञानाभेदं विना असमूहालम्बनज्ञानविषयताऽपि नियमयितुं शक्यैवेति न तदनुरोधेन ज्ञानज्ञेययोरैक्यं समर्थयितुं युज्यते।

ज्ञानज्ञेययोरेकजातीयतापक्षपरीक्षणम्—

सहोपलम्भनियमेन, ग्राह्यत्वेन प्रकाशमानत्वेन वा यथा ज्ञानज्ञेययोरैक्यसाधनं दुष्करं तथैव तैर्हेतुभिस्तयोरेकजातीयत्वसाधनमपि दुःशकम्। तथा हि ज्ञेये यदि ज्ञान-जातीयत्वं साध्यते तदा द्रव्यगुणकर्मात्मकेषु ज्ञेयेषु सत्ताजात्या ज्ञानसजातीयत्वस्य सत्त्वेऽपि न्यायवैशेषिकमते ज्ञेये ज्ञानत्वानुपगमे न सौगते नयेऽपि ज्ञानज्ञेययोस्तथैवैकजातीयत्वस्वी-कारेण ज्ञेयेषु ज्ञानत्वासिद्ध्याऽर्थान्तरतापत्तिः। यदि ज्ञेयेषु ज्ञानवैजात्यराहित्यं साध्येत तदोक्तहेतूनामप्रयोजकत्वदोषग्रस्ततापत्तिः। ज्ञेयेषु ज्ञानवैजात्योपगमेऽपि तत्रोक्तहेतूनां सम्भवात्। यद्येवमुच्येत यद् ज्ञानस्य स्वविजातीयवस्तुग्राहकत्वं नोपगन्तुं शक्यते, तत्स्वी-कारे ज्ञेयमात्रे तत्तज्ज्ञानवैजात्यस्य निर्विशेषतया सर्वस्यैव वस्तुनः सर्वज्ञानविषयत्वापत्तेः। अतो ज्ञेयविशेषे ज्ञानविशेषविषयत्वस्योपपत्तेरनुरोधेन तत्तज्ज्ञानग्राह्ये तत्तज्ज्ञानसजातीयत्वं स्वीकृत्य ज्ञानं स्वसजातीयमेव वस्तु गृह्णाति न स्वविजातीयमिति नियमो नूनमभ्युपेयः। इत्थं च ज्ञानविजातीयस्य ज्ञेयस्यासिद्ध्या ज्ञानाद्वयवादस्य सुप्रतिष्ठितता निर्बाधा जायते। तदेदमपि विज्ञानवादिनो वचनं न युक्तम्। यतो हि यदि सर्वं ज्ञेयं सर्वस्माद् ज्ञानादविजातीयं मन्येत, तदा सर्वस्य ज्ञेयस्य सर्वज्ञानविषयत्वापत्त्या ज्ञेयज्ञानविशेषयो-र्विषयविषयिभावस्यानियमापत्तिः। यदि च तत्तज्ज्ञेयं तत्तज्ज्ञानादविजातीयं मन्येत तदा तत्तज्ज्ञेय-तत्तज्ज्ञानविषयत्वस्य तत्तज्ज्ञानाविजातीयत्वस्य च परस्परापेक्षासिद्धि-कत्वेनान्योन्याश्रयापत्तिः। अतो मतमिदमवमान्यैतदेव मान्यं यद् तत्तज्ज्ञानानि स्वकारणै-स्तत्तज्ज्ञेयग्राहकतयैव उत्पाद्यन्तेऽतः सहजत एव ज्ञेयविशेषज्ञानविशेषयोर्विषयविषयि-भावस्य सम्भवादुपपत्तिकतया ज्ञेये ज्ञानाविजातीयत्वलक्षणस्य ज्ञानभेदस्याभ्युपगमो निर्युक्तिकः।

ज्ञानमेव सत्यं ज्ञेयन्तु असत्यमित्येतत्पक्षपरीक्षणम् —

प्रभाकरस्य प्रखरे प्रकाशे चकासति शुक्तिशकले सायं तमिस्राप्रवेशोपक्रमेण तिरस्कृतप्राखर्ये प्रकाशे वक्रं विद्यमाने रज्जुखण्डे च कतिपये पुमांसो यदा कदा रजतं पन्नगं च पश्यन्ति। परं तत्र दृश्यमानौ रजतपन्नगौ पारमार्थिकौ नोपगन्तुं शक्यौ। तत्सविधे समुपस्थाय सावधानमवलोकने प्रकारान्तरेण तयोः परीक्षणे च तयोरदर्शनाद् दृश्यमानरूपेण तयोरप्राप्तेश्च। अतः शुक्तौ प्रतिभासमानं रजतं रज्जौ निरीक्ष्यमाणः पन्नगश्चावास्तविकावेव सिध्यतः। तथा च यथा शुक्तिरजतज्ञानस्य रज्जुपन्नगज्ञानस्य च स्वरूपेण सत्यत्वेऽपि तज्ज्ञेययोः रजतपन्नगयोरसत्यतैव अभ्युपेयते तथा निखिलं

ज्ञानं सत्यमुपगम्यापि ज्ञेयानामसत्यत्वकल्पनं सुशकं न्याय्यं चेति सौगतानामभिप्रायः ।

यद्येवमुच्येत यदुक्तस्थलयोः दृश्यमानौ रजतपन्नगौ स्थलान्तरे दृश्यमानाभ्यां न भिद्येते, किन्तु अन्यत्र दृष्टौ वास्तविकावेव तौ स्वसंस्कारवशात् स्वस्मरणवशाद् वा शुक्तिरज्जुस्थले प्रतिभासेते । निकटं गतस्य सावधानमवलोकयतः प्रकारान्तरेण कृतपरीक्षस्य वा जनस्य यत्तत्र तयोरदर्शनमप्राप्तिश्च भवतस्तत्र तयोरसत्यता न हेतुः अपितु शुक्तिरज्ज्वोः स्वस्वरूपाभिज्ञानं हेतुः । कथनस्यायमाशयो यत् शुक्तिस्थले रजतदर्शने रज्जुस्थले च पन्नगदर्शने शुक्तेः रज्जोश्च स्वरूपापरिचयोऽपि हेतुः । अतस्तत्स्वरूपपरिचये सम्पन्ने तत्स्वरूपापरिचयरूपहेतुनिवृत्त्या दयाविशेषे तयोर्दर्शनं न जायते ।

शुक्तौ रजतज्ञानस्थले रजतस्य रज्जौ पन्नगप्रत्ययस्थले पन्नगस्य च याऽप्राप्तिर्भवति तत्र तयोरसत्यता न हेतुः । अपि तु तत्स्थले तयोरविद्यमानता हेतुः । वस्तुनः प्राप्तौ न तद्दर्शनमात्रं निमित्तमपि तु तस्य विद्यमानताऽपि । शुक्तौ रजतावलोकनस्थले रजतं केवलं दृश्यते, न तु विद्यते । एवं रज्जौ पन्नगप्रत्यक्षस्थले पन्नगः केवलमवलोक्यते, न तु वर्तते । अतस्तत्र दृश्यमानयोरपि तयोस्तत्रासत्त्वेन प्राप्तिर्नजायते । इत्थं तत्र तयोरप्राप्तेरन्यथैवोपपत्त्या न तयोरसत्यत्वकल्पना न्याय्या । तर्हीदमपि बचनं समीचीनं न सम्भवति । यतः शुक्तिस्थले रजतदर्शनं यदि रजतसंस्काराद् रजतस्मरणाद् वा जायेत, तदा 'तद् रजतम्' इत्याकारकमेव स्यान्न तु 'इदं रजतम्' इत्याकारकं भवेत् । एवं रज्जुस्थाने पन्नगप्रत्यक्षमपि यदि पन्नगगोचरात् संस्कारात् स्मरणाद्वा जायेत, तदा तदपि 'स पन्नग' इत्याकारकमेव भवेन्न तु 'अयं पन्नग' इत्याकारकं भवेत् परं भवति 'इदं रजतम्' 'अयं पन्नगं' इत्याकारकमेव । अत इदमेव प्रसभमभ्युपेयं यद् शुक्तिस्थले पूर्वदृष्टं रजतं न स्मर्यते, किन्त्वन्यदेव दृश्यते । एवं रज्जुस्थलेऽपि पूर्वदृष्टः पन्नगो न स्मर्यते, किन्त्वन्य एव पन्नगो नयनातिथीक्रियते । इमौ पूर्वमनुभूतौ रजतपन्नगौ चासत्यावेव मन्तव्यौ । अन्यथा तयोः प्राप्त्यापत्तेः । तदित्थं स्थलविशेषे ज्ञेयस्यासत्यतायाः सिद्धतया सर्वत्र ज्ञेयस्यासत्यत्वकल्पनं सुशकम् ।

अत्रेदं वक्तुं शक्यते यद् यदि सर्वेषां ज्ञानानां विषया असत्या एव कल्पिष्यन्ते, तदा शुक्तिस्थलीयरजतज्ञानस्य रजतस्थलीयरजतज्ञानस्य च मिथो वैलक्षण्यं न स्यात् । फलतः शुक्तिरजतविपणिस्थरजतयोः समानः क्रयविक्रयादिः प्रसज्ज्येत । परमित्थं न भवत्यतः शुक्तिस्थलीयरजतस्यासत्यता विपणिस्थरजतस्य च सत्यताऽवश्यमुपेतव्या । अतो ज्ञेयमात्रस्यासत्यतासिद्धान्तो निराधारः ।

विज्ञानवादिभिरुक्तकथनस्योत्तरमेवं प्रस्तूयते यत् शुक्तिस्थलीयरजतविपणिस्थरजतयोश्च तात्त्विकदृष्ट्या वैलक्षण्यं न भवत्येव, यथा लोकदृष्ट्या सत्यं मन्यमानो रजतादि लोके व्यवह्रियते । शुक्त्यादिस्थले दृश्यमानो रजतादिरपि शुक्ति रजततया

जानद्भिस्तथैव क्रयविक्रयादौ व्यवह्रियते। एष व्यवहारस्तदैव बाध्यते, यदि शुक्तेरभिज्ञानेन रजतप्रत्ययो निरुध्यते। इयं स्थितिर्लोकदृष्ट्या सत्यतया स्वीक्रियमाणस्य रजतस्यापि समाना। ये खल्वात्मदर्शिनो लोकसिद्धं रजतमपि शुक्तिरजतवदसत्यं मन्यन्ते, ते ततोऽप्युदस्ताः सन्तस्तदर्थं स्तोकमपि न चेष्टन्ते।

बाह्यार्थवादिनो नैयायिकादयः समाधानमिदमवधीरयन्त इत्थं ब्रुवन्ति यत् लोकसिद्धरजतशुक्तिरजतयोः समानरूपेणासत्यत्वाभ्युपगमे द्वयोः समानस्य क्रयविक्रयादेः प्रसङ्गस्य परिहारोपायो न कश्चिदवकल्पते। आत्मदर्शिनोऽपि लोकसिद्धाद् रजतादेर्यदुदासते तत्र तस्यासत्यता न मूलं, किन्तु साधनामार्गे तस्य बाधकतामूलम्।

अथवा द्वयोरसत्यत्वे समाने शुक्तिरजतस्यासत्यत्वप्रत्ययो द्रुततरं जायते। लोकसिद्धरजतस्यासत्यत्वप्रत्ययश्चानेकेषु जन्मस्वपि न जायते। इत्येवंविधं वैषम्यं तयोर्न स्यात्। किं चेदमप्यवधेयं यत् शुक्तिस्थलीयं यद् रजतादिकं दृष्टान्तीकृत्य लोकसिद्धरजतादेरसत्यत्वं सिषाधयिषितं तस्याप्यसत्यत्वमयौक्तिकम्। यदि शुक्तिरजतादिकं वस्तुनोऽसत्यं स्यात् तदा लोकसिद्धरजतादिकमिव विस्पष्टं न साक्षात्क्रियेत। साक्षात् क्रियते च शुक्तिरजतादिर्लोकसिद्धरजतादितुल्य एव। अतस्तस्यासत्यताया युक्तिविरुद्धतया तदीयदृष्टान्तेनान्यत्र असत्यत्वकल्पना स्वाप्निकमोदकायमानैव।

इदमप्यत्र विभाव्यं यद् ज्ञेयस्य सत्यत्वपक्षे तस्य ज्ञानभिन्नत्वोपगमे यथा सर्वस्य ज्ञेयस्य सर्वज्ञानविषयतायाः प्रसक्तिर्भवति तथैव ज्ञेयस्यासत्यत्वपक्षेऽपि सर्वस्य ज्ञेयस्य सर्वं ज्ञानं प्रति निर्विशेषमसत्यतया सर्वज्ञेयस्य सर्वज्ञानविषयत्वापत्तिर्दुष्परिहरा। यद्येवं कल्प्येत यदभिन्न-भिन्नाकाराणां ज्ञानवासनानां प्रवाहोऽनादिकालात्प्रवर्तते, पूर्ववासना समानाकारं नवीनं ज्ञानं, ज्ञानं च समानाकारां नवीनां वासनां जनयति। वासनापि ज्ञानान्नातिरिच्यते अप्रकटज्ञानस्यैव वासनारूपत्वाभ्युपगमतात्। तदेवं ज्ञेये असत्यत्वज्ञानभिन्नत्वयोः सत्त्वेऽपि नीलाकारं ज्ञानं नीलमेव कुतः प्रकाशयति कुतो न पीतम्, इति प्रश्नोऽवसरं न लब्धुमर्हति तदेकमात्रप्रकाशकतायास्तदुत्पादकतदाकारवासनयैव नियमितत्वात्। परमियं कल्पना न युक्तिमती। वासनावत्सर्याः पुच्छपरिग्रहेण प्रोक्तापत्तिवैतरणीतरणविश्वासे ज्ञानभेदस्यापि लोपापत्त्या ज्ञानव्यक्त्यद्वयवादापत्तेः, एकैव ज्ञानव्यक्तिः विभिन्नाकारवासनासहकारेण विभिन्नाकारान् ज्ञेयान् गृह्णातीत्यभ्युपगमस्य निर्दोषत्वसम्भवात्, किञ्चैवं क्रमेण विचारे ज्ञानास्तित्ववादोऽपि दत्तजलाञ्जलिः स्याद् असतो ज्ञेयस्येव असतो ज्ञानस्याप्यनुभवस्वीकारे बाधकाभावात्, तथा च विज्ञानवादिनमपि विजित्य शून्यवादी माध्यमिक एवात्मनो जयमुद्घोषयेत्।

तदेवं पुरोदीरितविचारानुसारेण ज्ञेयस्य ज्ञानाभिन्नताया ज्ञानजातीयताया असत्यतायाश्च युक्त्युपष्टम्भालाभेन ज्ञानज्ञेययोः सत्यताऽन्योन्यभिन्नता चेति पक्षोऽपेक्षया स्वच्छो लक्ष्यत इति सङ्क्षेपतोऽवसेयम्।

आधुनिक जीवन में रामानुज-दर्शन की उपयोगिता

—डा० ब्रह्ममित्र अवस्थी

भारतीय दर्शन की अध्ययन-परम्परा में भले ही वेदान्त-दर्शन को दर्शन की एक परम्परा के रूप में स्मरण किया जाता हो किन्तु वास्तविकता तो यह है कि वर्तमान में वेदान्तदर्शन केवल एक दर्शन नहीं है। वह एक दर्शनों का समूह है। यह दूसरी बात है कि उस समूह के सभी दर्शन उपनिषद्, गीता एवं ब्रह्मसूत्र के आधार पर प्रतिष्ठित हैं। उनके आचार्यों ने इस प्रस्थानत्रयी की व्याख्या करके ही अपने दर्शन को प्रतिष्ठित करने का प्रयत्न किया है। इन सभी के दर्शन उपनिषदों के आधार पर प्रतिष्ठित होने के कारण ही उपनिषद् के पर्याय वेदान्त के नाम से प्रख्यात हुए हैं। इस समूह के प्रमुख आचार्य शंकर, भास्कर, रामानुज, निम्बार्क, माध्व, वल्लभ, श्रीकण्ठ एवं बलदेव हैं। इन सभी आचार्यों ने प्रस्थानत्रयी पर भाष्य लिखे हैं तथा श्रुति, युक्ति और अनुभव के आधार पर अपने दर्शन की स्थापना की है। तथा सभी का दावा है कि वे ही प्रस्थानत्रयी के वास्तविक तात्पर्य तक पहुँच सके हैं। उपर्युक्त आठ आचार्यों में आचार्य शंकर सर्वाधिक प्रतिष्ठित हैं तथा वेदान्तदर्शन का नाम लेते ही आचार्य शंकर के अद्वैत दर्शन की ओर ध्यान चला जाता है। तथा आचार्य रामानुज और माध्व का दर्शन भी दार्शनिक समाज में कम प्रतिष्ठित नहीं है। आचार्य माध्व के अनुयायियों ने तो उन्हें पूर्णप्रज्ञ मानकर उनको श्रद्धापूर्वक प्रायः इसी नाम से स्मरण किया है और इसी कारण उनके दर्शन को 'पूर्णप्रज्ञ-दर्शन' के नाम से भी अनेक बार स्मरण किया जाता है।

आचार्य रामानुज का दर्शन 'विशिष्टाद्वैत-वेदान्त' के नाम से पुकारा जाता है यद्यपि यह नाम रामानुज के किसी ग्रन्थ में उपलब्ध नहीं होता है। वस्तुतः रामानुज ने किसी स्वतन्त्र सम्प्रदाय की स्थापना नहीं की है और उन्होंने मौलिकता का दावा ही किया है। इसके विपरीत उन्होंने प्रायः प्राचीन आचार्यों का उल्लेख किया है। सम्भवतः विशिष्टाद्वैत-दर्शन का प्रारम्भ बौधायन से हुआ है तथा टंक, द्रमिड

गुहदेव, कपर्दिन्, भारुचि आदि के द्वारा इसका विकास हुआ है। किन्तु रामानुज ने इन सबकी अपेक्षा विशिष्टाद्वैत दर्शन को सर्वाधिक व्यवस्थित रूप से अधिकार-पूर्वक प्रस्तुत किया है। उन्होंने ग्राह्यचिन्तनपद्धति के माध्यम से ईश्वर को स्वीकार किया है और दर्शन के क्षेत्र में ईश्वर-भक्ति की प्रतिष्ठा की है। इसी कारण विशिष्टाद्वैत वेदान्त को अनेक बार रामानुज-दर्शन के नाम से स्मरण किया जाता है।

प्रबन्धचिन्तामणि के निम्न उल्लेख से यह प्रतीत होता है कि भोजराज ने बृहस्पति के समान वेग से अनेक प्रबन्धों की रचना की—

> **"त्यागैः कल्पद्रुम इव भुवि त्रासिताशेषदौस्थ्यः।**
> **साक्षाद् वाचस्पतिरिव जवाद् दृब्धनानाप्रबन्धः॥**[3]

प्रभावक-चरित के निम्न उल्लेख के अनुसार भोजराज के मुख में सरस्वती और लक्ष्मी का अविरोध निवास था।

---

१. प्रबन्धचिन्तामणि (भोजभीमप्रबन्ध) पृ० २५
२. वही, पृ० ५२।

"तत्र श्रीभोजराजोऽस्ति राजा निर्व्याजवैभवः ।
अवैरं यन्मुखाम्भोजं भारतीश्रीनिवासयोः ॥[१]

प्रबन्धकोश में भोजराज के वैदुष्य की प्रशंसा करते हुए लिखा है कि भोज के स्वर्गमन के पश्चात् भारती भोज के मुख-कमल के वियोग से विधुर अपने मन का, राजा वस्तुपाल के मुखचन्द्र से विनोदन करती है।

"श्रीभोजवदनाम्भोजवियोगविधुरं मनः ।
श्रीवस्तुपालवक्त्रेन्दौ विनोदयति भारती ॥"[२]

भोजराज ने समस्त शास्त्रों का अच्छी तरह से अभ्यास किया था। वे ३६ प्रकार के आयुध और ७२ प्रकार की कलाओं के पारगामी भी थे। "अभ्यस्तसमस्तशास्त्रः षट्त्रिंशद्दण्डान्यधीत्य द्वासप्तति-कलाकूपारपारङ्गमः···ववृधे"[३]

प्रभावक-चरित में मालवाधीश, विद्वच्चक्रशिरोमणि भोजराज के द्वारा रचे गए निम्न १९ प्रकार के शास्त्रों का उल्लेख है—

(१) भोजव्याकरण
(२) छन्दः शास्त्र
(३) शब्दालङ्कार शास्त्र
(४) दैवज्ञशास्त्र
(५) तर्कशास्त्र
(६) चिकित्सा शास्त्र
(७) राजसिद्धान्त
(८) रसशास्त्र
(९) अंकशास्त्र
(१०) वास्तुशास्त्र
(११) शाकुनकशास्त्र
(१२) अध्यात्म शास्त्र
(१३) स्वप्न शास्त्र
(१४) सामुद्रिक शास्त्र
(१५) निमित्त व्याख्यान शास्त्र
(१६) प्रश्नचूडामणि
(१७) विवृति
(१८) अर्थशास्त्र
(१९) मेघमाला

अभी तक भोजराज के ग्रन्थों की जो सूची[४] प्राप्त हुई है उसमें

---

१. प्रभावक-चरित (महेन्द्रसूरिचरितम्) पद्य नं० ७ पृ० १३९
२. प्रबन्धकोश (वस्तुपाल-प्रबन्ध)—पृ० ११५
३. प्रबन्धचिन्तामणि (मुंजराज-प्रबन्ध) पृ० २२
४. थियोडोर आफ्रेक्ट के "केटालाग्स केटालोगोरम्' में भोजराज निर्मित २३ ग्रन्थों का उल्लेख है तथा विश्वेश्वर नाथ रेऊ की पुस्तक 'राजा भोज' में (पृ० २३६) भोजरचित ४४ ग्रन्थों का उल्लेख है।

उपर्युक्त शास्त्रों के छन्दःशास्त्र, तर्कशास्त्र, अंकशास्त्र, तथा अर्थशास्त्र तथा मेघमाला को छोड़कर प्रायः सभी शास्त्र सम्मिलित हैं। संभव है, उपर्युक्त पांच विषयों पर भी भोजराज ने शास्त्र लिखे हों, जो अभी तक उपलब्ध नहीं हो सके हों।[1]

प्रबन्धचिन्तामणि के निम्न उल्लेख से यह बात स्पष्टतः प्रतीत होती है। भोजराज के द्वारा निर्मित प्रासादों एवं उनके विरुदों की संख्या के समान उनके ग्रन्थों की संख्या भी १०४ थीः—भवदीयनगर्यां भवत्कारिताश्चतुरुत्तरं शतं प्रासादा एतावन्त एव गीतप्रबन्धा भवदीया एतावन्ति च विरुदानि।[2]

उत्तर-प्रत्युत्तर तथा अर्द्धकाव्यरूप पद्य

जैन प्रबन्धग्रन्थों में भोजराज के वैदुष्यबोधक जो पद्य उपलब्ध होते हैं उनमें अनेक पद्य अर्द्ध-श्लोक के रूप में है जिन्हें अर्द्धकाव्य के नाम से कहा गया है। और इसी कारण उन श्लोकों के निर्माण से भोज को भी 'अर्द्धकवि' की संज्ञा दी गई है, ऐसे अर्द्ध काव्यों में पद्यों का रूप प्रायः उत्तर-प्रत्युत्तरात्मक है।[3]

एक समय भोजराज ने एक दरिद्र लकड़हारे ब्राह्मण से, जो कि नदी पार कर रहा था, पूछा :—**कियन्मात्रं जलं विप्र ?**

ब्राह्मण ने उत्तर दिया :—**जानुदनध्नं नराधिप।**

भोज ने पूछा :—**कथं सेयमवस्था ते ?**

ब्राह्मण ने उत्तर दिया :—**न सर्वत्र भवादृशाः**[4]।

पृथ्वी पर गिरे हुए अन्नकणों को चुननेवाले भिक्षुक को देखकर

---

१. किमेतदिति पप्रच्छ स्वामी तेऽपि व्यजिज्ञपन्। भोजव्याकरणं ह्येतच्छन्दःशास्त्र प्रवर्तते। असौ हि मालवाधीशो विद्वच्चक्रशिरोमणिः। शब्दालंकार-दैवज्ञ-तर्क-शास्त्राणि निर्ममे। चिकित्सा-राजसिद्धान्त-रस-वास्तूदयानि च। अंक-शाकुन-काध्यात्म-स्वप्न-सामुद्रिकान्यपि। ग्रन्थान् निमित्तव्याख्यान-प्रश्नचूडामणीनिह। विवृतिं चापशब्दार्थवेदार्थशास्त्रमेघमालया।—प्रभावकचरित(हेमचन्द्रसूरिचरितम्) पृ० १८५।

२. प्रबन्धचिन्तामणि (भोजभीमप्रबन्ध) पृ० ५०

३. इति तद्वर्णनकर्णनात्तेनार्द्धकविना राज्ञा।—प्रबन्धचिन्ता० (भोजभीम प्रबन्ध)पृ०४३

४. वही पृ० २६

भोजराज ने प्राकृत में कहा:—

नियउयरपूरणम्मि य असमत्था किं पि तेहि जाएहिं।

भोज के वचन सुनकर भिक्षुक ने कहा—

सुसमत्था वि हु न परोवयारिणो ते हि वि न किं पि[1] ॥

पुनः भोज ने कहा—

"परपत्थणापवन्नं मा जणणि जणेसु एरिसं पुत्तं"

पुनः भिक्षुक ने उत्तर दिया:—

मा उयरे वि धरिज्जसु पत्थणभङ्गो कओ जेहिं ॥[2]

एक समय भोजराज ने लक्ष्मी की अनिवार्यता को देखकर याचकों को यथेच्छ स्वर्णमुद्रायें देना प्रारंभ कर दिया। रोहक नाम के मंत्री ने कोश का विनाश देखकर रोजा को दान से रोकने के लिए सभामण्डप के भारपट्ट पर खड़िया से यह लिख दिया :— **आपदर्थे धनं रक्षेत्।**

राजा ने उसे पढ़कर आगे लिख दिया—**भाग्यभाजः क्व चापदः ?**

मंत्री ने एक बार पुनः साहस करके लिखा—**दैवं हि कुप्यते क्वापि।**

राजा का उत्तर था :—**सञ्चितोपि विनश्यति।**[3]

भोजराज एवं उनके महल में चोरी करने के लिए प्रविष्ट चोर, दोनों के द्वारा मिल कर एक ही पद्य के रचे जाने के तीन उल्लेख इस प्रकार प्राप्त होते हैं:—

भोजराज—**"यदेतच्चन्द्रान्तर्जलदलवलीला प्रकुरुते**
तदाचष्टे लोकः शशक इति नो मां प्रति तथा"।

चोर—**"अहं त्विन्दुं मन्ये त्वदरिविरहाक्रान्ततरुणी-**
कटाक्षोल्कापातव्रणशतकलङ्काङ्किततनुम्॥"[4]

---

१. जो अपना पेट भरने में असमर्थ हैं उनके जन्म लेने से क्या लाभ ? सुसमर्थ होकर भी जो परोपकारी नहीं उनके भी जन्म लेने से क्या लाभ (हिन्दी भाषान्तर)

२. (हिन्दी—हे जननि ! ऐसा पुत्र न जन, जो दूसरों के आगे प्रार्थना किया करे। हे जननि ! ऐसा पुत्र न जन, जो दूसरों के आगे प्रार्थना भंग करता रहे) प्रबन्ध-चिन्तामणि, (भोजभीम प्रबन्ध०) पृ० ३०

३. वही पृ० २५।

४. वही, पृ० २६

भोजराज—गवाक्षमार्गप्रविभक्तचन्द्रिको, विराजते वक्षसि सुभ्रु ते शशिः

चोर—प्रदत्तझम्पः स्तनसङ्गवाञ्छया विदूरपातादिव खण्डशो गतः"[१]

भोजराज—चेतोहरा युवतयः स्वजनोऽनुकूलः

सद्बान्धवाः प्रणयगर्भगिरश्च भृत्याः।
गर्जन्ति दन्तिनिवहास्तरलास्तुरङ्गाः

चोर—सम्मीलने नयनयोर्नहि किञ्चिदस्ति[२] ॥

एक बार चांदनी में बैठे हुए भोजराज ने यह श्लोक पढ़ा—

येषां वल्लभया सह क्षणमिव क्षिप्रं क्षपा क्षीयते,
तेषा शीतकरः शशी विरहिणामुल्केव सन्तापकृत्।

पास में बैठे हुए कुलचन्द्र नाम के एक दिगम्बर साधु ने कहा :—

अस्माकं तु न वल्लभा न विरहस्तेनोभयभ्रंशिना-
मिन्दू राजति दर्पणाकृतिरसौ नोष्णो न वा शीतलः ॥[3]

एक समय शीला पण्डिता की विदुषी पुत्री विजया से भोजराज ने विनोद करते हुए कहा—किं वर्ण्यते कुचद्वन्द्वमस्याः कमलचक्षुषः।
विजया ने उत्तर दिया—सप्तद्वीपकरग्राही भवान् यत्र करप्रदः ॥[४]
भोजराज ने पुनः विनोद करते हुए कहा:—सुरताय नमस्तस्मै जगदानन्ददायिने।

विजया ने बड़ी सावधानी से उत्तर दिया, जिसे सुनकर भोजराज अपने लज्जित अधोमुख को बड़ी देर तक ऊपर नहीं उठा सके :—

आनुषङ्गि फलं यस्य भोजराज भवादृशः।[५]

भोजराज ने विषय-परिवर्तन की दृष्टि से विजया से पूछा—

प्रहतमुरजमन्द्रध्वानवद्भिः पयोदैः,
कथमलिकुलनीलैः सैव दिक् सम्प्ररुद्धा।

---

१. वही, पृ० २७
२. वही, पृ० ४६
३. प्रबन्ध-चिन्तामणि (भोजभीम प्रबन्ध) पृ० ३३
४. वही, पृ० ४३
५. वही, पृ० ४३

विजया ने उत्तर दिया—**प्रथमविरहखेदम्लायिनी यत्र बाला,**

वसति नयनवान्नैरश्रुभिधौतवक्त्रा[1]

समस्या-पूर्तिः

भोजराज द्वारा स्वयं समस्यापूर्ति करने तथा समस्या देकर दूसरों के द्वारा उसकी पूर्ति कराने के अनेक उल्लेख हमें प्रबन्धग्रन्थों में मिलते हैं।

पुरातन-प्रबन्ध-संग्रह में भोजराज द्वारा की गई एक अपभ्रंश भाषा की समस्यापूर्ति का इस प्रकार उल्लेख है। मुञ्जराज को एक समय कृष्णवर्मा के पति और गौरवर्ण की पत्नी को देखकर समस्या उत्पन्न हुई—

ढुल्लउ सामलउ धण चम्पावन्नी

जब कोई भी विद्वान् इस समस्या की पूर्ति नहीं कर सका तो भोजराज ने इसकी पूर्ति इस प्रकार की—

छज्जइ कणयारहकस वट्टइ दिन्नी ?

जब कोई भी विद्वान् इस समस्या की पूर्ति नहीं कर सका तो भोजराज ने उस परिवार के सभी लोगों की विद्वत्ता की परीक्षा के लिए सभी को अलग अलग समस्याएँ दीं। कवि को समस्या दी गई—**असारात् सारमुद्धरेत्**। कवि ने समस्या की पूर्ति इस प्रकार की—

दानं विनावृतं नीतं कीर्तिधर्मस्तथायुषः।
परोपकरणं कायादसारात् सारमुद्धरेत्॥

कविपुत्र के लिए समस्या दी गई—**हिमालयो नाम नगाधिराजः,** तथा **'प्रवालशय्याशरणं शरीरम्।'**

कविपुत्र ने दोनों समस्याओं की एक ही पद्य में इस प्रकार पूर्ति की।

कविपत्नी के लिए अपभ्रंश की समस्या दी गई :—

कवणु पियावउं खीरू (अर्थात् किससे दूध पिलाऊं)

---

१. वही, पृ० ४३

कविपत्नी ने समस्या की इस प्रकार पूर्ति की :

जईयह रावणु जाईयउ दहमुहु इक्कु सरीरू ।
जणणि वियम्भी चिन्तवई कवणु पियावउं खीरु ।

(अर्थात् जब दशमुख तथा एक शरीरवाले रावण का जन्म हुआ तो उसकी माँ आश्चर्यचकित होकर सोचने लगी कि उसे किस मुंह से दूध पिलाऊँ ।[1])

कविदासी को भी अपभ्रंश की ही समस्या दी गई :—

"कण्ठि विलुल्लई काउ"

(अर्थात् कण्ठ में काक लटक रहा है)

कविदासी ने इस समस्या की पूर्ति इस प्रकार की—

कवणिहिं विरहकरालि अइं दड्डुविडावराउ ।
सहि अच्चब्भुअ दिट्ट मइं कण्ठि विलुल्लइ काउ ॥[2]

(अर्थात् पतिविरह से कराल बनी हुई किसी स्त्री ने उस बेचारे कौए को उड़ाया तो हे सखि ! मैंने बड़े आश्चर्य से देखा कि वह काक उसके कण्ठ में लटक रहा है । अर्थात् वह स्त्री पति-वियोग में इतनी दुबली हो गई कि उसके कण्ठ का कौआ बाहर दिखाई देने लगा ।)

प्रकीर्णक

जैन प्रबन्धग्रन्थों में भोजनिर्मित जो अन्य पद्य प्राप्त होते हैं उन्हें हमने प्रकीर्णक में सम्मिलित किया है ।

भोजकृत एक ऐसा पद्य उपलब्ध होता है जिसके सम्बन्ध में स्वयं भोज का कहना है कि "स्वनिर्मित यह पद्य मेरे कण्ठ का आभरण है और मैं इस श्लोक का इष्ट मन्त्र के समान जप करता हूँ"[3]—

---

१. पुरातनप्रबन्धसंग्रह (भोजनृपवृत्तम्) पृ० २०

२. प्रबन्धचिन्तामणि (भोजभीम प्रबन्ध) पृ० २७-२८

३. इति स्वकृतं कण्ठाभरणीभूतं श्लोकमिष्टं मन्त्रमिव जपन् मन्त्रिम् प्रेतप्रायेण भवता कथं विप्रलभ्ये—प्रबन्धचिन्तामणि पृ० २६

"यदनस्तमिते सूर्ये न दत्तं धनमर्थिनाम् ।
तद्धनं नैव जानामि प्रातः कस्य भविष्यति ॥"[1]

एक बार भोजराज ने गुर्जरदेश के राजा भीम के पास अपने सन्धिविग्रहिक के हाथ यह प्राकृत गाथा लिखकर भेजी थी—

"हेलानिद्दलियगइन्दकुम्भपयडियपयावपसरस्स ।
सीहस्स मएण समं न विग्गहो नेव सन्धाणं ॥"[2]

अपभ्रंश भाषा का एक ऐसा पद्य उपलब्ध होता है जिसे भोज-वाक्य के रूप में वेश्या ने लोगों से कहा था—

"कसु करु रे पुत्तकलत्तधी कसु करु रे करसनवाडी ।
एकला आइवो एकला जाइवो हाय पथ देहु झाड़ी ॥"[3]

एक समय भोजराज के दान के उल्लेखों को पढ़ा गया तो उन्होंने अपने को बड़ा उदार दानी मानकर अभिमान के साथ कहा—

"तत्कृतं यन्न केनापि तद्दत्तं यन्न केनचित् ।
तत्साधितमसाध्यं यत्तेन चेतो न दूयते ॥"[4]

एक समय भोज ने अपने वध की आज्ञा देनेवाले मुंजराज के प्रति यह पद्य लिखकर भिजवाया था—

मान्धाता च महीपतिः कृतयुगालंकारभूतो गतः,
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः ।
अन्ये चापि युधिष्ठिरप्रभृतयो यावद् भवान् भूपते,
नैकेनापि समं गता वसुमतीमन्ये त्वया यास्यति ॥[5]

---

१. वही पृ० २६
२. (हिन्दी-क्रीडामात्र में जिसने हाथी का कुम्भस्थल विदीर्ण किया हो और चारों दिशाओं में जिसका प्रताप फैल रहा हो उन सिंह का मृग के साथ न तो विग्रह ही (शोभता हैं) और न सन्धि ही रहती है) वही पृ० २८ ।
३. (हिन्दी—अरे ! पुत्र, कलत्र और पुत्रियों का क्या कर रहे हो ? और खेती-बाड़ी का भी क्या कर रहे हो। मनुष्य को तो अपने हाथ-पैर दोनों झाड़कर अकेले ही आना है और अकेले ही जाना हैं।) वही पृ० ५१
४. प्रबन्ध चिन्तामणि (भोजभीम प्रबन्ध) पृ० २७ ।
५. प्रबन्ध-चिन्तामणि (मुंजराज प्रबन्ध)

इस पद्य के सम्बन्ध में कहा जाता है कि इसे पढ़कर मुंजराज ने कहा था कि "हे भोज, मरणकाल में कहा हुआ तुम्हारा काव्य मेरे हृदय को वेध रहा है"।[१]

प्रबन्ध-चिन्तामणि के "**अनित्यताश्लोकचतुष्टयप्रबन्ध**" में भोजकृत अनित्यतासम्बन्धी श्लोक-चतुष्टय इस प्रकार उपलब्ध हैं—

> "उत्थायोत्थाय बोद्धव्यं किमद्य सुकृतं कृतम् ।
> आयुषः खण्डमादाय रविरस्तं प्रयास्यति ॥
>
> लोकः पृच्छति मे वार्तां शरीरे कुशलं तव ।
> कुतः कुशलमस्माकमायुर्याति दिने दिने ॥
>
> श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् ।
> मृत्युर्नहि परीक्षेत कृतं वास्य न वा कृतम् ॥
>
> मृतो मृत्युर्जरा जीर्णा विपन्नाः किं विपत्तयः ।
> व्याधयो व्याधिताः किं नु दृश्यन्ते यदमी जनाः ॥"[२]

भोजराज ने अपने जीवन का ध्येय सूचित करनेवाली चार आर्याओं को अपने कङ्कण पर खुदवाया था। आर्याओं की भाषा तथा विषय एवं भोज के वैदुष्य पर विचार करने से ऐसा प्रतीत होता है कि ये आर्यायें भोजकृत ही होनी चाहिए। वे चार आर्या छन्द इस प्रकार हैं—

> इदमन्तरमुपकृतये प्रकृतिचला यावदस्ति सम्पदियम् ।
> विपदि नियतोदयायां पुनरुपकर्तुं कुतोऽवसरः ॥
> निजकरनिकरसमृद्ध्या धवलय भुवनानि पार्वणशशाङ्क ।
> सुचिरं हन्त न सहते हतविधिरिह सुस्थितं कमपि ॥
> अयमवसरः सरस्ते सलिलैरुपकर्तुमर्थिनामनिशम् ।
> इदमपि सुलभमम्भो भवति पुरा जलधराभ्युदये ॥
> कतिपयदिवसस्थायी पूरो दूरोन्नतश्च भविता ते ।
> तटिनी तटद्रुपातिनि पातकमेकं चिरस्थायि ॥[3]

---

१. हा हा सल्लइ हियए कव्वं तुह भोजवं भणिय जं भरणे। वही पृ० २२ ॥

२. प्रबन्धचिन्तामणि के भोजभीमप्रबन्धान्तर्गत 'अनित्यता-श्लोकचतुष्टयप्रबन्ध' पृ० ४६।

३. प्रबन्धचिन्तामणि (भोजभीमप्रबन्ध) पृ० २६।

पुरातन-प्रबन्ध-संग्रह के "**भोजगाङ्गेयप्रबन्ध**" में भोजकृत एक पद्य का केवल एक पद इस प्रकार प्राप्त होता है—

"इह निवसति मेरुः शेखरो भूधराणाम्" ?

उपसंहार

उपर्युक्त विवरण से यह निष्कर्ष निकलता है कि मालवाधीश भोजराज सर्वशास्त्रज्ञ एवं महान् विद्वान् थे। उनमें काव्य-निर्माण की अद्भुत क्षमता थी। वे सुन्दर, सरल, सरस एवं श्लेषगर्भ कविता के निर्माण में पूर्ण दक्ष थे। उन्होंने लगभग १९ विषयों पर १०४ ग्रन्थों की रचना की थी। ग्रन्थ-रचना के अतिरिक्त वे मुक्तकों के निर्माण में भी परम प्रवीण थे। ऐसा प्रतीत होता है कि भोज के मुक्तक अपने चमत्कार के कारण जन-जन में व्याप्त हो चुके थे। मुक्तकों में अर्द्धकाव्य, उत्तर-प्रत्युत्तर तथा समस्यापूर्तिवाली रचना अधिक पसन्द थी। वे संस्कृत की रचना के साथ-साथ प्राकृत एवं अपभ्रंश की रचना में भी कुशल थे।

---

१. पुरातन-प्रबंधसंग्रह (भोजगाङ्गेयप्रबन्ध) पृ० २०।

बौद्ध-परम्परायां स्वर्गस्थाः देवाः

—डा० दामोदरशास्त्री

बौद्ध-परम्परायां नरक-तिर्यक्-प्रेत-असुर-मनुष्य-देवेति षट् गतयः स्वीकृताः ।[1] जैन-परम्परायान्तु चतस्र एव गतयः,[2] तैः प्रेत-असुरयोन्योः देवकोटावेव परिगणितत्वात् । बौद्धाः मन्वते, यत्स्वकर्मानुसारेण स्वर्ग-नरकादिषु जनाः गच्छन्ति ।[3] पुण्येन स्वर्गतिः, पापेन नरकगतिरितिविषये नास्ति तेषां वैमत्यम् ।[4]

स्वर्गतिमनुप्राप्तानां देवानां स्थानानि मेरोः शृङ्गेषु, तदूर्ध्वं च वर्तन्ते । त्रयो धातुलोका जगति स्वीकृताः, यथा कामधातुलोकः, रूपधातुलोकः, अरूपधातुलोकश्च । एतेषु धातुलोकेषु विविधा देवाः ये निवसन्ति, तेषां निरूपणं करिष्यते ।

(१) कामधातुलोके देवाः

कामधातुलोके षट्प्रकारकाः देवा निवसन्ति[5]—(१) धातुर्महाराजिकाः देवाः, (२) त्रायस्त्रिंशाः, (३) यामाः, (४) तुषिताः, (५) निर्माणरतयः, (६) परनिर्मितवशवर्तिनः ।

(अ) चातुर्महाराजिकाः—मेरोश्चतस्रः परिषण्डाः सोपानानि वर्तन्ते, प्रथमा परिषण्डा समुद्रीयजलस्तरतो दशसहस्रयोजनमूर्ध्वं वर्तते, द्वितीया विंशतिसहस्रयोजनमूर्ध्वम्, तृतीया त्रिंशत्सहस्रयोजनमूर्ध्वम्, चतुर्थी च चत्वारिंशत्सहस्रयोजनमूर्ध्वं

---

१. महायानसूत्रसंग्रह, २०.५७
कुत्रचिदसुरगतिमपास्य बौद्धग्रन्थेषु पञ्च गतयोऽपि निरूपिताः ।

२. तत्त्वार्थसूत्र, ८.१०,

३. गर्भमेके प्रपद्यन्ते, निरयं पापकृत्तमाः ।
स्वर्गं सुकृतिनो यान्ति, परिनिर्वान्त्यनास्रवाः ॥ (धम्मपद, पापवर्ग, ११)

४. धम्मपद, यमकवर्ग, १७-१८,

५. अभिधर्मकोश, ३·१

वर्तते । तत्र प्रथमा परिषण्डा मेरुपार्श्वतः षोडशसहस्रयोजनं यावन्निर्गता, द्वितीया च तथैवाष्टसहस्रयोजनं यावत्, तृतीया च चतुःसहस्रयोजनं यावत्, चतुर्थी च द्विसहस्रयोजनं यावन्निर्गता वर्तते । तत्र प्रथमपरिषण्डायां करोटपाणियक्षाः, द्वितीयपरिषण्डायां मालाधराः, तृतीयपरिषण्डायां सदामदाः, चतुर्थपरिषण्डायां चत्वारो महाराजिकदेवाः स्वपार्षदैः सह निवसन्ति ।[६] तेषु चतुर्षु धृतराष्ट्रः पूर्वस्यां दिशि, विरूढको दक्षिणदिशि, विरूपाक्षः पश्चिमायाम्, वैश्रवण उत्तरस्यां दिशि निवसति । धृतराष्ट्रप्रशासने गन्धर्वाः, निरूढकप्रशासने कुम्भाण्डाः, विरूपाक्षप्रशासने नागाः, वैश्रवणप्रशासने यक्षाः प्रजारूपेण वर्तन्ते ।

सूर्यचन्द्रतारकादयश्च चतुर्माहाराजिकदेववर्गीया एव स्वीकृताः । एषां चातुर्माहाराजिकदेवानाम् युगन्धर-ईषाध-खदिरक-सुदर्शन-विनतक-निमिन्धरपर्वतेष्वपि निवासः स्वीकृतः ।

चन्द्रसूर्यादयः—चतुर्माहाराजिकदेवानां चन्द्रादयो वर्गविशेषा एव । एते विमानेषु निवसन्ति । प्राणिकर्मणां सामूहिकबलेनान्तरिक्षे वायुरुत्पद्यते, तस्यां चन्द्रादयो निवसन्ति । एते मेरुं प्रदक्षिणीकृत्य तिष्ठन्ति । चन्द्रबिम्बपरिमाणं पञ्चाशद्योजनम्, सूर्यबिम्बपरिमाणमेकपञ्चाशद्योजनं स्वीक्रियते ।[७] चन्द्रसूर्ययोर्गतिर्युगन्धरपर्वतशिखरसमकक्षं मेरोरर्धभागे भवति । सूर्यगमनवैचित्र्यादहोरात्राणां परिमाणं वर्धतेऽपक्षीयते च । उत्तरकुरुप्रदेशे यदार्धरात्रम्, पूर्वविदेहद्वीपे सन्ध्याकालः, जम्बूद्वीपे मध्यान्हम्, गोदानीयद्वीपे सूर्योदयात्प्रातःकालो भवति ।[८]

(आ) त्रायस्त्रिंशद्देवाः—मेरुशिखरे त्रयस्त्रिंशद्देवानां निवासः । मेरुशिखरदिशोऽशीतिसहस्रयोजनं यावद् विस्तृत्ता वर्तन्ते, चतुर्षु दिक्षु पञ्चशतयोजनं यावदुच्छ्रिताः कूटाः, तेषु वज्रपाणियक्षाः, सततं रक्षकरूपेण निवसन्ति । शिखरमध्यभागे शक्रस्य सुदर्शनं नाम सुवर्णमयं पुरम् । अस्मिन्सुदर्शनपुरे मध्यस्थो वैजयन्तनामकः

---

६. परिषण्डाश्चतस्रोऽस्य दशसाहस्रिकान्तराः ।
षोडशाष्टौ सहस्राणि चत्वारि द्वे च निर्गताः ॥
करोटपाणयस्तासु मालाधराः सदामदाः ।
महाराजिकदेवाश्च पर्वतेष्वपि सप्तसु ॥ (अभिधर्म० ३·६४)

७. अर्धेन मेरोश्चन्द्राकौं पञ्चाशत्सैकयोजनौ । (अभिधर्म० ३·५९-६०)

८. अर्धरात्रोऽस्तगमनं मध्यान्ह उदयः सकृत् । (अभिधर्म० ३·६०)

शक्रप्रासादः। नगराद् बहिश्चत्वारि सन्त्युद्यानानि—चैत्ररथम्, पारुष्यकम्, मिश्रकम्, नन्दनम्। एतान्युद्यानानि देवानां क्रीड़ाभूमिः।[९]

(इ) **यामतुषितादयो देवाः**—यामतुषितादयो देवास्त्रायस्त्रिंशद्देवलोकादूर्ध्वं विमानेषु निवसन्ति।[१०] यामास्त्रायस्त्रिंशद्देवलोकादशीतिसहस्रयोजनं यावदूर्ध्वम्, तुषिता यामदेवलोकादशीतिसहस्रोत्तरैकलक्षयोजनंयावत् (१६००००) ऊर्ध्वम्, निर्माणरतिदेवास्तुषितदेवलोकाद् ३२०००० योजनं यावद् ऊर्ध्वम्, परिनिर्मितवशवर्तिनो देवा निर्माणरतिदेवलोकाद् ६४०००० योजनं यावद् ऊर्ध्वं निवसन्ति।[११] परिनिर्मितवशवर्तिदेवलोकाद् ऊर्ध्वं 'मार'-देवस्य निवासः। अयं **मारदेवः** कामधातुलोकस्य प्रशासको देवश्च स्वीकृतः।

(ई) **कामधातुस्थदेवानां सामान्यस्वरूपम्**—चातुर्महाराजिकदेवादयः कामभुजः। चातुर्महाराजिकास्त्रायस्त्रिंशाश्च देवाः स्त्रीभिः सह मैथुनेन, यामा आलिङ्गनेन, तुषिताः पाणिस्पर्शेण, निर्माणरतयो हास्येन, परनिर्मितवशवर्तिन ईक्षणेन कामवासनां शमयन्ति।[१२]

मनुष्याणां यत्पञ्चाशद्वर्षपरिमितं कालं तच्चातुर्महाराजिकदेवलोके एकमहोरात्रमेव। एवं च चातुर्महाराजिकानां पञ्चशतवर्षपरिमितायुष्कम् (५० × ३६० × ५०० = ९०००००० वर्षाणि मनुष्याणाम्), त्रायस्त्रिंशद्देवानां लोके शतमानववर्षाणामेकमहोरात्रम्, एवं तेषामेकसहस्रवर्षपरिमितमायुष्यम्। यामानां लोके द्विशत-

---

९. मेरुमूर्ध्नि त्रयस्त्रिंशाः स चाशीतिसहस्रदिक्।
विदिक्षु कूटाश्चत्वारः उषिता वज्रपाणिभिः॥
मध्ये सार्धं द्विसाहस्रपार्श्वमभ्यर्धयोजनम्।
पुरं सुदर्शनं नाम हैमं चित्रतलं मृदु॥
सार्धद्विशतपार्श्वोऽत्र वैजयन्तो बहिः पुनः।
तच्चैत्ररथपारुष्यमिश्रनन्दनभूषितम्॥ (अभिधर्म० ३·६५-६७)

१०. तत ऊर्ध्वं विमानेषु देवाः। (अभिधर्म० ३·६९)

११. स्थानात्स्थानादधो यावत्तावदूर्ध्वं ततस्ततः।
नोर्ध्वदर्शनमस्त्येषाम्। (अभिधर्म० ३·७२)

१२. देवाः कामभुजस्तु षट्।
द्वन्द्वालिङ्गनपाण्याप्तिहसितेक्षितमैथुनाः॥ (अभिधर्म० ३·६९)
तुलना-तत्त्वार्थसूत्र (जैन) ४·७-९,

मानववर्षाणामेकमहोरात्रम्, एवं तेषां द्विसहस्रपरिमितायुष्यम्, इत्यादिक्रमेण उत्तरोत्तरं द्विगुणमायुष्यपरिमाणं परनिर्मितवशवर्तिदेवान् यावत् ।[13]

चातुर्महाराजिकदेवानां शरीरोच्छ्रायः क्रोशचतुर्थभागपरिमितः, त्रायस्त्रिंशानामर्धक्रोशपरिमितः, यामानामेकोनपादैकक्रोशपरिमितः, परनिर्मितवशवर्तिनां सार्धैकक्रोशपरिमितो वर्तते ।[14]

कामधातुलोकपतिमारदेवस्य निवासः परनिर्मितवशवर्तिदेवलोके तदूर्ध्वं वा स्वीक्रियते ।

(२) रूपधातुलोके देवाः

रूपधातुलोके सप्तदशनिकायाः निवसन्ति—

(अ) प्रथमध्यानप्राप्यदेवलोकवासिनः—(१) ब्रह्मकायिकाः, (२) ब्रह्मपुरोहिताः, (३) महाब्रह्मदेवाः, **(आ) द्वितीयध्यानप्राप्यदेवलोकवासिनः**—(४) परीत्ताभाः, (५) अप्रमाणाभाः, (६) आभास्वराः, **(इ) तृतीयध्यानप्राप्यदेवलोकवासिनः**—(७) परीत्तशुभाः, (८) अप्रमाणशुभाः, (९) शुभकृत्स्नाः, **(ई) चतुर्थध्यानप्राप्यदेवलोकवासिनः**—(१०) अनभ्रकाः, (११) पुण्यप्रसवाः, (१२) बृहत्फलाः (१३) अविहाः, (१४) अतपाः, (१५) सुदृशाः, (१६) सुदर्शनाः, (१७) अकनिष्ठाः ।[15] एतानि नामानि अभिधर्मकोशमनुसृत्य निरूपितानि । महायानसूत्रसंग्रहेऽष्टादशप्रकाराः निरूपिता दृश्यन्ते । यथा—(१) ब्रह्मकायिकाः (२) ब्रह्मपुरोहिताः, (३) ब्रह्मपारिषद्याः (४) महाब्रह्माणः, (५) परीत्ताभाः, (६) अप्रमाणाभाः, (७) आभास्वराः, (८) परीत्तशुभाः, (९) शुभकृत्स्नाः, (१०) अनभ्रकाः, (११) पुण्यप्रसवाः, (१२) बृहत्फलाः, (१३) असंज्ञिसत्त्वाः, (१४) अवृहाः, (१५) अतपाः, (१६) सुदृशाः, (१७) सुदर्शनाः, (१८) अकनिष्ठाः ।[16] दक्षिणसम्प्रदायग्रन्थेषु तु यन्निरूपणं प्राप्यते, तत्तु कामधातुलोकस्यदेवानां षोडशविधत्व समर्थयति । तत्र निरूपणप्रकारः—**(अ) प्रथम-**

---

१३. नृणां वर्षाणि पञ्चाशदहोरात्रो दिवौकसाम् ।
कामेऽधराणां तेनायुः पञ्चवर्षशतानि तु ॥
द्विगुणोत्तरमूर्ध्वानाम् । (अभिधर्म० ३·७९-८१)

१४. पादवृद्ध्या तनुर्यावत्सार्धक्रोशो दिवौकसाम् ।
कामिनाम् । (अभिधर्म० ३·७६)

१५. अभिधर्म० ८·२ (अ)

१६. महायानसूत्रसंग्रह, २०·१२८,

ध्यानप्राप्यदेवलोकवासिदेवाः—(१) ब्रह्मपारिषद्याः, (२) ब्रह्मपुरोहिताः, (३) महाब्रह्माणः, (**आ**) **द्वितीयध्यानप्राप्यदेवलोकवासिदेवाः**—(४) परीताभाः, (५) अप्रमाणाभाः, (६) आभास्वराः, (**इ**) **तृतीयध्यानप्राप्यदेवलोकवासिदेवाः**—(७) परीत्तशुभाः, (८) अप्रमाणशुभाः, (९) शुभकृत्स्नाः, (**ई**) **चतुर्थध्यानप्राप्यदेवलोकवासिदेवाः**—(१०) आभास्वराः, (११) आसन्नसत्त्वाः, (**उ**) **पञ्चमध्यानप्राप्यदेवलोकवासिदेवाः**—(१२) अविहाः, (१३) अतपाः, (१४) सुदर्शाः, (१५) सुदर्शिनः, (१६) अकनिष्ठाः। अविहादयः अकनिष्ठान्ताः देवा अनागामिनश्चाभिधीयन्ते।[१७]

ध्यानस्य चतस्रः अवस्थाः—एवं निरूप्यते यदस्मिन् जन्मनि ये जनाः ध्यानस्य चतस्रः अवस्थाः सम्प्राप्याध्यात्मिकीं स्थितिं समुन्नेतुं प्रभवन्ति, तेऽस्मात् लोकादतीत्य रूपधातुलोकस्थस्वर्गेषु तत्तत्स्थित्यनुसारं गच्छन्ति। ता इमा ध्यानस्य चतस्र अवस्थाः—(१) सवितर्कं सविचारं, विवेकजं प्रीतिसुखमिति प्रथमध्यानम्। (२) अध्यात्मप्रमोदात्प्रीतिसुखमिति द्वितीयं ध्यानम्। (३) उपेक्षास्मृतिसंप्रजन्यं सुखमिति तृतीयं ध्यानम्। (४) उपेक्षास्मृतिपरिशुद्धिरदुःखासुखा वेदनेति चतुर्थं ध्यानम्।[१८] ये प्रथमे ध्यानस्वरूपे पूर्णाभ्यासदशां प्राप्ता भवन्ति, ते प्रेत्यास्माल्लोकात् रूपधातुलोके प्रथमध्यानप्राप्तदेवलोकेषु देवा भवन्ति। ये च चतुर्थे ध्यानेऽभ्यस्तास्ते चतुर्थध्यानप्राप्यदेवलोकेषु जन्म लभन्ते।[१९]

रूपधातुलोके रूपरागसंप्रयुक्ता देवा रूपावचराः भवन्ति। एतेषु मैथुनतृष्णा नैव भवति। लिङ्गस्य (स्त्री पुरुषलिङ्गयोः) अभावस्तेषु वरीवर्ति। रसगन्धाभावेऽपि जिह्वाघ्राणेन्द्रिये तेषां भवतः। न च तत्र दिवसरात्रिकृतविभागः। कालमानं 'कल्प'-रूपेण विधीयते।

एतेषां निवासो विमानेषु भवति। तानि विमानानि कामधातुदेवविमानेभ्य ऊर्ध्वमूर्ध्वं तिष्ठन्ति। अकनिष्ठदेवानां विमानानि सर्वतः ऊर्ध्वं वर्तन्ते।

ब्रह्मकायिकदेवानामुच्छ्रायः सार्धैकयोजनपरिमितः, ब्रह्मपुरोहितानामेकयोजनपरिमितः, महाब्रह्मदेवानां सार्धैकयोजनपरिमितः, परीताभदेवानां योजनद्वयपरिमितः, अकनिष्ठदेवानां तु षोडशयोजनपरिमितः उच्छ्रायो वर्तते।

---

१७. द्र० बौद्धधर्मदर्शन (आ० नरेन्द्रदेव), पृ० ३६८; मेनुअल आफ बुद्धिस्ट फिलासफी, पृ० ६३-६९; मेनुअल आफ इण्डियन बुद्धिज्म, पृ० ५७-५८;

१८. महायानसूत्रसंग्रह, २०·७२

१९. अर्ली मोनेस्टिक बुद्धिज्म, पृ० १९५-१९६

ब्रह्मकायिकानामायुष्यमर्धकल्पपरिमितम्, अकनिष्ठदेवानां तु षोडशसहस्रकल्प-परिमितमायुष्यं निरूप्यते।[२०] (रूपधातुलोके उत्तरोत्तरं द्विगुणितमायुष्यं वर्णितम्।)

(३) अरूपधातुलोके देवाः

अरूपधातुलोके, अरूपब्रह्मलोके वा चतुर्विधा: देवा:—(१) आकाशानन्त्या-यतना:, (२) विज्ञानानन्त्यायतना:, (३) आकिञ्चन्यायतना:, (४) नैवसंज्ञानसंज्ञा-यतना:।

अरूपधातुलोकस्थस्वर्गाणां न किञ्चिन्निश्चितं स्थानम्,[२१] एतल्लोकस्था देवा मनोमय-सूक्ष्मशरीराणि दधति। मनोमयशरीरधारणात्तेषामन्योन्यप्रवेशोऽपि सम्भ-वति।[२२] पूर्वजन्मनि आकाशानन्त्यायतनादिरूपध्यानसर्वोत्कृष्टासु अवस्थासु संप्राप्ताः अरूपधातुलोके समुद्भवन्ति।[२३]

आकाशानन्त्यायतनदेवानामायुष्यं विंशतिसहस्रकल्पपरिमितम्, विज्ञानानन्त्या-यतनदेवानां चत्वारिंशत्सहस्रकल्पपरिमितम्, आकिञ्चन्यायतनानां षष्टिसहस्रकल्प-परिमितम्, नैवसंज्ञानसंज्ञायतनानां तु तदशीतिसहस्रकल्पपरिमितं वर्ण्यते।

(४) स्वर्गस्थदेवानां जन्मादिकनिरूपणम्

कामधातुलोके देवानां देवीनां च जन्म देवी-जानुतो भवति। यदा देवीहस्ते पुष्पाणि प्रादुर्भवन्ति, तदा सा विजानाति यत्सन्ततेर्जन्म भावीति। सप्तदिवसानन्तरं देवस्य देव्या वोपपादो भवति। जन्म-समये तेषां वय: पञ्चवर्षत आरभ्य दशवर्षाणि यावद् भवति। दिव्यभोजनपूर्णं पात्रं सद्य:प्रजातो देवो देवी वा प्राप्नोति, भुंक्ते च। अचिरेणैव पूर्णयौवनावस्थां च लभते। दिव्यकल्पवृक्षेभ्यः सुन्दरवस्त्राणि च प्राप्यन्ते।

रूपधातुलोके देवानां जन्म मातृपितृसंयोगेन विना जायते। न तेषां किञ्चि-ल्लिङ्गम्। तत्र वस्त्रसहिता एव देवा: उत्पद्यन्ते। अरूपधातुलोकेऽपि देवानां जन्म मातृपितृसंयोगं विनैव भवति। वस्त्राणि तु तत्र न तेषां भवति।

---

२०. भारतीय सृष्टिविद्या (डा० प्रकाश), पृ० ७१-७२
२१. मेनुअल आफ बुद्धिस्ट फिलासफी, पृ० ६०
२२. अर्ली मोनेस्टिक बुद्धिज्म, पृ० ११६,
२३. तत्रैव,

अचिरोपपन्नस्य देवपुत्रस्य देवकन्यकाया वा ज्ञानमेतत्सम्भवति यत्कुतः केन कर्मणा च देवलोकं जन्म प्राप्तं तेनेति ।[२४]

देवानां शरीराणि दीप्तिमन्ति । अत्यन्तसुन्दरं मनोहरं च तेषां स्वरूपं भवति । देवानामाभास्वरत्वं तथाऽऽनन्दभोजित्वं निरूप्यते ।[२५] देवानां प्रभया सर्वदिशः प्रकाशिता भवन्ति ।[२६]

एकदा बुद्धस्य दर्शनार्थं लिच्छवयः समागताः । ते यद्वर्णयुक्तेषु अश्वेषु समारूढाः, तद्वर्णयुक्तानि वस्त्राणि समधारयन् । नीलवर्णे अश्वे नीलवस्त्रधराः, रक्तवर्णेऽश्वे रक्तवस्त्रधराः लिच्छवय आसन् । एतान् दृष्ट्वा बुद्धो भिक्षूनाह—"यदि भवद्भिर्देवा न दृष्टास्तर्हि पश्यैनान् । देवा एतादृशा एव (मनोहराः) ।"[२७] एतेन निरूपणेन देवानां विविधवस्त्राभरणयुक्तत्वं मनोहरत्वं च सिद्ध्यति । त्रायस्त्रिंशद्देवाः चलविमलकुण्डलधराः, हारार्धहारविराजितगात्राः, मणिरत्नविचित्रमौलयः, कुंकुमतमालपत्र-स्पृक्कादिसंस्पृष्टगात्राः, मणिरत्नचूड़ाः वर्णिताः बौद्धग्रन्थेषु ।[२८]

देवानामवधिज्ञानदर्शने स्वभावतो वर्तेते । स्वर्गस्थ इन्द्रः पृथ्वीलोकभाविघटनानां ज्ञानं प्राप्तुं प्रभवति । भगवतो बुद्धस्य परिनिर्वाणस्य पूर्वज्ञानं देवैरधिगतम् दुःखं च प्रकटितमिति निरूपितं दीघनिकाये ।[२९]

देवाः स्वेच्छया यथेच्छस्वरूपधारणे समर्थाः । विविधरूपाणि धृत्वा ते मनुष्यलोके समागच्छन्ति ।[३०] सर्वे देवाः आर्यभाषां (देववाणीं) वदन्ति । अध्ययनेन

---

२४. धर्मता खलु देवपुत्रस्य देवकन्यकाया वा अचिरोपपन्नस्य त्रीणि चित्तान्युत्पद्यन्ते, कुतश्च्युतः कुत्रोपपन्नः, केन कर्मणेति । (अवदानशतक, पञ्चमवर्ग, मौद्गल्यायनकथा, पृ० ११५)

२५. प्रीतिभक्षा भविष्यामः, देवा आभास्वरा यथा । (धम्मपद, सुखवर्ग, ४)

२६. वण्णो च मे सब्बदिशा पभासति, (विमानवत्थु, १·४·८, पृ० ३)

२७. महावग्ग, ६·१८·३०

२८. अवदान शतक, पञ्चम वर्ग, जाम्बालकथा, पृ० १२४; षष्ठ वर्ग, कृष्णसर्पकथा, पृ० १२६,

२९. अवदानशतक, चतुर्थ वर्ग, सुरूपकथा; पृ० ८६; दीघनिकाय, २·३·४, पृ० १४१;

३०. अवदानशतक, चतुर्थ वर्ग, सुरूपकथा, पृ० ८६; कवड़कथा, पृ० ८१; धर्मगवेषीकथा, पृ० ९८; पञ्चम वर्ग, मौद्गल्यायनकथा, पृ० ११५;

विनैव तेषां शुद्धोच्चारणं सम्भवति।

सुखावतीलोकं विहाय सर्वेषु देवलोकेषु मृत्यु-(च्यवन) कालात्पूर्वं षट् निमित्तानि प्रादुर्भवन्ति। यथा—(१) वस्त्राभरणेभ्योऽमनोज्ञशब्दनिर्गमः, (२) कायप्रभायाः अपचयः, (३) माल्यपुष्पाणां म्लानता, (४) कक्षेभ्यः स्वेदनिर्गमः, (५) स्वासने धृत्यभावः, (६) अक्षीणामुन्मेषनिमेषप्रारम्भः।[३१]

भगवतो बुद्धस्य पार्षदि देवानां किन्नराणां तथाप्सरःप्रभृतीनां समागमनं बहुषु स्थलेषु दृश्यते।[३२] अङ्गुत्तरनिकाये वर्णितमस्ति यद् देवाः मनुष्येभ्यः सम्मानं लब्ध्वा तान् प्रत्यासक्ता भवन्ति, दीर्घजीवनादिकं च मनुष्येभ्यः प्रयच्छन्ति।[३३]

(५) स्वर्गतिप्राप्तिः

प्राणी स्वकर्मानुसारं मनुष्यदेवादिगतिषु परिभ्रमन्सुखदुःखादिकं चानुभवति। भाविगतिप्राप्तेः पूर्वं स पूर्वगतित्यागं कृत्वा अन्तराभवं (Intermediate) सूक्ष्मशरीरेणानुभवति। तस्याकारो बालकस्य (पञ्चवर्षीयस्य षड्वर्षीयस्य वा) इव वर्णितः। स्वर्गतिमनुप्राप्स्यमानानामपि मध्यवर्तिनीयमवस्था स्वीकृता। रूपधातुलोके समुत्पत्स्यमानाः प्राणिनो मध्यवर्तिन्यामवस्थायां वस्त्रयुक्ताः कामधातुलोके समुत्पत्स्यमानास्तु प्रायो नग्नास्तिष्ठन्ति।[३४]

पुण्यकर्मभिः स्वर्गतिः प्राप्यते। पुण्यरहितानां देवलोकगमनं दुष्करमेव।[३५] शीलवन्तः[३६] पितरोः सेवकाः[३७] बौद्धधर्ममंगीकुर्वाणाः[३८] दानादिविविधलोकोपकारिकृत्यानुष्ठानपराः[३९] स्वर्गतौ मोदन्ते।

---

३१. द्र० दिव्यावदान, १९३

३२. महायानसूत्रसंग्रह, १८·१

३३. अङ्गुत्तरनिकाय, ३·७७; दीघनिकाय २·८८,

३४. मेनुअल आफ बुद्धिस्ट फिलासफी, पृ० ७६,

३५. न वै कदर्याः देवलोकं व्रजन्ति। (धम्मपद, लोकवर्ग, ११)

३६. विसुद्धिमग्ग, प्र० परिच्छेद, शीलनिर्देश, पृ० १२,

३७. अवदानशतक, चतुर्थवर्ग, मैत्रेयकन्यककथा, पृ० ८७-८८,

३८. सुत्तनिपात, १·३९ (१·४·९),

३९. द्र० विमानवत्थु

देवलोके कल्पद्रुमाः अन्यानि च परमसुखसाधनभूतानि वस्तूनि वर्तन्ते,[४०] येषामुपभोगो देवैः क्रियते । तिलोत्तमादिसहस्राप्सरसश्च देवान्मोदयन्ति ।[४१]

(६) ब्रह्मादिदेवाः

यद्यपि बौद्धपरम्परायां जगत्सर्जकस्य अस्तित्वं न स्वीकृतम्, तथापि ब्रह्मादिदेवानामस्तित्वे न बौद्धानां विमतिः ।[४२] महात्मा बुद्धोपि स्वपूर्वजन्मसु विंशतिवारं शक्रः, चतुर्वारं च ब्रह्मा बभूवेति वर्ण्यते ।

वैदिकपौराणिकदेवैः सह बौद्धाभिमतदेवानां साम्यं वैषम्यं च पृथक् शोधविषयभूते इति विरम्यते ।

---

४०. बोधिचर्यावतार, २·४,

४१. महायानसूत्रसंग्रह, १८·१,

४२. द्र० विसुद्धिमग्ग, प्र० परिच्छेद, शीलनिर्देश, पृ० ४९, दीघनिकाय, ३·१·११ (केवट्टसुत्त)

श्रीमन्महाभारते कर्णचरितम्

—प्रा० वि० वेङ्कटाचलम्

अर्धं वपुः काञ्चनगौरशोभं
चार्धं हिमानी धवलोज्ज्वलाभम् ।
शुभ्रं यथा सामि विरक्तमभ्रं
प्रत्नं महः प्रेमनिकेतनं नः ॥

वीणाक्वणन्मधुरिमौघविमिश्रगाना,
दिक्षु स्फुरध्दवलिमोज्ज्वलमञ्जुलाभा ।
वाणी ममाङ्कुरयतु स्मितसुप्रभाभिः,
वाग्बन्धमर्थपदरीतिरसप्रकाशम् ॥

कर्णः पूर्णधनुष्मान् वारयतु प्रत्यूहव्यूहं मे ।
अर्थिजनकल्पशाखी दद्याद्विमलं च पदबन्धम् ॥

प्राकृतो लोकः शश्वत्प्रकृतिमहतां पुरुषधौरेयाणां पन्थानमनुसरति, न क्वचित् इदं प्राथम्येन अनितरचुम्बिते नूत्ने वर्त्मनि पदं प्रक्षिपति इति नैसर्गिकी जगत्प्रकृतिः ।

[मद्रपुरीसंस्कृतशालायां प्रतिवर्षं प्रवर्तमानायाः महाभारतनिबन्धलेखनस्पर्धायाः कृते समार्पिपमहं निबन्धमिमं १९४६ वर्षे । तदात्वेऽहमासं पूर्वोक्तविद्यास्थानेऽन्यतमः छात्रेषु । छात्रदशायां लिखितेऽस्मिन् निबन्धे सम्प्रति पुनः पठ्यमाने यद्यपि तत्र तत्र शब्दाश्चार्थाश्च भूयिष्ठमरुन्तुदप्राया इव नैकधा संशोधनाय निर्बध्नन्ति मतिं, तथापि येन रूपेण निबन्धः समर्पितोऽभूत् तेनैव रूपेणास्य प्रकाशनं युक्तरूपमिति धिया शुशुत्साकण्डूतिं स्वलेखन्याः प्रयत्नतः प्रतिरुध्य प्राक्तनेनैव रूपेणायमत्र प्रस्तूयते । यदि नाम महाभारतनदीष्णानां शब्दार्थविन्यासशौण्डानां पण्डितानामिह शब्दप्रयोजने अर्थ-मार्गे वा क्वचित् ईषदपरिपक्वमिव, क्वचित् प्रामादिकमिव वा प्रतिभायात् तत्र बालच्छात्रान् प्रति सहजसुलभा अनुकम्पा धारणीयेति सप्रश्रयप्रार्थनयेदमुपह्रियते ।

—लेखकः]

इममेव सार्वजनीनं सार्वकालिकं, सार्वदैशिकं शाश्वत-विश्वस्वभावमालक्ष्योपचिक्षेप भगवान् गीतासु—"यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः। स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥" —इति। 'वर्त्म कर्षतु पुरः परमेकः तद्गतानुगतिको न महार्घः' इति चेममेवार्थमुद्गिरति रसपुष्कला गूढार्थगम्भीरा 'विद्वदोषधम्' इति महीयमाना श्रीहर्षकविताधोरणी। इमामेव सार्वदिकलोकप्रकृतिं मनसिकृत्य दीक्षिततल्लजाः सोपहासं बभाषिरे—

"गतानुगतिको लोको न लोकः पारमार्थिकः।
सेतौ सैकतलिङ्गेन नष्टं मे ताम्रभाजनम्॥"—इति।

एवं स्थिते पुण्यपीयूषपूर्णानां महतां चरितस्य श्रावणेन, तद्गुणोत्कर्षप्रशंसनेन, तत्स्वभावविमर्शनेन च गतानुगतिकस्य लोकस्य निरतिशयफलसिद्धौ कः सन्दिग्धे? सङ्कीर्तितानि च श्रीमद्भागवते महच्चरितसुधास्वादप्रयोजनानि भगवता व्यासेन —

"तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहम्।
श्रवणमङ्गलं श्रीमदाततं भुवि गृणन्ति ते भूरिदा जनाः॥"

इति गोपाङ्गनावदननलिननिर्गतेन श्लोकरत्नेन। तदधुना विरलकिल्बिषकलुषितस्यापि प्रशंसापात्रभारतकथापात्रेष्वन्यतमस्य शूरमूर्धन्यस्य पण्डितप्रवरस्य वाग्मितल्लजस्य दानशौण्डस्य कर्णस्य स्वभावविमर्शनाय विविधविचित्रसन्दर्भगर्भं बहुलसरलनीतिशबलं तच्चरितमाकलयामः।

तृणीकृतामञ्जुप्रपञ्चपुञ्जस्य वदान्यवल्लभस्य, थूत्कृतचण्डगाण्डीवस्य धीरावतंसस्य, कर्णस्येदं अमेयविस्तर चरितं, गिरिनदीपयःपूर इव विभिन्नप्रस्थानं वरीवर्ति। एकत्र पितरौ प्रत्यस्य विनयादयः प्रतिभान्ति पुत्रगुणाः, अन्यत्र पुत्रं प्रति वात्सल्यादयः प्रतीयन्ते पितृगुणाः, परत्र जायां प्रति प्रेमादयः प्रणीयन्ते भर्तृगुणाः, अपरत्र गाम्भीर्यादयः प्रस्तूयन्ते राजगुणाः, बहुत्र च वदान्यत्ववाग्मित्वसौहार्दकार्तज्ञ्यशौर्यधैर्यादयः प्रपञ्च्यन्ते मर्त्यसाधारणगुणाः। तदिह सङ्कीर्णताबाधार्थं स्फटिकस्फुटबोधाय च तत्स्वभावविशेषाः तत्तदुपाधीन् पुरस्कृत्य विविच्य समीक्षिष्यन्ते। तदेवं पितृपुत्रभर्तृभूपालमनुष्यत्वाख्यैरुपाधिभिः कर्णस्वरूपस्य पञ्चधा व्यवस्थापनेन, प्रपञ्चसर्गे हिरण्यगर्भ इव, कर्णचरितप्रपञ्चेऽस्मिन् पञ्चीकरणसरणिमेनां शरणीकुर्मः।

वीररसपरिप्लुते रणाङ्गणकथाप्रधाने पितृपुत्रादिगुणवर्णनस्य न स्थानं, इति शङ्का तु न स्थाने। सर्वज्ञकल्पेन हि भगवता व्यासेन चतुरमतिना तत्तत्सन्दर्भानुगुणमेव कृत्स्नाः स्त्रीपुरुषधर्माः कौशलेन संयोजिता इत्यतिरोहितमाम्नात-महाभारतानाम्। अभिहितञ्च तत्रैव —

"धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्॥" इति।

न नूनमस्ति लोकस्वभावः कश्चन यं सर्वपथीनमतेर्भगवतो व्यासस्य सर्वङ्कषं प्रतिभानचक्षुर्नाद्राक्षीत् । विश्वजीवातुस्तत्कृतिर्वा नास्प्राक्षीत् । अत एव 'व्यासोच्छिष्टं जगत्सर्वं' इति भारतभावदीपे नीलकण्ठोल्लिखितं वृद्धवचन-मप्यञ्जसा कल्पते । (अत्रैव व्यासपदस्य स्थाने बाणनाम्नः ऊहेन इदमेव वचनं "बाणोच्छिष्टं जगत्सर्वं" इत्यन्यथाकृत्य आत्मसाच्चक्रुर्बाणरक्षकाः इति प्रतिभाति। सर्वथा त्विदं वचनं न तथा बाणमुपसर्पति, यथा भगवन्तं सर्वविदं व्यासम् । तत्ता-दृशेन व्यासवचोभङ्गीमहिम्नैव धृतराष्ट्रः पुत्रवात्सल्यस्य प्रथमसोपानमधितष्ठौ । युधिष्ठिरः पुत्रगुणानां परमसीमानम् आचक्राम, पतिव्रतावतंसा द्रौपदी च पत्नीगुणाना-मुत्तमश्रेणीमारुरोह । तस्मात् रणाङ्गणकथाप्रस्तावे पितृपुत्रादिधर्मप्रपञ्चो न साध्व-ञ्चति इति शङ्का न विचारक्षमा ।

तदेवं महाभारते कर्णस्य पितृभर्त्रादिगुणानामाविष्कारो व्यासप्रतिभानवैचि-त्र्यस्य भूषणमिति तस्मिन्नौचित्यकथैव नावतरति । तत्र च कर्णे पितृगुणान् भर्तृगुणान् राजगुणांश्च ध्वनिपथप्रगल्भः कविमतल्लिका भगवान् व्यासः क्वचित्क्व-चिल्लेशतः समसूसुचत्, पुत्रगुणांस्तु किञ्चिदिव विस्तरेणाचीकथत्, मनुष्यसाधारण-गुणान् शौर्यवदान्यतादींस्तु अतिवेलमुत्कर्षेण अपूपुषदिति स्थितिः । अतश्च सूची-कटाहन्यायेन प्रथमतः तस्य पितृगुणा भर्तृगुणा राजगुणाश्च विमृश्यन्ते ।

तत्रादौ विचारसरणिमनुप्रविशति पिता कर्णः । पश्यतः एव कर्णस्य निजघ्ने तत्पुत्रो वृषसेनः सव्यसाचिना । तदीक्षणमात्रेण च युगपत्कर्णहृदयं प्राविशतां क्षात्र-तेजः समुचितः क्रोधः, पुत्रप्रेमानुरूपः शोकश्च । तथा चोक्तं "रथं रथेनाशु जगाम रोषात् किरीटिनः पुत्रवधाभितप्तः" इह 'पुत्रवधाभितप्तः' इति पुत्रशोकमुल्लिखन् कविर्ध्वनयति पुत्रवात्सल्यभरं कर्णस्य । पुनरपि सर्गान्तरे कर्णहृदयक्षोभमुपक्षिपन् वर्णयति मुक्तकण्ठं तस्य पुत्रस्नेहम् । यथा—

"वृषसेनं हतं दृष्ट्वा शोकामर्षसमन्वितः ।
पुत्रशोकोद्भवं वारि नेत्राभ्यां समवासृजत् ॥"

इति तादृशधीरप्रकृतिर्वज्रकठोरान्तरङ्गः कर्णोऽपि पुत्रशोकमूर्च्छितः मध्ये रणाजिरं ससर्ज वाष्पधारामात्मजोत्कण्ठया, इति कथं ब्रूमस्तस्य पुत्रप्रेमातिशयम् । तदेवं निरूपितः पिता कर्णः ।

अथ भर्ता कर्णः समीक्ष्यते । अनुश्रूयते किल पुराविदां वचनं भूपालाः प्रचुर-पत्नीका इति । "राजानो बहुवल्लभाः श्रूयन्ते" इति च स्मृतिकल्पा कालिदासभारती । दशरथान्तःपुरमलञ्चक्रिरे तरुण्यस्त्रयस्त्रिंशदिति रामायणचिन्तकाः । (सहस्राणां षष्टिरिति तु जरठाङ्गनानामविच्छिन्नः कश्चित् सम्प्रदायः ।) असकृच्चोल्लिख्यते गोष्ठीषु परिग्रहबहुत्वेन विषण्णस्य राज्ञः समवस्थावर्णनात्मकं पद्यमेकं, यथा—

"स्नाता तिष्ठति कुन्तलेश्वरसुता वारोऽङ्गराजस्वसुः,
द्यूते रात्रिरियं जिता कमलया देवी प्रसाद्याद्य च ।
इत्यन्तःपुरसुन्दरीः प्रति मया विज्ञाय विज्ञापिते,
देवेनाप्रतिपत्तिमूढमनसा द्वित्राः स्थितं नाडिकाः ॥" इति ।

तामिमां राजसाधारणीं परिपाटीमनुरुन्धानः कर्णोऽपि बह्वीरङ्गनाः पर्यग्रहीत् । आह स्म किल कर्णवधं प्रतिजानन् पार्थः पार्थसारथिं—"द्रष्टासि ध्रुवमद्यैव विधवाः कर्णयोषितः ।" इति । अन्यच्च समराङ्गणे गतासून् पतीन् अनुशोचन्तीरबलाः समीक्षमाणा गान्धारी कृष्णमभाणीत् कर्णं प्रकृत्य —

"समेताः पुरुषव्याघ्रं निहतं शूरमाहवे ।
प्रकीर्णमूर्धजाः पत्न्यो रुदत्यः पर्युपासते ॥" इति ।

स्वयमेवावादीच्च उद्योगपर्वणि कर्णः कृष्णेन रहस्सङ्कथायाम् —

"भार्याश्चोढा मम प्राप्ते यौवने तत्परिग्रहात् ।
तासु पुत्राश्च पौत्राश्च मम जाता जनार्दन ॥" इति ।

एवमर्जुनगान्धारीवचनाभ्यां स्ववचनाच्च कर्णस्य बहुवल्लभत्वं तावन्निश्चप्रचं निश्चिनुमः । "आवाहाश्च विवाहाश्च सह सूतैर्मया कृताः" इति ब्रुवाणस्य तस्यैव मुखेन तासां सूतवंशप्रभवत्वं च सेत्स्यति । यद्यपि शृङ्गग्राहिकया तत्संख्यानिर्णयाय प्रमाणं किञ्चिन्नोपलभामहे, तथापि कपिञ्जलाधिकरणन्यायेन तिसृभिः पत्नीभिरवश्यं भवितव्यमेव । सम्भाव्यन्ते च ततोऽप्यधिकाः । तत्र पुनर्वृषसेन—जननी प्रधानं स्थानमभजत । अत एव सर्वासां निर्देशानन्तरं तत्समवस्थां पृथङ्निरूप्य अनुशोचति स्म गान्धारी —

"पश्य कर्णस्य पत्नीं त्वं वृषसेनस्य मातरम् ।
लालप्यमानां करुणां रुदतीं पतितां भुवि ॥" इति ।

सा च प्रथमं विस्रम्भपात्रमासीत् कर्णस्य, यतस्तस्यां सर्वगोपनीयं शापवृत्तान्तरहस्यमपि विस्रब्धं निचिक्षेप सः । अत एव विप्रलापं स्मारं स्मारं विललाप बाष्पगद्गदं सा तपस्विनी,—"आचार्यशापोऽनुगतो ध्रुवं त्वां यदग्रसच्चक्रमिदं धरित्री"—इति । इदमप्यस्याः प्राथम्यं प्राधान्यं च प्रमाणयति । कर्णस्य प्रधानवल्लभायास्तस्या बाल्यचरिते विवाहवृत्तान्ते वा सर्वथा नैभृत्यमवलम्बते महाभारतम् । तस्या नाम निवेदनेऽपि मूकीभूतं महाभारतमितीषदद्भुतं प्रतिभाति ।

स्त्रीपर्ववर्जं न क्वचिदानिनाय महाभारतकथारङ्गं कर्णदारान् व्यासः, न वा तैस्सह तस्य संलापान् क्वचिदुल्लिलेख । तेन विस्मृतिकुहरेषु सन्ततगूढाः कर्णस्य भर्तृगुणाः । परन्तु भार्यासु पुनः तस्य ववृते रागानुबन्धः, इत्यत्र—"तासु मे हृदयं कृष्ण सञ्जातं कामबन्धनम्"—इत्युद्योगपर्ववाक्येन एकेनैव तदीयेन सन्तोष्टव्यं सहृदयैः । तदेवं निरूपितो भर्ता कर्णः ।

अथावतरति विचारपथं राजा कर्णः । अतिस्तोकेन मन्दप्रभेणैवालोकेन कर्णस्य राजगुणान् प्रकाशयति महाभारतम् । तेनाधुना प्रायेण दुरुपलम्भाः सञ्जाताः । अस्त्रपरीक्षारङ्गे कर्णं सूतजं ज्ञात्वा भीमादयः तमधिचिक्षिपुः—

> **अङ्गराज्यं च नार्हस्त्वमुपभोक्तुं नराधम ।**
> **श्वा हुताशसमीपस्थं पुरोडाशमिवाध्वरे ॥''**

इत्यादिभिः परुषवचनैः । तान् प्रत्याचक्षाणः प्राह सुयोधनः—

> **सकुण्डलं सकवचं सर्वलक्षणलक्षितम् ।**
> **कथमादित्यसदृशं मृगी व्याघ्रं जनिष्यति ॥**
> **पृथिवीराज्यमर्होऽयं नाङ्गराज्यं नराधिपः ।''** इति ।

एवञ्च भूपलक्षणभूषितेन मनोरमेण गम्भीरेण भ्राजिष्णुना वपुषा राजमुद्रामुद्रित इव बभ्राज कर्णः, तेन च तस्य राजावतंसोचितमाकृतिगाम्भीर्यमासीदित्यवसीयते । "प्रांशुकनकतालाभः" इति सुवर्णमयतालवृक्षेण तोलनमपि तस्य शरीरगाम्भीर्यमेव द्योतयति । तत्कृतराष्ट्रपरिपालनकथने तु न क्वचित्परिश्रान्तं व्यासेनेति, तस्य प्रजारञ्जनदण्डवितरणादिषु नृपगुणेषु मूका वयं सम्प्रति । अन्ये शौर्यदातृत्वादयस्तु राजगुणाः परस्तात् समीक्षिष्यन्ते, इति नाधुना विस्तार्यते । तदेवं निरूपितो भूपः कर्णः ।

अथ चर्चापथमवतरति पुत्रः कर्णः । "मातृदेवो भव । पितृदेवो भव" इति प्रभुसम्मितः श्रुत्यन्तनिर्घोषः तावदविकलमात्मलाभं लेभे विनयोज्ज्वले पितृभक्तिनिकेतने कर्णे, न यथा सम्प्रतितनेषु भूयस्सु पुत्रपाशेषु ये किल श्रुतिगतं बहुव्रीह्यर्थं तत्पुरुषीकर्तुमुद्युञ्जते । अत एवादिपर्वणि परीक्षारङ्गे अस्त्रशस्त्रवैदग्ध्य-प्रदर्शनेन जिष्णुतुलामधिरूढोऽपि, तन्महिम्नैव दुर्योधनप्रीत्या लब्धराज्याभिषेकोऽपि जराजीर्णं पितरमालोक्य, झटिति धनुः प्रक्षिप्य दण्डवत्प्रणनाम कर्णः । तमिमं सन्दर्भमित्थं व्यासो जग्रन्थ —

> **"ततः स्रस्तोत्तरपटः सप्रस्वेदः सवेपथुः ।**
> **विवेशाधिरथो रङ्गं यष्टिप्राणो ह्वयन्निव ॥**
> **तमालोक्य धनुस्त्यक्त्वा पितृगौरवयन्त्रितः ।**
> **कर्णोऽभिषेकार्द्रशिराः शिरसा समवन्दत ॥''** इति ।

इह प्रथमश्लोकेन अधिरथस्य जराभिभूतं स्वरूपं चित्रेणेव अपरोक्षम् आदर्शयन्, तादृशे जराशिथिलेऽपि पितरि कर्णस्य प्रश्रयवर्णनेन परमुत्कर्षं नयति तत्पितृभक्तिम् । पितृदर्शनमात्रेण सद्यस्तस्य धनुस्त्यागोऽपि तां पोषयति । 'अभिषेकार्द्रशिरा' इति तस्य तदानीन्तनीमुन्नतिमुपक्षिपन्, तादृशेन शिरसैव प्रणामकीर्तनेन ध्वनिप्रगल्भो भगवान् व्यासः, उत्सेकभूम्नः समुचिते कालेऽप्यनुत्सिक्तः पितरि कर्णः इति साधु प्रथयति ।

एवमुद्योगपर्वणि कृष्णेन पाण्डवपक्षकक्षीकरणाय प्रचोदितः कर्णः, स्वस्मिन् पुत्रनिर्विशेषां प्रीतिं कुर्वाणयोः पोषकपित्रोस्त्यागमनुचितं मीमांसमानः, श्रीकृष्णवचनं तिरस्कुर्वन् स्वस्य मातृस्नेहं पितृभक्तिञ्च मुक्तकण्ठं प्रकाशयति स्म। तत्रेदं कर्णवाक्यम् —

"सा मे मूत्रं पुरीषञ्च प्रतिजग्राह माधव।
तस्याः पिण्डव्यपनयं कुर्यादस्मद्विधः कथम्॥

स हि मे जातकर्मादि कारयामास माधव।
शास्त्रदृष्टेन विधिना पुत्रप्रीत्या जनार्दन॥" इति।

बाल्यकौमारयोरात्मानं मातैव पुपोष, पितैव सञ्चस्कार, इति न जातु विसस्मार कर्णः, अत एव च तयोर्भक्तिमविकलां बबन्ध। अनेन निरुपाधिकेन स्नेहेन द्रवीभूतान्तरङ्गा तन्मातापि तस्मिन्नधत्त निरतिशयां प्रीतिम्। अत एव स्त्रीपर्वणि कर्णवधदूयमानमानसां तां न विस्मरति व्यासो वर्णयितुम् —

"सा वर्तमाना पतिता पृथिव्यामुत्थाय दीना पुनरेव चैषा।
कर्णस्य वक्त्रं परिजिघ्रमाणा रोरूयते पुत्रवधाभितप्ता॥"

अत्र केचिदेवं आक्षिपेयुः— पूर्वं कृष्णमुखेन पश्चात्कुन्तीमुखेन च पृथाभानू स्वपितरौ ज्ञात्वापि, तद्वचनं तृणाय मत्वा तयोः पाण्डवपक्षस्वीकाराज्ञां विश्रब्धं तिरश्चकार खलु कर्णः। एवं स्थिते जीवनप्रदात्रोः पित्रोः प्रधाननिदेशप्रतिक्षेपकोऽयं वृथापक्षपातेन कथङ्कारमारोप्यते समुच्छ्रिते सत्पुत्रपुण्यपीठे—इति। सत्यं प्रचिक्षेप कर्णः पित्रोराज्ञाम्। परन्त्वयं प्रतिक्षेपस्तन्न दूषयति, अपि तु भूषयति। स्वामिद्रोहपरिहाराय, कृतघ्नतापरिवर्जनाय, सत्यसंरक्षणाय च कर्णस्तत्याज पित्राज्ञां, न तु पितृगौरवलोपेन, इति करबदरवत् स्फुटं स्फोटयति कुन्तीसंवादसर्गः। पुत्रवात्सल्यमोहेन खलु क्वचिदपथ्यमधर्म्यं चाप्युपदिशन्ति पुत्रेभ्यः पितरः। न च तादृशां प्रीतिमुग्धानामपि वचनमेकान्ततोऽनुसरन्ति सत्पुत्राः। तथा च सत्पुत्राणामादर्शो दाशरथिरपि—

अहं राघव कैकेय्या वरदानेन मोहितः।
अयोध्यायास्त्वमेवाद्य भव राजा निगृह्य माम्॥

इति पुत्रशोकावस्कन्दितहृदयस्य दशरथस्य आत्मप्रधर्षणेन राज्यग्रहणोपदेशं नानुससार, नापि पुत्रप्रेमविह्वलायाः कौसल्याया वनानुयानमनुमेने। एवं पुत्रप्रेममोहाच्छन्नतया असत्यतां कृतघ्नताञ्च अपश्यन्त्याः कुन्त्या निदेशोल्लङ्घनं कर्णस्य सत्यदीक्षारक्षणबद्धकक्षतामेव सन्धुक्षयति, न तु तस्मिन् कलङ्कपङ्कमङ्कयति। व्यासोऽप्येवमेवाभिप्रैयाय इति स्फुटीभवति प्रत्याख्यान-ग्रन्थविभावनेन। तत्रायं श्लोकः —

एवमुक्तस्य मात्रा च स्वयं पित्रा च भानुना ।
चचाल नैव कर्णस्य मतिः सत्यधृतेस्तदा । इति ।

इह च भगवान् व्यासः कर्णः दुष्पुत्रतामापादयतां दुष्पूर्वपक्षं चिखण्डयिषुरिव सत्यधृतेरिति विशेषणेन हेतुगर्भेण तं भूषयामास । इदमत्र आकूतं भगवतो व्यासस्य— यतः कर्णः सत्यप्रतिष्ठः, तेन तन्मतिर्न चचाल; तथा च सत्यरक्षणपक्षपातेन कृतोऽयं प्रतिक्षेपो न कर्णं तुषादपि दूषयति— इति। तस्मात् कर्णः कुन्तीवचनोल्लङ्घी न सत्पुत्र इति न श्रद्धेयं वचनम् । हृदयपीठे पृथाप्रतिमामजस्रमर्चयामास कर्ण इति तु परमार्थः । अत एव कर्णकुन्त्योः परस्परस्नेहबन्धमतिवेलमुत्कर्षमनैषीत् अमरचन्द्रसूरिर्बालभारतमहाकाव्ये । कुन्तीं मातरं प्रत्यभिज्ञाय "रोमाञ्चितस्तीर्थशतानि जानन् पादानि कर्णोऽथ ननाम मातुः" इति तत्रत्यः कश्चित् ग्रन्थसन्दर्भ इति दिक् । तदेवं निरूपितः पुत्रः कर्णः ।

अथाधुना कर्णस्य तत्तादृशाः पुरुषधौरेयोचिता गुणविशेषा विभज्यन्ते, यन्महिम्नैव धूर्तधार्तराष्ट्रपक्षप्रधानस्तम्भायमानोऽप्ययं महापुरुष-प्रथमसोपानपङ्क्तौ साधुभिः सुप्रतिष्ठितश्चकास्ति, यत्प्रभावेण च विरलकलङ्कपङ्किलोऽप्यसौ पुरुषधुरन्धरेषु परिगणितो निरतिशयसुषमापुषा यशोवपुषा भ्राजते सम्प्रति । तत्रेदं वृद्धानामनुशासनं, काले काले भुवि प्रजनिष्णून् अतिमानुषप्रधानान् अतिलोकप्रकृतीन् पुरुषश्रेष्ठान् प्रकृत्य यथा—

"शतेषु जायते शूरः सहस्रेषु च पण्डितः ।
वक्ता शतसहस्रेषु दाता भवति वा न वा ॥"

इति । इह परिसंख्यातैश्चतुर्भिर्गुणैरपि न परिहीयते कर्ण इति साम्प्रतं निरूपयामः ।

प्रथमतस्तावदाहवशूरस्य तस्य शौर्यं प्रकृत्य किञ्चिद् ब्रूमः । परीक्षारङ्ग एव कर्णस्य महाभारतकथायां प्राथमिकः प्रवेशः । तमिमं रङ्गप्रवेशोन्मुखं कर्णं वर्णयन्नाह भगवान् व्यासः —

"द्वारदेशात्समुद्भूतो माहात्म्यबलसूचकः ।
वज्रनिष्पेषसदृशः शुश्रुवे भुजनिस्वनः ॥
दीर्यन्ते किन्नु गिरयः किं स्विद् भूमिर्विदीर्यते ।
किं स्विदापूर्यते व्योम जलधाराघनैर्घनैः ॥
रङ्गस्यैवं मतिरभूत् क्षणेन वसुधाधिप ।" इति ।

सूचयतीदं शूरजनभूषणं वज्रकठिनं शरीरसंहननं कर्णस्य । रङ्गप्रवेशे च कर्णो बभ्राज—"पादचारीव पर्वतः" । तथा च कर्णमधिकृत्य "वज्रकायः शूरमूर्धन्यः" इत्येव प्राथमिकः संस्कारः समुदेति कथायाम् ।

कर्णस्य शौर्यगुणस्तावत् कृत्स्नं द्रोणपर्व कर्णपर्व च व्याप्नोतीति तं साकल्येनेह प्रस्तोतुं, रणाङ्गणे तस्य शूरचेष्टितानि विवरीतुं वा नोद्यम्यते । अतश्च द्रोणपर्वणि

भीमयुद्धे घटोत्कचयुद्धे, तथा कर्णपर्वणि अर्जुनयुद्धे चास्य शौर्यं पौष्कल्यपरमकाष्ठामाससादेति निर्देशमात्रेण सन्तोष्टव्यम् ।

तत्र कर्णपराक्रमनिर्धारकाणि प्रमाणानि सम्प्रत्युदाह्रियन्ते । केवलं कर्णबाहुबलमुपजीव्य युद्धे प्रावर्तिष्ट सुयोधनः, कर्णविस्रम्भमात्रेण च कृष्णस्य सन्ध्युपदेशं तूलायामंस्त । प्राह च जयद्रथवधखिन्नो दुर्योधनः —

''यमुपाश्रित्य सङ्ग्रामे कृतः शस्त्रसमुद्यमः ।
स कर्णो निर्जितः संख्ये हतश्चैव जयद्रथः ॥

यस्य वीर्यं समाश्रित्य शमं याचन्तमच्युतम् ।
तृणवत्तमहं मन्ये स कर्णो निर्जितो युधि ॥'' इति ।

असकृच्च पितरं सोरस्ताडम् अब्रूत सुयोधनः, — कर्णदुःशासनसाहाय्यमात्रेण पाण्डवान् पञ्च पञ्चतां नेष्यामीति । किञ्च अर्जुनादप्यधिकतरं मेने कर्णं सुयोधनः इत्येतदेवालं कर्णपराक्रमनिर्णयाय । अत्रेदं दुर्योधनमुखनिर्गलितं वचनमादिपर्वणि—

'अजेयो ह्यर्जुनः सङ्ख्ये पृष्ठगोपे वृकोदरे ।
तमृते फाल्गुनो युद्धे राधेयस्य न पादभाक् ॥'' इति ।

तदिदं सर्वं साधु प्रख्यापयत्युज्ज्वलं कर्णपराक्रमम् । अन्यच्च कर्णः किल जैत्रयात्रायां असंख्येयान् नृपतीन् दुर्योधनस्य कृते दमयामास, तथा काशीपुरे दुर्योधनस्य कन्यार्थं स्वयमसहायोऽप्ययं महाधानुष्कः सङ्ख्यापथातीतान् भूपान् प्राधर्षयत्, तथा युद्धदुर्मदं जरासन्धं युद्धेन पर्यतोषयत् । इमे एव वृत्तान्ताः प्रमाणीकृताः कर्णपराक्रमप्रतिष्ठापनाय भगवता नारदेन शान्तिपर्वणि, भगवता भीष्मेण च । किञ्च भीष्ममरणोत्तरं कर्णमेव सस्मरुः सर्वपार्थिवाः, मेनिरे च भीष्मोपमं कर्णम् । तत्रायं पठ्यते श्लोकः —

''कर्णं हि कुरवोऽस्मार्षुः स हि देवव्रतोपमः ।
चुक्रुशुः कर्ण कर्णेति तत्र भारतपार्थिवाः ॥'' इति ।

तथा दुर्योधनादयोऽपि सागरं तरीतुकामाः प्लवमिव कर्णमेव मनस्यकार्षुः । तथा भीष्मपातनानन्तरं युद्धाय समुपस्थितं कर्णं दृष्ट्वा सैनिकाः हर्षस्य परमसीमानं पस्पृशुः तमिमं प्रहर्षकोलाहलं सचमत्कारं चित्रयति व्यासप्रतिभा —

''क्ष्वेडितास्फोटितरवैः सिंहनादरवैरपि ।
धनुःशब्दैश्च विविधैः कुरवः समपूजयन् ॥''

कर्णदर्शने च शशाम भीष्मव्यसनं सर्वेषाम् इत्यहो ! कर्णस्य शौर्यगरिमा । तदेतत्सर्वं निदर्शयति, कर्णो निस्तुलो धनुर्धरो, निरुपमः पराक्रमीति । अत एव

शूरपुङ्गवो भीष्मोऽप्यगदीत्—

"इष्वस्त्रे चास्त्रसन्धाने लाघवेऽस्त्रबले तथा ।
सदृशः फाल्गुनेनासि कृष्णेन च महात्मना ॥" इति ।

"स बलं भीमसेनस्य फाल्गुनस्य च लाघवम्" इति चोद्घोषयामास भगवान्नारदः । अथवा किं बहुना । असहायो जिष्णुरपि नाक्षमत खलु शूरमूर्धन्यस्य तस्य निपातने । अत एवेन्द्रवञ्चनया अपहृतवर्मकुण्डलं, भीष्मशल्यतेजोवधेन न्यक्कृत-पराक्रमं, गुरुशापेन नष्टास्त्रशक्तिं, विप्रशापेन धरित्रीग्रस्तरथं तं शूरशेखरं कुन्ती-वरदानकृष्णमायासाहाय्येनैव अर्जुनः पातयितुं शशाक । यदि नामाखण्डलो नाहरिष्यत् वर्मकुण्डले, नानङ्क्ष्यदस्त्रबलं गुरुशापेन, न रथमग्रसिष्यद् धरित्री विप्रशापेन, नाग्रही-ष्यत् पृथा चतुर्णामभयं पाण्डवानां, नाभविष्यच्च मायाविनः कृष्णस्य साहाय्य-बलं, कीदृशी गतिरभविष्यदर्जुनस्य, इति शान्तं पापम् ! अत एव 'षड्भिः कर्णो निपातितः' इति सुप्रथितं वचनमप्यञ्जसा कल्पते । अयमेकः कर्णनिपानवृत्तान्त एवा-लम्भूष्णुः कर्णपराक्रमस्य इयत्ता निर्धारणाय । कर्णविनिपातगाथाश्रवणे च "ईदृशो विनिपातोऽपि जायते परमाद्भुतः" इति भवभूतिवचनमेव मनस्युपारोहति । तदेव कर्णो निस्तुलो धनुर्धरः, निरुपमः पराक्रमी चेति त्रिःसत्यं प्रतिजनीमः । सत्यं ! भुवनत्रयशूरेतिहासे सुवर्णाक्षरैः लिखिष्यन्ति कर्णचरितमैतिहासिकाः, आचन्द्रतारकं च स्थास्यति अमृतकीर्तिः शूरमूर्धन्यस्य ।

अथ परिगणितेषु चतुर्गुणेषु द्वितीयं पाण्डित्यं समालोच्यते । सूतान्वये लब्ध-पोषः कर्णः सूतोचितायां विद्यायां पुष्कलं पाण्डित्यमधिजगाम । तत्र—

योऽनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥"

इत्यादिधर्मशास्त्रघोषेण त्रैवर्णिकान्तःपातिनां प्रथमकर्तव्यं खलु कृत्स्नवेदा-ध्ययनं स्वशाखाध्ययनं वा । अतश्च ब्रह्मक्षत्रान्तरे जातः कर्णोऽप्यादौ वेदानध्यैष्ट । व्यक्तञ्चेदं उद्योगपर्वणि कुन्तीसंवादसर्गे । तत्रायं पठ्यते श्लोकः —

आत्मजस्य ततस्तस्य घृणिनः सत्यसङ्गिनः ।
गङ्गातीरे पृथाऽश्रौषीद्वेदाध्ययननिस्वनम् ॥" इति ।

"इष्टं च बहुभिर्यज्ञैः सह सूतैर्मयाऽसकृत्" इति च कृष्णं प्रति स्ववचनेना-प्यस्य वेदाध्ययनमभ्यूह्यते । न खलु वेदाध्ययनं विना यज्ञाचरणं सम्भवदुक्तिकम् । अत एव पूर्वमीमांसायां स्थपत्यधिकरणे निषादस्य वेदानधिकारिणोऽपि अपेक्षितवेदाध्या-पनं राद्धान्तितम् ।

अत्रेदं प्रसङ्गादभिधीयते—ब्रह्मास्त्रलिप्सया ब्राह्मणो भार्गवोऽस्मीति मिथ्या-वचनेन परशुरामम् उपसन्नः किल कर्णः । अस्त्रग्रहणोत्तरं च आमर्ककीटवृत्तान्तेन अस्य

छन्ने गुरुणा विज्ञाते, क्रुद्धं गुरुं प्रत्यात्मनो मिथ्याकथनं व्याचिख्यासुराह —

"पिता गुरुर्न सन्देहो वेदविद्याप्रदः प्रभुः।
अतो भार्गव इत्युक्तं मया गोत्रं तवान्तिके ॥" इति ।

एतत्पर्यालोचनेन चास्य वेदाध्यापयिता भार्गवगोत्रीयो ब्राह्मण इत्यनुमिनुमः। आचार्यनिद्राभङ्गभयेन उरुभेदनमप्यात्मनः सोढ्वा, लेशतोऽपि न चकम्पे कर्ण इत्यनेनैवास्य प्रभूता गुरुशुश्रूषणश्रद्धा महनीया गुरुभक्तिश्च स्पष्टं प्रतीयते। तदलमनेन प्रसङ्गानुधावनेन।

अधीतवेदः कर्णः उपवेदपरिगणिते धनुर्वेदेऽपि परमं प्रावीण्यमध्यगच्छत्। तादृशं खलु कर्णस्य शस्त्रकौशलमस्त्रवैदग्ध्यञ्च, येन परीक्षारङ्गे प्रेक्षकाः सर्वे तमर्जुनतुलं मेनिरे, यद्दर्शनमात्रेण दुर्योधनहृदयादर्जुनभयं अपचक्राम यदालोकनेन च युधिष्ठिरस्यापि "न कर्णतुल्योऽस्ति धनुर्धरः क्षितौ" इति मतिरुदियाय। तत्रायं ग्रन्थसन्दर्भः—

आग्नेयेनासृजद् वह्निं वारुणेनासृजत् पयः।
वायव्येनासृजद् वायुं पार्जन्येनासृजद् घनान् ॥
भौमेन प्राविशद् भूमिं पार्वतेनासृजद् गिरीन्।
अन्तर्धानेन चास्त्रेण पुनरन्तर्हितोऽभवत् ॥
क्षणात्प्रांशुः क्षणाद् ह्रस्वः क्षणाच्च रथधूर्गतः।
क्षणेन रथमध्यस्थः क्षणेनावतरन्महीम् ॥ —इत्यादि।

एवमस्त्रपाटवस्य परां कोटिमधिरुह्य, पूर्णघटकुक्कुटाण्डादीनामविचाल्य वेधनेन, भ्रमतो वराहस्य मुखेऽसंसक्तपञ्चबाणक्षेपेण, रज्ज्ववलम्बिनि चले गोविषणे एकविंशतिसायकखननेन च शस्त्रेषु निरुपमं हस्तलाघवं न्यदर्शयत्। यद्यप्यर्जुनं प्रकृत्यैवायं सन्दर्भः श्रूयते, तथापि "यत्कृतं तत्र पार्थेन तच्चकार महाबलः" इत्यतिदेशवाक्येन कर्णेऽप्युपपद्यते इत्यवधारणीयम्।

न केवलमेवं शस्त्रकुशलः कर्णः किन्तु शास्त्रकुशलोऽपि। स खलु तत्त्वदर्शिनां ज्ञानिनां यथावदुपासनेन "प्रणिपातेन परिप्रश्नेन सेवया" च श्रुत्यर्थविचारात्मकेषु शास्त्रेषु परिनिष्ठितां प्रतिष्ठामविन्दत। तत्रेदं भगवद्वचनमेव प्रमाणमुपहरामः। यथा—

उपासितास्ते राधेय ब्राह्मणा वेदपारगाः।
तत्त्वार्थं परिपृष्टाश्च नियतेनानसूयया ॥
त्वमेव कर्ण जानासि वेदवादान् सनातनान्।
त्वमेव धर्मशास्त्रेषु सूक्ष्मेषु परिनिष्ठितः ॥" इत्यादि।

मायाविना श्रीकृष्णेन पाण्डवपक्षस्वीकारप्ररोचनाय कृतं स्तुतिमात्रमिदम्, अतो न प्रमाणपदवीमुपारोहति, इति शङ्का तु न चारु, प्रतिवचने

"धर्मविद्धर्मशास्त्राणां श्रवणे सततं रतः" इति स्वयमभ्युपैति स्म कर्णः। "वेदाङ्गानि च सर्वाणि जजाप जपतां वरः" इत्यादिपर्वणि अंशावतारसर्गीयवचनेन वेदाङ्गपथेष्वपि विश्रृङ्खलं विचचार शेमुषी कर्णस्य। एवं कृष्णसंवादे रमणीयतमे रणयज्ञरूपके यज्ञीयमङ्गजातं कृत्स्नशः प्रतिपादयन् वाचकगात्रेषु रोमाञ्चसञ्चयमञ्चयन् प्रपञ्चयति श्रौतक्रियाकलापेषु आत्मनः कूलङ्कषं पाण्डित्यम्। तत्रैव शकुनादिनिमित्तपरिज्ञाने, मृगपक्षिविशेषाणां शोभनाशोभनलक्षणनिर्णये, स्वप्नतत्त्वावधारणे चात्मनो वैदग्ध्यमादर्शयन् निमित्तादिशास्त्रेषु परां वैदुषीमाविष्करोति। पुनरपि तत्रैव ज्योतिःशास्त्रपरिचयमप्यादर्शयति —

> **"प्राजापत्यं हि नक्षत्रं ग्रहस्तीक्ष्णो महाद्युतिः।**
> **शनैश्चरः पीडयति पीडयन् प्राणिनोऽधिकम्॥**
>
> **कृत्वा चाङ्गारको वक्रं ज्येष्ठायां मधुसूदन।**
> **अनुराधां प्रार्थयते मैत्रं सङ्गमयन्निव॥"** इत्यादिना।

तदेवं अधीतवेदः, धनुर्वेदनिष्णातः, वेदाङ्गेष्वधीती, धर्मशास्त्रकुशलः, वेदवादविदग्धः निमित्तशास्त्रप्रवीणः श्रौतक्रियाप्रगल्भः, ज्योतिःशास्त्राभिज्ञः कर्णो बहुश्रुतः सर्वपथीनमतिरखण्डितपाण्डित्यमण्डनश्चेति निस्सन्दिग्धं प्रतिजानीमः।

अथ तृतीयं वाग्मित्वं परीक्ष्यते। विरलविरलाः खलु धन्या जनास्तादृशाः, येषां सभायां प्रकृतिरविकृतम् अप्रकम्पञ्च तिष्ठति, मतिरमोघमनाविलं प्रसरति, जिह्वा चानाकुलं निष्प्रत्यूहं प्रवाहयति वाग्धाराम्। विचक्षणधिषणाभूषणानां निर्मलप्रतिभानप्रसाधनानां पण्डितप्रकाण्डानामपि खलु जिह्वा सभासु कुण्ठितप्रसरा भवति इति सर्वलोकव्याप्तोऽयं नियमः। तथा चाभाणकं—"कष्टं भोः प्रतिभावितोऽप्यधिसभं वाणी नवोढायते"—इति विपरीतं पुनरिदमासीत्कर्णस्य। तस्य खलु स्वभावतो वश्यवाचो वाणी सभायां उच्चैस्तरामेव शोभां अपुष्णात्, विशिष्टामेव शक्तिमविन्दत। तदिदं निर्दर्शितमादिपर्वणि पाण्डवान् प्रति भेदोपायदूषणेन दण्डोपायस्यैव औचित्यप्रतिष्ठापने, सभापर्वणि विकर्णन्यक्कारे, वनपर्वणि गन्धर्वपराभवखिन्नस्य प्रायोपवेशोद्यतस्य दुर्योधनस्य नगरनिवर्तनानुनये, उद्योगपर्वणि भीष्मप्रतिक्षेपे, द्रोणपर्वणि दुर्योधनं प्रति द्रोणदोषप्रत्याख्याने च। एषां समेषां विस्तरेण प्रतिपादनमिह दुःशकमिति स्थालीपुलाकन्यायेन दिङ्मात्रं प्रदर्श्यते।

प्रगल्भो वाग्मीव दुर्योधननिवर्तने विविधं पन्थानमनुवर्तते कर्णः। "शोकेन समेधते शोकः, अतः कृतं वृथाशोकेन" इत्यादौ लोकन्यायपुरस्करणेन, ततस्तस्य भ्रातृस्नेहसमुत्तेजनेन, अनन्तरम् —

> **"कर्तव्यं हि कृतं राजन् पाण्डवैस्तव मोक्षणम्।**
> **नित्यमेव प्रियं कार्यं राज्ञो विषयवासिभिः॥**

इति पाण्डवकृतपरित्राणस्यैव अन्यथा व्याख्यानेन, ततश्च प्रायोपवेशाश्रयेण

राज्ञामपहास्यत्वबोधनेन चानुनेतुं बहुधा प्रयतते। अन्ततश्च यक्षानुरूपो बलिरिति न्यायमाश्रित्य, अस्य नियतं पाण्डवासूयिनः तत्स्पर्धायास्तीक्ष्णकरणेनैव निवर्तनयत्नः सफलो भवेत् इत्यालोच्य अन्यं पन्थानमादृत्याह—

"पाण्डवे यानि रत्नानि त्वमद्याप्युपभुञ्जसे।
सत्त्वस्थान् पाण्डवान् पश्य न ते प्रायमुपाविशन्॥" इति।

तदिदं साधु निदर्शयति वाग्मिजनोचितं वचोवैचित्र्यं कर्णस्य।

अथ सकलवाग्मिलोकचुम्बितेयमपूर्वा सरणिः, यदेते प्राप्तकालेन दृष्टान्तेन आख्यानेन वा स्वाभिमतमर्थं सौलभ्येन साधयन्तीति। तमिमं वाग्मिजनसाधारणं पन्थानमनुसरति कर्णोऽपि। कण्टकमध्ये प्रफुल्लं केतकीकुसुममिव, दुष्टधार्तराष्ट्रमध्ये स्वभावतो ऋजुमतिः स्वच्छहृदयो विकर्णः किल सुयोधनभ्राता द्रौपद्याः सभानयनमसहिष्णुः, न्याय्यतस्तामजितामवादीत्सभायाम्। तदिदं विकर्णवाक्यं साधु सञ्जग्राह राजशेखरो बालभारतनाटके —

"न्यायवादी विकर्णोऽत्र भवद्भ्यो यद्यहं बहिः।
तद्यूयं शतमेकोनं षट् च सम्प्रति पाण्डवाः॥" इति।

स्वकुलनाशकं विकर्णं तिरश्चिकीर्षुः कर्णस्तदधिक्षेपाय समुचितं दृष्टान्तं कक्षीकृत्य निजगाद—

"दृश्यन्ते वै विकर्णेह वैकृतानि बहून्यपि।
तज्जातस्तद्विनाशाय यथाग्निररणिप्रजाः॥" इति।

एवमेवादिपर्वणि भीष्मद्रोणपक्षप्रतिक्षेपाय दुर्योधनं प्रत्यम्बुवीच्युपाख्यानामुदाजहार। तदेवं निरूपितं कर्णस्य वाग्मित्वम्।

अथ कर्णयशःकायस्य शेखरायमाणं दातृत्वमालोचनपथेऽवतार्यते। आदिपर्वणि पृथाचरित्रकीर्तनप्रस्तावे, तस्याः कन्याभावे कर्णोत्पत्तिविवरणप्रसङ्गे तस्य दातृत्वगुणमात्रमुपश्लोकयामास भगवान् व्यासः—

"तस्मिन् काले तु जपतस्तस्य वीरस्य धीमतः।
नादेयं ब्राह्मणेष्वासीत्किञ्चिद्वस्तु महीतले॥" इति।

उदाजहार च संक्षेपतः कुण्डलप्रदानवृत्तान्तम्। तदेवं दातृत्वगुणमात्रस्योपक्षेपात्, इतरेषामनुल्लेखाच्च, कर्णगुणेषु दातृत्वं हृदयमिव प्रधानभूतं, इतरे गुणास्तु गौणाः इति व्यासहृदयं प्रतीयते। अत्रेयं श्रूयते कथा वृद्धगोष्ठीषु यथा—कर्णस्य किल दानप्रभावेण लोके समुत्थितमुदग्रमुत्कर्षमसहमानः सुयोधनः कदाचिदेवं मतिमातनोत्—

"मदीयमेव स्वं वितीर्यायं कर्णो मत्परतन्त्रोऽपि प्रजासु कीर्तिं प्रतिष्ठां च लभते। तदद्यप्रभृत्यहमपि विप्राणां कृत्स्नवाञ्छितपूरणेन तत्तुलामारोक्ष्यामि।" इति।

अथैवं मनसिकृत्य सद्यः प्रजासु पटहताडनैरुद्घोषयामास, "अद्य राजा दुर्योधनः सर्वेषामर्थिनामीप्सितं दास्यति" इति। परिभ्रमति काले मासमेकमविच्छिन्नधारं देवो ववर्ष अत्रान्तरा यियक्षुः कश्चिद् ब्राह्मणो राजानमुपसृतं यागापेक्षितं शुष्केधनमयाचत। दुर्योधनस्तु किङ्कर्तव्यतामूढः शुष्केन्धनमनुपलभमानस्तं तिरश्चकार। अथ स विप्रः कर्णमुपगम्य प्रार्थयामास। कर्णस्तु क्षणमात्रं विचिन्त्य भृत्यानाज्ञापयामास 'इह राजगृहोपान्ते वर्तमानान् जीर्णप्रासादान् भङ्क्त्वा तत्रत्यैर्दारुखण्डैरस्य विप्रस्य कामः पूर्यताम्' इति। लब्धमनोरथो विप्रश्च सहर्षं निववृते--इति। अयमस्याः कथाया निर्गलितोऽर्थः, यदभ्यासेन दुःसम्पादं दातृत्वं, कर्णस्य पुनः स्वाभाविकं तत् इति। अभिहितञ्च अभियुक्तैः—

"दातृत्वं प्रियवक्तृत्वं धीरत्वमुचितज्ञता।
अभ्यासेन न लभ्यन्ते चत्वारः सहजा गुणाः॥" इति।

(यद्यपि महाभारते कथेयं नोपलभ्यते तथापि दातृत्वं स्वाभाविकं कर्णस्येति स्फटिकस्फुटं प्रतिपादयतीति, अज्ञातमूलापीयं किम्वदन्ती अत्र निर्दिष्टा।)

कर्णस्य सहजमिदं दातृत्वं वर्मकुण्डलप्रदाने उत्कर्षपरमकाष्ठामियाय। तेन हि कर्णः स्वजीवितमेव ददौ न तिलादपि न्यूनं किञ्चित्। यदि हि कर्णो नादास्यदमृतजे वर्मकुण्डले तर्हि को नाम तं सवर्मकुण्डलमहनिष्यत्। तत्रापि सूर्येण— "कुण्डलप्रदाने तव प्राणा नङ्क्ष्यन्ति, अतो मा त्याक्षीः" इति बोधितोऽपि प्रादात्, न पुनः प्रमादादज्ञानाद्वा इत्यालोचने तु सद्यः पुलकितं भवति शरीरम्। हन्त! कीदृशी कर्णदानस्य माहात्म्यगरिमा। अत एवेमं लोकातिशायिप्रभावं त्यागं पुरस्कृत्य "वैकर्तनः" "कर्णः" इति च अद्यापि जोघुष्यते कर्णकीर्तिः। तदिदं सचमत्कारं प्रत्यपादि भारतमञ्जर्यां क्षेमेन्द्रेण —

"न कर्ण स्तूयसे केन जङ्गमः कल्पपादपः।
समुद्रोऽपि कृतो येन विमुद्रो रत्नवर्षिणा॥" इति।

दानशौण्डस्य खलु कर्णस्य तादृशो विस्रम्भो दानेषु येन तन्मतिः तुषादपि न क्वचिच्चचाल चापलेन। तत्रेदं कर्णवाक्यं भासप्रणीते कर्णभारे—

"शिक्षा क्षयं गच्छति कालपर्ययात् सुबद्धमूला निपतन्ति पादपाः।
जलं जलस्थानगतञ्च शुष्यति हुतञ्च दत्तञ्च तथैव तिष्ठति॥" इति।

अत एव सूर्येण बहुधोपदिष्टोऽपि तदुपदेशं न जग्राह, किन्तु जीवितत्यागेनाप्यवृणोत् शाश्वतीमेव कीर्तिम्। सूर्यं प्रति तद्वचन-तात्पर्यं साधु सञ्चिक्षेप क्षेमेन्द्रो भारतमञ्जर्याम्। तत्रायं श्लोकः —

"एकार्थिप्रतिपादिताखिलभुवां शिष्यो गुरूणामहम्।
त्यागे नाम बलान्निवेद्य भगवान् कर्णः कथं निस्त्रपम्॥
दैन्यातङ्ककलङ्किताननरुचो याच्ञा विधार्थिनः।
प्रत्याख्यानविकुण्ठकण्ठवलनाभुग्नं मुखं वीक्षताम्॥"

इति । तथा च—

याचमानजनमानसवृत्तेः पूरणाय बत जन्म न यस्य ।
तेन भूमिरतिभारवतीयं न द्रुमैर्न गिरिभिर्न समुद्रैः ॥" इति ।

स्वपुरोगामिनो नलस्येव कर्णस्यापि दानेनैव जन्मसाफल्यमित्यासीत् सुदृढः प्रत्ययः । तदेवं कर्णगुणैर्ग्रथितायां मणिमालायां दातृत्वमेव मध्यमणिस्थानमापन्नं वर्णनपथातीतां चारुतां पुष्णाति ।

एवं कर्णस्य शाश्वतभूषणायमानाश्चत्वारो गुणा निरूपिताः । तस्य सूर्यभक्तिः सौहार्दादयश्च गुणाः विस्तरावकाशं न लभन्ते इति तत्संक्षेपेण परितोष्टव्यम् । तत्र परीक्षारङ्गेऽङ्कुरिता दुर्योधनसौहार्दलताः पश्चात् कार्तज्ञ्यरूपं स्वामिभक्तिरूपञ्च परिणामं भेजे । अत एवाह कृष्णमुद्योगपर्वणि —

"वधाद् बन्धाद्भयाद्वापि लोभाद्वापि जनार्दन ।
अनृतं नोत्सहे कर्तुं धार्तराष्ट्रस्य धीमतः ॥"

इति अनेन स्वामिभक्त्यतिशयेन परितोषितो दुर्योधनोऽपि कर्णे न केवलं प्रणयं, अपि तु परां भक्तिं बबन्ध । तदिदं सर्वमाकलय्यैव महाभारतमर्मज्ञः क्षेमेन्द्रः कर्णमुखे वचनमिदमयूयुजत ।

"बहिश्चरं जीवितञ्च न त्याज्यो मम कौरवः ।
सर्वावस्थासु यस्याहं बन्धुः स्वामी गुरुः सुहृत् ॥" इति ।

दुर्योधनपरितोषायैव केवलं, पाण्डवान् प्रति असकृत् कटुवचनमभाषत, सभायाञ्च रूक्षमभाषत । परीक्षारङ्गे कृतायाः सौहार्दप्रतिज्ञायाः परिपालनाय सत्यप्रतिज्ञः कर्णः सर्वप्रकारेणाऽपि दुर्योधनं प्रीणयितुं प्रयतमानः स्वां प्रकृतिमप्यन्यथाकृत्य स्वयमपि दुर्योधनघनीभूतः इव । सन्मित्राणां खल्वयं स्वभावो यदत्यन्तमेव परस्य मित्रस्य प्रकृतिं प्रतिपद्यन्त इति । अवधृतं चेदं क्षीरोदकदृष्टान्तावष्टम्भेन भर्तृहरिणा तथा चानेन दुर्योधनसौहार्देन कर्णस्य द्वयी प्रकृतिः सञ्जाता, एका दुर्योधनसख्यदीक्षारक्षणाय दुर्योधनीभूतेव भासमाना धूर्तप्रकृतिः, अपरा च निसर्गसिद्धा पवित्रप्रकृतिः । तत्र कृत्रिमा प्रातिभासिकी च प्रथमा, अकृत्रिमा पारमार्थिकी च द्वितीया । उद्योगपर्वणि कृष्णसंवादे, भीष्मसंवादे च पारमार्थिकं कर्णहृदयं परिस्फुरति, परत्र सर्वत्र तु आरोपितं हृदयमेव प्रतिभाति । अत एवापाततः कर्णचरितविलोकने तस्य भूयांसो दोषाः प्रतिभान्ति न गुणाः । परमार्थतस्तु बही रूक्षोऽपि अन्तः कोमलहृदय एव कर्णः । अत एव पाण्डवधिक्कारं द्रौपदीपराभवञ्च स्वयमेवानुशोचति —

"यदब्रुवमहं कृष्ण कटुकानि स्म पाण्डवान् ।
प्रियार्थं धार्तराष्ट्रस्य तेन तप्ये ह्यकर्मणा ॥ इति ।

तदेवम् —

"वज्रादपि कठोराणि मृदूनि कुसुमादपि ।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति ॥"

इति भवभूतिवचनं कर्णस्वरूपं यथावत् विवृणोति । यदि कश्चिदेवं ब्रूयात्, कर्णस्य दुर्योधनपक्षपातेन पाण्डवधिक्कारः तस्मिन् दुरपनोदं कलङ्कमादधातीति' तस्यापि —

"अहेतुः पक्षपातोऽयं तस्य नास्ति प्रतिक्रिया ।
स हि स्नेहात्मकस्तन्तुरन्तर्भूतानि सीव्यति ॥

इति भवभूतिवचनमेव प्रतिवचनम् । तस्मात् दुर्योधनप्रियकामनया कृतानि दुश्चेष्टितानि अन्तरङ्गपरिशुद्धिमहिम्ना अपोदितप्रायाणीति अवधारणीयम् । तदेवं त्रिलोकीमलङ्करिष्णूनां विश्वक्षेमं वर्धिष्णूनां कृत्स्नजगज्जयेऽप्यलम्भूष्णूनां पवित्रचरित्र-भ्राजिष्णूनां स्थास्नुकीर्तीनां महात्मनां गणनाप्रसङ्गे कनिष्ठिकां चेन्नाधितिष्ठेत् कर्णः, मा स्म नाम भूत्, नूनमङ्गुलिमपरामधितिष्ठेदेव । यदपि ब्रह्मवित्प्रकाण्डो भर्तृहरिर्महात्मनां लक्षणमाह —

"विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरतिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनाम् ॥

इति तदविकलं सामञ्जस्यमश्नाति धीरपुङ्गवे कर्णे । अभ्युदये क्षमापि अङ्ग-राज्याभिषेकोत्तरं पितृवन्दनेन विनयप्रदर्शनेन च व्यक्तीभवतीति अधस्तात्प्रति-पादितम् ।

"विविधविचित्रसन्दर्भगर्भं बहुलसरलनीतिशबलं", इत्युपोद्घातप्रस्तावे कर्ण-चरितगतिमासूत्रयद्भिरस्माभिस्तत्र अंशद्वयमुपक्षिप्तम् । तत्र एतावता प्रबन्धेन प्रथ-मांशमुपजीव्य कर्णस्वभावविमर्शमकार्ष्म । अथेदानीं अंशान्तरम् उपादाय अनेन कर्ण-चरितपरामर्शेन लम्भनीयानि प्रयोजनानि विवेचयामः । उपक्षिप्तानि चोपक्रमे महच्चरितपरिचिन्तनस्य नीतिकदम्बलम्भनमुखेन, सत्पथोपनयनं, आन्तरकल्मषा-पहननं, चित्तप्रसादाधानं, इत्येवमादीनि प्रयोजनानि । इयं हीतिहासपुराणानां साधा-रणीधोरणी यदिह कथानकजातं न क्वचित्कथामात्रोद्देश्ये प्रवृत्तम्, अपि तु नीतिनि-कुरुम्बव्याख्यानोद्देश्ये । अन्यथा हि खपुष्पप्रख्यैः गन्धर्वनगरसगन्धैः कृतं कथानकैरिति न कश्चिदवदध्यादमीषु । तात्पर्यमविचार्य नीतिमनुद्धृत्य कथामात्रश्रवणेन हि अन्ध-करधृतेन दर्पणेनैव, बधिरकर्णप्रध्मातेन शङ्खध्वानेनेव न किञ्चित्फलमासादयति लोकः । नीतिपरिज्ञानादृते केवलकथाश्रवणं हि पत्रवाहक—("पोस्टमेन") हस्त-स्थितं धनमिव धारणैकफलम् आत्मप्रयोजनं न साधयितुमुत्सहते ।

"ऋते नीतिं कथाबोधो धारणैकप्रयोजनः ।
पत्रवाहकहस्तस्थो वित्तानां निचयो यथा ॥"

तस्मादयमेव विस्तरेऽस्मिन् कर्णचरिते विद्यमानस्य विप्रकीर्णाख्यानजातस्य तात्पर्यप्रख्यापनमुखेन अनर्घाणि नीतिरत्नानि सञ्चेतव्यानि, यैः सप्रयोजनः स्यादयं कर्णचरितविमर्शः ।

महाभारतीयप्रधानाख्यानानां तात्पर्याणि गाणेश्यां व्याख्यायां सङ्गृहीतानि प्रपञ्चितानि नीलकण्ठीये भारतभावदीपे । तत्र परमोत्कृष्टमपि दानं विनिमयेन विफलीभवति इति कुण्डलाहरणाख्यानस्य आत्मनाशेऽप्याश्रितो जनः पालनीयः इति कृष्णकर्णसंवादप्रघट्टकस्य, सर्वः स्वकर्मानुरूपं फलं भुङ्क्ते ईश्वरस्तु निष्पक्षपातस्तत्साक्षी, अत एव इन्द्रात्मजवालिध्वंसे सूर्यसूनुसुग्रीवसहायोऽपीश्वरः अन्यदा सूर्यात्मजकर्णनिपातने इन्द्रात्मजस्य किरीटिनः साहाय्यमकार्षीत् इति कर्णवधपर्वणश्च तात्पर्यं व्याख्यातम् । तत्रेमानि पद्यानि गाणेशीस्थानि —

कर्णो दाता पात्रमिन्द्रो देयं स्वात्मसमं धनम् ।
शक्त्या विनिमयात्तज्जो धर्मो नाभ्यभवद्रिपुम् ॥

अपि त्रैलोक्यराज्यस्य हेतोर्विश्वस्तमाश्रितम् ।
न त्यजेद्देहनाशेऽपीत्युक्तं कर्णोपजापतः ॥

सौरिरैन्द्रिं निजघ्ने प्रागिदानीं तद्विपर्ययः ।
सहायो हन्तुरीशानः पक्षपातविवर्जितः ॥ इति ।

आसामेवाख्यायिकानां तात्पर्यान्तराणि, परेषां कर्णचरितीयकथानकानां तात्पर्याणि च सम्प्रति समीक्ष्यन्ते । तत्रादौ काश्चिन्नीतीर्व्याख्याय परस्तात्सर्वा नीतयः श्लोकैः सङ्ग्रहीष्यन्ते । महाप्रभावा मन्त्रा बहुधा अवधानेन, शतधा विमर्शनेन च प्रयोक्तव्याः, न तेषु परीक्षाकौतूहलं चापलं वा युज्यते इति नीतिं बोधयति कर्णजन्मकथा । मन्त्रपरीक्षाकौतुकेन हि सुतहस्तेन सुतमारणं दर्शनीयमापतितं पृथायाः । अत एव भ्रात्रा भ्रातृवधस्य अनवधानविसृष्टं मन्त्रमेव मूलं विचिन्त्य युधिष्ठिरः कुतूहलप्रकृतिं स्त्रीमात्रं शशाप शोकेन —

"भवत्या गूढमन्त्रत्वात् पीडितोऽस्मीत्युवाच ताम् ।
शशाप च महातेजाः सर्वलोकेषु योषितः ॥
न गुह्यं धारयिष्यन्तीत्येवं दुःखसमन्वितः ॥"

इति कानीनगर्भः प्रवर्तयत्यनर्थपरम्परामिति च नीत्यन्तरं कथेयं ख्यापयति । विद्यामाहात्म्यं निरूपयति परीक्षारङ्गवृत्तान्तः, न ह्यस्ति किञ्चिद्भुवने यद्विद्या न लम्भयतीति । कर्णस्य शास्त्रविद्यानैपुण्य-प्रभावो ह्ययं यन्महाराज्यं राजमैत्री च तं स्वयमेवोपससर्प । स्वभावतो धर्मरतिरपि प्रचुरगुणरञ्जितोऽपि पवित्रस्वान्तोऽपि पुरुषः सन्ततखलसंसर्गेण अधर्म्ये कण्टकबहुले गरलकराले दुष्पथे पदं निवेशयति इति कर्ण-

दुर्योधनसख्यं ख्यापयति । तेन हि पुण्यपूर्णः कर्णोऽपि अनौचित्यमनालोच्य, औद्धत्य-मविचार्य, यः कश्चित्प्राकृत इव, ग्रामीण इव, खट्वारूढ इव, मध्येसभं पाञ्चाल्याः "पातिव्रत्यलक्ष्मी-निवासस्फटिकप्राकारमिव" स्थितं द्रौपदीदुकूलापनयनमुपदिदेश, ग्राम्यभाषाञ्च बभाषे । अकारणेन परपराभवं काङ्क्षमाणः स्वयमेव तत्प्राप्नोति इति कर्णस्य घोषयात्रामन्त्रः ख्यापयति । कर्णः खलु वनवासक्लान्तान् पाण्डवान् द्रौपदीञ्च परिबुभूषुः घोषयात्रां संमन्त्र्य स्वयमेव गन्धर्वसमरे पर्यभूयत। अन्ते च धरित्रीग्रस्तरथस्य कृच्छ्रपतितस्यापि कर्णस्य वधोपदेशः सर्वज्ञेन भगवता जिष्णुं प्रति कृतः प्रख्यापयति यत्, लोककण्टकानां कक्षीकृतधर्म्येतरपक्षाणां क्षपणविधौ धर्मपथात् प्रच्युतिरपि शोभनैवेति । तदेवं कर्णचरितपुण्याख्यानसञ्चितानि बहुलपरिमलानि नीतिपुष्पाण्यमूनि, सम्प्रति मालारूपेण संग्रथ्यन्ते—

अग्निप्रख्येषु मन्त्रेषु खेलनं हि भयावहम् ।
तेनाद्राक्षीत्सुतेनैव सुतनाशं पृथा पुरा ॥१॥

अतिसन्धानाद् गुरोराप्ता चिरशुश्रूषणादपि ।
विद्या सा विफला नूनमकालोप्तस्तिलो यथा ॥२॥

भार्गवाच्छद्मना कर्णः कृत्वा ब्राह्मणकैतवम् ।
प्राप यद्ब्राह्ममस्त्रं तद्गुरुशापादभूद् वृथा ॥३॥

अनृतं बहुधा छन्नं काले याति प्रकाशताम् ।
चतुष्कुड्यसुगुप्तापि स्त्रीणां जाररतिर्यथा ॥३॥

सूतजत्वं प्रयत्नेन चिरं प्रच्छाद्य रक्षितम् ।
अस्त्रलिप्सोर्हि कर्णस्य तन्मुखादेव निर्गतम् ॥

अत्यल्पेऽपि मतिं कार्ये विमृश्यैव नियोजयेत् ।
प्राप धेनौ विसृज्येषुं कर्णः शापं दुरुत्तरम् ॥४॥

विद्यया राजसौहार्दं महाराज्याभिषेचनम् ।
चाधिगच्छेद्यथा कर्णः शास्त्रविद्या पटुर्वटुः ॥५॥

साधवो धूर्तसंसर्गादकार्यमपि कुर्वते ।
आहावाच्यं सभामध्ये कर्णः खलसखः खलु ॥६॥

सतीपराभवस्तूर्णं स्वात्मनाशाय कल्पते ।
कृष्णासन्तापजे वह्नौ कर्णः शलभतामगात् ॥७॥

ईश्वरेणोपदिष्टोऽपि व्रतभङ्गो न शोभनः ।
वारितोऽपि हि सूर्येण कर्णोऽदाद्वर्मकुण्डले ॥८॥

साधूनभिबुभूषुर्हि स्वयमेवाभिभूयते ।
दुर्मन्त्रात्प्राप कर्णो हि गन्धर्वेभ्यः पराभवम् ॥९॥

पापपक्षक्षयं कुर्यादधर्म्येण पथापि वा ।
कण्टकानां समुद्धारः कण्टकेन हि शोभनः ॥१०॥

दुर्योधनसखं कर्णमनवद्यमतिं खलु ।
कृच्छ्रे निपतितं हन्तुं कृष्णो जिष्णुमचूचुदत् ॥"

तदेतादृशीर्नीतीः स्मारं स्मारं कर्णस्य महापुरुषभूषणं गुणसन्दोहं, पुरुषधौरेयकमनीयं धीरचेष्टितं च ध्यायं ध्यायं कस्य वा न शिथिलीभवेच्चेतोमलम्, कस्य वा न विरलीभवेत्पापाचारः, कस्य वा न पूतं भवेदन्तरङ्गं, कस्य वा न प्रचयमियात् पुण्यधारा ! महच्चरितानुसन्धानं खलु उत्पथं करणचयं सद्यः शमयति, उद्धतं मनःकरिणं क्षिप्रं दमयति, उन्नतं साधुपथं तूर्णं गमयति उत्थितां कुपथरतिं मङ्क्षु क्षपयति । यत्सत्यं महच्चरितधाराधारणा द्राक् पवित्रयति तत्संसर्गिणं लोकं भगवती भागीरथी यथा। तस्मादमीषु महच्चरितपुण्यतीर्थेषु कृतमज्जनाः सज्जनाः सज्जीभवन्तु निःश्रेयसनिश्रेणी समारोहणाय । विशेषतश्च कर्णचरितं प्रकृत्याभिदध्महे —

"येनाभ्यर्णविकीर्णमार्गणगणैश्चूर्णीकृतं शात्रवं,
तूर्णं कर्णविशीर्णकुण्डलयुगेनेन्द्रोऽधमर्णः कृतः ।
कर्णस्याद्भुतकीर्णधीरचरितान्याकर्ण्यकर्णामृता—
न्यारात्तीर्णभवार्णवा भजत भोः निर्वाणपूर्णार्णवम् ॥

॥ इतिशम् ॥

प्रयत्नतः समालोड्य व्यासग्रन्थानपेक्षितान् ।
क्वचिद्ग्रन्थान्तरैश्चापि तारतम्यपरीक्षया ॥
कर्णाख्यानप्रबन्धोऽयं रचितो गुर्वनुग्रहात् ।
विश्वनाथतनूजेन वेङ्कटाचलशर्मणा ॥

—०—

संस्कृत-कोशविद्या जैनानां योगदानञ्च

—डॉ० रुद्रदेवत्रिपाठी

अहो माहात्म्यं कोशस्य !

कोशश्चैव महीपानां कोशश्च विदुषामपि ।
उपयोगेन महानेष क्लेशस्तेन विना भवेत् ॥

अभियुक्तोक्तिरियं सर्वथा सत्या सती सर्वदा कर्णकुहरेषु किमपि कमनीयं जीवनरसं पूरयन्तीव कोशमाहात्म्यं स्फोरयति। न तद् राष्ट्रं शासनं वा राज्यकार्यं सुचारुरूपेण चालयितुं शक्नोति यस्य सविधे कोशो नास्ति, न च विद्वांसोऽपि स्वानि कविकर्माणि यथेच्छं सम्पादयितुं शक्नुवन्ति येषां सविधे शब्दकोशो न भवति। यतो हि शासनसूत्रसञ्चालने भूयसीर्जनसुखकरीर्योजनाः फलवतीर्विधातुं प्रवृत्तौ सत्यामपि द्रव्यं विना कथं ताः सफलाः सम्भवेयुः ? शब्ददारिद्रयाक्रान्ताश्च कवयो यथारुचि शब्दानामन्वेषणे संसक्ता उत्तमोत्तमभावानां विभावने च कथं समर्था भवेयुरिति सत्यमेवाहो महात्म्यं कोशस्य !

कोशोत्पत्ति-विचारणा

सृष्टावस्त्यानन्त्यं वस्तूनाम्। तानि वस्तूनि पृथक्-पृथक् परिचेतुं परिचाययितुं च तेषामभिधानान्यपि पृथक् पृथगेव निर्दिष्टानि विद्यन्ते। सृष्टेः प्रवाहानुरूपमेव शब्दप्रवाहोऽपि निरन्तरं निरर्गलं प्रवहन् न जाने कुतः कुत्र सम्प्राप्तः। कालक्रमेण शब्दानामर्था अपि विस्मृतिं गच्छन्तीति हेतोस्तेषामर्थाविबोधाय —

शक्तिग्रहं व्याकरणोपमान—
कोशाप्तवाक्याद् व्यवहारतश्च ।

वाक्यस्य शेषाद् विवृतेर्वदन्ति,
सांनिध्यतः सिद्धपदस्य वृद्धाः ॥

इति सङ्केतग्रहस्याष्टौ साधनानि सूचयद्भिराचार्यैः कोशस्यावश्यकत्वं सुतरां प्रतिपादितम् ।

'**आवश्यकतैवाविष्काराणां जननी**'ति सिद्धान्तोक्त्यनुसारं मन्येऽनुकम्पा-परवशैराचार्यैर्लोकानां हितावहदृष्ट्या शब्दानां तदर्थानुसन्धानपूर्वकं सङ्कलनं विधाय कोशः कोशरूपेणोपस्थापितः । प्राचीनायाः प्राचीनया गवेषणया गवेषकैः सर्वप्रथमः कोशो महर्षेः कश्यपस्य—(ईसातोऽष्टशतवर्षप्राक्तनस्य) 'निघण्टु'रस्तीति सुनिश्चितम् ।[1] वैदिकानां शब्दानामर्थ-निर्वचनमेवास्य लक्ष्यम् । अस्मात् पूर्वमपि केचन कोशकारा अभूवन् परं तेषां ग्रन्था नोपलभ्यन्ते । निघण्टोरस्यापि ज्ञातारो यदा दुर्लभा अभवँस्तदा महर्षिणा यास्केन तज्ज्ञानाय '**निरुक्त**'स्य निर्माणं कृतम् । वस्तुत इदं निरुक्तं निघण्टोष्टीकैवास्ति । निरुक्तेऽस्मिन् प्राचीनानामौपमन्यव-प्रभृतीनां निरुक्तकाराणां नामान्यपि सूचितानि सन्ति यानि कोशनिर्मितेः प्राक्तनीं प्रवृत्ति पुरस्कुर्वन्ति । एवं भारते कोशनिर्माण-कलायाः प्रारम्भः कश्यपस्य निघण्टु-कोशादेव मन्यते ।

कोशविद्या-विकासः

'**यथा यथोपयुनक्ति तथा तथा परिष्कृतिर्भवति**' तथ्यमिदं कोशविद्या-विकासेऽपि निदर्शनमस्ति । निघण्टौ कस्यापि वैदिकस्य ग्रन्थस्य शब्दानां सङ्ग्रहः, केवलं कठिनशब्दानां सङ्ग्रहस्तत्रापि नामाव्ययाख्यातशब्दानां सङ्ग्रह एवासीत् । वैदिकशब्दानामर्थसूचनमेवासीत् तदीयं लक्ष्यम् । ततः परं निरुक्तकारेण निर्वचन-द्वाराऽर्थस्पष्टीकाराय प्रयतितम् ।

तत्र— **वर्णागमो वर्णविपर्ययश्च,**
द्वौ चापरौ वर्णविकारनाशौ ।
धातोस्तदर्थातिशयेन योग—
स्तदुच्यते पञ्चविधं निरुक्तम् ॥

इत्यासीद्रचना-प्रक्रिया । एवं भाषाविज्ञानदृशा दुरूहशब्दानां व्याख्याऽपि निरुक्त एव प्रकटिता । सहैव निरुक्ते प्रत्येकं शब्दस्य प्रचलितार्थो विशिष्टार्थो विशिष्टार्थनियन्त्रणकारणानि चापि यास्काचार्यैर्व्याख्यातानि । एतां विवेचन-प्रणालीं विलोक्यैव केचन विद्वांसो निरुक्तं व्याकरणशास्त्रान्तर्गतमेव मन्वते । अद्यापि भाषा-

---

१. निघण्टुशब्दार्थाः किल—१. अर्थस्य द्योतकः, २. वेदेभ्यः सङ्गृहीतस्तथा ३. एकशः कथित इति सन्ति ।

विज्ञानविदो निरुक्तस्य बहुशो नियमान् वैज्ञानिकान् मानयित्वा स्वीकुर्वन्ति । इयं वैदिकी कोशविद्याऽग्रे तादृशं प्रसारं न प्राप्तवती ।

गद्य-पद्यात्मकं लौकिक-संस्कृत-साहित्यमधिकृत्य पुरोवर्तिन आचार्याः **'कवीनां हितकाम्यया'** नैकेषां शब्दानां मालारूपेण सङ्ग्रहं विधाय **'लौकिक संस्कृतकोश'** ग्रन्थानां परम्परामाविरकार्षुः । अस्यां परम्परायां प्राधान्येन त्रयः प्रकारा विशिष्य प्रवृत्ताः । ते हि १—एकार्थनाममालारूपाः २—अनेकार्थक-नाममालारूपास्तथा ३—एकाक्षर-नाममालारूपाः सन्ति । एतेषां रचनाविधानमपि निरुक्त-पद्धतिं गद्यात्मिकां विसृज्य मुख्यरूपेण पद्यरूपात्मकमेव स्वीकृतम् । तत्रापि विशिष्यानुष्टुभ एव प्रयोग आदृतः ।

ईदृशानां कोशानां निर्माणोद्देश्येषु —

१—महत्त्वपूर्णानां विरलप्रयुक्तानां कविजनोपयोगिशब्दानां सङ्ग्रहः ।

२—संयम-नियमाचार-विचारापन्न-पान-वसन-सहनादीनां शास्त्रबहिर्भूतत्वाद् बल-वीर्यमेधा-विद्यातपश्चरणादीनां च ह्रासाद् लौकिकशब्दानामप्यर्थज्ञानस्य दुर्बोध-प्रायत्वात् तद्वारणाय शास्त्रज्ञानार्थं च शब्दसंग्रहः ।

३—काव्यनिर्माणार्थं पर्यायवाचिशब्दानां संग्रहश्चेति —

प्रधानान्यासम् । एतेषु मुख्यतो नामपदानामव्ययानामेव संग्रहो भवति स्म ।

प्राचीनं कोश-साहित्यम्

संस्कृत-साहित्ये सम्प्राप्तेषूद्धरणेषु यत्र तत्र निर्दिष्टानामनेकेषां कोशग्रन्थानां नामान्युपलभ्यन्ते । येषु भागुरिकृतः **'त्रिकाण्डकोशः'** । वाचस्पतिकृतः **'शब्दार्णवः'**, विक्रमादित्य-विरचितः **'संसारावर्तः'**, वररुचेः **'नाममाला'**, व्याडेः **'उत्पलिनीकोशः'**, आपिशलेः शाकटायनस्य **चाज्ञातनामानौ** कौचित् कोशौ ! कतिपयेऽन्येपि कोशा अद्यत्वे नामशेषा एव विद्यन्ते । परमुपलभ्यमानेषु लौकिक-सस्कृत-कोशेषु प्राचीनात् प्राचीनः श्रीमतोऽमरसिंहस्य **नामलिङ्गानुशासनम्—'अमरकोषापराख्यं'** विद्यते । अयं कोशः पर्यायकोशोऽनेकाक्षर्येकार्थक-शब्दकोशश्चेति कथ्यते ।[1] अमरसिंहस्य कालो **मैक्समूलर'**-स्याभिमतानुसारं षष्ठशत्याः पूर्वतनो **'डॉ हार्नलेमहोदयस्य** मते च ६२५-६४० ई० वत्सरात्मको मन्यते । साम्प्रतं प्रसिद्धेषु कोशेषूपयोगितादृष्ट्याऽस्यैव कोशस्य सर्वत्र प्रचारो वर्तते । अस्य वैशिष्ट्यमस्मादपि सिद्धं भवति यदस्य प्रायः पञ्चाशन्मिताष्टीकाः

१. अत्र प्रस्तावनारूपेण लिङ्गनिर्णयायायं निर्देशो विद्यते—

प्रायशो रूपभेदेन साहचर्याच्च कुत्रचित् ।
स्त्रीपुंनपुंसकं ज्ञेयं तद्विशेषविधेः क्वचित् ॥

विविधाचार्यैर्विरचिताः सन्ति । अस्य रचनापद्धतिः सरला सुसंयता वैज्ञानिकी चास्ति । बालानां सुखबोधाय प्रारम्भकाले कण्ठस्थीकरणायात्रानुष्टुपुच्छन्दसा प्रत्येकं नाम्नो यावच्छक्यं विविधाः पर्यायाः परिष्कृत्य पुरस्कृताः ।

कोश-निर्माण-परम्परा

इतः परं कोश-निर्माणविधौ नैरन्तर्यमायातं तत्फलरूपेण च शाश्वतस्य '**अनेकार्थ-समुच्चयः**', हर्षवर्धनस्य (सप्तमशत्यां) '**लिङ्गानुशासनं**', पुरुषोत्तमदेवस्य '**त्रिकाण्डशेष-हारावली वर्णमाला-एकाक्षरकोश-द्विरूपकोशाः**' वामनस्य, '**लिङ्गानुशासनं**' चेत्यस्यामेव शत्यां निर्मिताः । दशैकादशशत्योश्च हलायुधस्य '**अभिधानरत्नमाला**', विशिष्टाद्वैतवादिनो यादवप्रकाशस्य '**वैजयन्ती**', भोजराजस्य च '**नाममालिका**' ख्यातिं प्राप्ताः । इयमेव नानारूपेण प्रवर्तमाना परम्पराऽद्य यावद् नैकान् कोशान् पुरस्कुर्वाणा विलोक्यते ।

एतेषु कोशेषु केचन लिङ्गानुसारिणः केचन च विषयानुसारिणः सन्ति । परेषु केषुचित् कोशेषु शब्दानां चयनं प्रथमवर्णानुसारमन्त्यवर्णानुसारं वा विहितमस्ति । एकाक्षरकोशरचनायां स्वर-व्यञ्जन-संयुक्त-रूपेषु त्रिषु वर्गेषु विभागः कृतः । श्लोक-निर्माणविधौ प्रथमं पूर्णश्लोके निवेशयोग्याः पर्यायास्ततोऽर्धश्लोके समावेश्याः पर्यायाः प्रान्ते श्लोकस्य प्रतिचरणमेव निवेश्यमानाः पर्यायाश्चाकलिताः । अमरकोशे नानार्थवर्गस्यान्तर्गतमनेकार्थक-शब्दानां सङ्ग्रहणमपि विद्यतेऽतः स मिश्रप्रकारोऽपि वक्तुं शक्यते ।

कोशनिर्माणपद्धतिपरिचयः

उपर्युक्तायां परम्परायां निर्माणपद्धतेर्ये प्रकाराः स्वीकृताः सन्ति तेषां परिचयस्याप्यत्र विदुषां विचाराय संक्षिप्योप स्थापनमावश्यकमिव मन्ये । यथा हि—

१—लिङ्गानुसारि-शब्दावचयः

शब्दप्रयोगावसरे तेषां लिङ्गज्ञानमत्यावश्यकं भवति । विशेषणरूपेण प्रयोगसमये सकलमपि वाक्यकदम्बं विशेष्यमनुकरोति । तदर्थं नियमरूपेणार्येयं सुप्रसिद्धाऽस्ति—

> **"यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेष्यस्य ।**
> **तल्लिङ्गं तद्वचनं सा च विभक्तिर्विशेषणस्यापि ॥"**

भेदाख्यानाय न द्वन्द्वो नैकशेषो न सङ्करः ।
कृतोऽत्र भिन्नलिङ्गानामनुक्तानां क्रमाद् ऋते ॥ ४॥ इत्यादि ।

अत एव कोशकारा लिङ्गानुशासनं मुख्यत्वेन प्रमुखीकृत्य कोशान् व्यरचयन् । तेषु सर्वतः प्रथममरकोशकारेण तृतीये काण्डे पद्धतिरेषा स्वीकृता । ततः परं हर्षवर्धन-वामन-केशवस्वामिभिः स्वे स्वे ग्रन्थे पुँल्लिङ्ग-नपुँसकलिङ्गानेकलिङ्गात्मकशब्दानां क्रमशश्चयनं विहितम् । सुजानकृतायां 'शब्दलिङ्गार्थ-चन्द्रिकायां' तु क्रमश एकलिङ्ग-द्विलिङ्ग-त्रिलिङ्गरूपेण त्रयः काण्डा निर्मिताः । यादव-प्रकाशस्य 'वैजयन्ती'कोशे पुं-स्त्री-नपुंसकलिङ्गैः सहैव 'अभिधेयवल्लिङ्ग-नानालिङ्ग'-नामभ्यामपि वर्गीकरणं प्रस्तुतम् । साम्प्रतिकेन श्रीमुकुन्दशर्मणा लिङ्गानुशासनवर्गापराख्ये मुकुन्दकोशे लिङ्गत्रय्या सह पुँस्त्रीलिङ्ग-पुं-नपुंसकलिङ्ग-स्त्रीपुंसक-त्रिलिङ्गाभिधेयवल्लिङ्ग-नाम्ना केचनान्येऽपि वर्गा आपादिताः ।

२—विषयानुसारि-शब्दावचयः

शब्दानां सागरादपेक्षितानि रत्नानि सम्यक् सम्प्राप्य कवयो रचना विदधति परं यदि सागरेऽन्वेषणाय भूयान् कालो व्यत्याप्येत तदा कल्पना-कुरङ्गी न जाने कुत्र विहृता विद्रुता वा भवेदिति कष्टमाकलय्य कोशनिर्मातृभिर्विषयानुसारि शब्द-सङ्कलनमादृतम् ।[1] तस्यां दिश्यपि प्राथम्यं श्रीमतोऽमरसिंहस्यैव विलोक्यते । तेन हि स्वीये कोशे त्रिषु काण्डेषु—'स्वर्ग-व्योम-दिक्-काल-धीशब्दादि-नाट्य-पाताल-भोगि-नरक-वारि-भूमि-पुर-शैल-वनौषधि-सिंहादि-मनुष्य-ब्रह्म-क्षत्रिय-वैश्य-शूद्र—'प्रभृतयो विभिन्ना वर्गा आविष्कृताः । एषैव पद्धतिरग्रिमैः कोश-प्रणेतृभिरपि सर्वत्र स्वीकृता ।[2]

३—प्रथमवर्णानुसारि-शब्दावचयः

यदा कदा काव्यरचनायां काठिन्यमिदमप्यायाति यत् पद्ययोजनायां कश्चन विशिष्टवर्णात्मक एव शब्दो नितान्तमावश्यको भवति । सन्धि-नियमानां बाधातो मुक्तयेऽपीदृशाः शब्दा अभीप्स्यन्ते । मन्येऽत एव यादवप्रकाशस्य वैजयन्त्याम्, अजयपालस्य नानार्थरत्नमालायां श्रीहेमचन्द्रस्य नाममाला(रयणमाला)यां मेदिनीकोशादिषु च कादयः खादयः शब्दाः प्रथमवर्णानुसारि-शब्दावचयरूपेण संयोजिताः ।

४—अन्त्यवर्णानुसारि-शब्दावचयः

काव्येष्वलङ्कारयोजनादृशा केचन निश्चित-वर्णात्मकाः शब्दाः शब्दालङ्कार-

---

१. काव्यशिक्षा-काव्यकल्पलता-कविशिक्षादिष्वप्येतादृशाः शब्दाः सङ्कलिता दृश्यन्ते ।

२. यथा—अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः ।
सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः ॥ इत्यादि ।

परिपुष्टये नितान्तमुपादेया भवन्ति। अनुप्रास-यमक-चित्र-भेदेषु पूर्वापर-वर्ण-विन्यास-वैशिष्ट्येन किमपि सहृदयाह्लादि वैचित्र्यमुपतिष्ठते। नादमाधुरी-पिशङ्ग-पूरेण सहैव रचनागतमौज्ज्वल्यं च स्वान्तमुल्लासयति। अनयैव भावनयाऽन्त्यवर्णानुसारि-शब्दावचयमङ्गीकृत्य—मङ्ख-कविः **'अनेकार्थकोशं'**, महेश्वरसूरिः **'विश्वप्रकाशं'**, मेदिनीकारो **'मेदिनीकोशं'** तञ्जौरभूपः शाहजीः **'शब्दरत्नसमन्वयकोशं'** विश्वनाथः **'कोशकल्पतरुं'** कश्चनाज्ञातनामाऽऽचार्यो **'नानार्थ-पद-पेटिकां'** च रचितवान्। एतेषु क्रमशः कान्ताः खान्ता गान्तप्रभृतयश्च शब्दाः सङ्गृहीताः सन्ति।

५—अक्षरसङ्ख्यानुसारि-शब्दावचयः

कियन्तो वर्णाः कुत्रापेक्षितास्ते च स्फुरणासमनन्तरमेव यदि लभ्यरेन् तदा छन्दोनिबन्धने च-वा-तु-हि-त्रै-प्रभृत्यव्ययानां निरर्थकशब्दानां स्थापना न क्रियेत। किञ्च सूत्ररूपेण समासशैल्या वाऽभीप्सितस्याख्यानं सरलं भवेदिति विचारणया केशवस्वामिनो **'नानार्थरत्नसंक्षेपे'** तञ्जौराधिपतेः श्रीशाहस्य **'शब्दरत्नसमन्वये'** क्रमशः एक-वर्ण-द्विवर्णात्मकशब्दानां सङ्कलना विद्यते। **'कविकल्पलता'**याममरचन्द्रयतिरपि पद्धतिमिमां स्वीकृत्य शब्दराशिं प्रास्तौदथ च तत्रैव **'कनक'**सदृशान् लोम-विलोमभावेऽप्येकरूप-धरान् कतिपयानन्य-यमक-श्लेषालङ्कारोपयोगिशब्दानपि समगृह्णात्।[१] सेयं प्रक्रियाऽपि कोश-दृशा महनीयैव।

६—पर्याय-परिणामानुसारि-शब्दावचयः

कस्य शब्दस्य कियन्तः पर्यायाः सन्तीति विभावयितुं शाश्वतो**'ऽनेकार्थसमुच्चयं'** धनपालश्च **'पाइयलच्छीनाममालां'** निर्माय तत्र प्रथमं प्रतिपद्यावसायिनस्ततोऽर्धपद्याव-सायिनः प्रान्ते प्रतिचरणावसायिनः पर्यायान् सङ्गृह्य स्थापितवन्तौ।

साम्प्रतिके वैज्ञानिके युगे तु कोशनिर्माणकलेयं पूर्णाभिः कलाभिः परिस्फुरन्ती किमप्यभिनवं स्वरूपमेवाविष्करोति। तत्र हि १-**अनुक्रमणिकाकोशेषु** पद-पाद-वाक्य-सिद्धान्तानां सङ्ग्रहाः क्रियन्ते। वेदानामागमानां शास्त्राणां पुराणानां चैवंविधाः कोशा अद्योपलभ्यन्ते। २-**शब्दविवेचनात्मककोशे** लक्षणावली विशिष्टप्रयुक्त-सम्प्र-दाय-सिद्धादिशब्दानां विवेचनानि प्रस्तूयन्ते। ३-**विषयानुसारिसङ्ग्रहकोशेषु** विशिष्टानां विषयाणां प्रतिपादनाय कालक्रमेणोपदिष्टानां ग्रन्थानामाधारेण विवरणानि संस्था-प्यन्ते। एवमेव **धातुकोशाः परिभाषाकोशाः सङ्ग्रहकोशाः ग्रन्थकोशाः विश्वकोशादय-**श्चाद्य कोशनिर्माणस्य सुदीर्घां परम्परां व्यञ्जयन्तो विलसन्ति नवनवाश्च प्रयोगा

---

१. बाण-मयूर-मुरारि-श्रीहर्षप्रभृतिभिः कविभिरपि कोशाः निर्मिता आसन्। श्रीहर्षेण 'श्लेषार्थ-पदसङ्ग्रह' नाम्ना कोशो विरचित आसीद् यस्मिन् श्लिष्ट-शब्दानां सङ्ग्रहोऽभूत्। इ० डी० कुलकर्णी महोदयस्य लेखः 'वाक्'।

आविर्भवन्ति तदनुसारं च बुद्धि-कौशल-साधन-सौविध्यबलेनोत्तरोत्तरं प्रयासा निरन्तरमाधीयन्ते ।

कोशविद्यायां जैनानां योगदानम्

विश्वस्य वाङ्मये जैनाचार्यैर्जैन-गृहस्थमनीषिभिश्चापूर्वं योगदानं कृतमस्ति । यस्मिन् कस्मिन्नपि विषये दृष्टिर्दीयते तत्रैव किञ्चिदपूर्वमेव चिन्तनं दर्शनं चोपलभ्यते । बहुषु विषयेषु तु परेषां सम्प्रदायानां मुष्टिमेयमेव साहित्यं मिलति तदाऽत्र पर्याप्तं विशालं साहित्य विलोक्यते । परःसहस्रेभ्यो वर्षेभ्यः प्रवहन्त्याः श्रमणसंस्कृतेरुपासकास्ते संस्कृतसाहित्यस्य कोशं पूरयितुमपि नैकशः प्रायतन्त ।[1] अत एव कोशविद्याक्षेत्रमपि नास्ति शून्यं दुर्बलं वेति सुदृढं शक्यते वक्तुम् । अत्र तैरेव निर्मितानां कोशानां विषये मनाक् पर्यालोच्यते —

जैनकोशसाहित्यसमुद्भवः

यथा वैदिकसम्प्रदायवन्तो वेदेभ्य एव सर्वासां विद्यानां समुद्भूतिं स्वीकुर्वन्ति तथैव जैनधर्मावलम्बिनोऽप्यागमेभ्य एव सर्वविधस्य साहित्यस्य समुद्भवं स्वीकुर्वन्ति । एतदनुसारं कोशसाहित्यस्य रचना अपि सत्प्रवादपूर्वस्य तथा विद्यानुवादस्य पञ्चशत-महाविद्यास्वक्षरविद्यायां सम्मिलन्ति । प्रारम्भकाले— आगमानां भाष्याणि चूर्णयो वृत्तयो विभिन्नाष्टीकाश्च कोशसाहित्यस्य पूर्तिं कुर्वन्ति स्म । कालान्तरे यदा भाष्याणां चूर्णीनां वृत्तिप्रभृतीनां च शब्दार्थज्ञानं क्रमशः श्लथं जातं तदा शब्दकोशानामावश्यकता समजनि तस्माद् भाष्य-चूर्णि-वृत्ति-निर्मित्युत्तरकालिक एवास्ति 'जैनकोशसाहित्य-समुद्भवकाल' इति निश्चप्रचम् । कालोऽयं ख्रिस्तीय नवमशत्याः सर्वा क्रियते, यदा सर्वप्रथममागमानामालेखनमारब्धमभूत् । मन्ये तेष्वेव वर्षेषु कोशसङ्ग्रहोऽपि प्रारब्धः स्यात् ।

आद्यौ जैनकोशकारौ

१—श्रीधनञ्जयः —

अन्येषां शास्त्राणामिव कोशसाहित्येऽपि जैनविद्वांसो निरन्तरमलिखन्नेव । परं

---

१. साहित्यशास्त्रीयां जैनानां ग्रन्थरूप-सेवामभिलक्ष्यानेन लेखकेन 'श्रीमद् यशोविजयोपाध्यायविरचितकाव्यप्रकाशटीकाग्रन्थस्य भूमिकायां विशिष्य विवेचितमस्ति ।

द्रष्टव्यः—श्रीयशोभारतीप्रकाशनसमिति-बम्बईतः प्रकाशितः 'काव्यप्रकाशः' ।

स्वतन्त्ररूपेणोपलभ्यमानेषु कोशेषु नवम्याँ शत्यां समुत्पन्नस्य द्विसन्धानमहाकाव्यस्य राघवपाण्डवीयस्य रचयितुः श्रीधनञ्जयस्य **'नाममाला-अनेकार्थनाममाला-अनेकार्थ-निघण्टु-एकाक्षरीकोशा'** उपलभ्यन्ते । अयं हि जैनगृहस्थः **'सुदृष्टतरङ्गिण्या'** ४१ तम-तरङ्गाधारेण ज्ञायते यदमरकोशकर्तुरमरसिंहस्य श्यालक आसीदिति । स्वीयस्य द्विसन्धानकाव्यस्यान्तिमे पद्ये स्वं परिचाययन्नयं मातरं श्रीदेवीनाम्ना पितरं वसुदेवाख्यया गुरुं च दशरथाभिधानेन बोधयति । अस्य महाकवेः शब्दशास्त्रे पूर्णोऽधिकार आसीत् । शब्दार्थज्ञानेन सह तस्य समुचितप्रयोगवैदग्ध्यप्रशंसा चेत्थं विद्यते—

ब्रह्माणं समुपेक्ष्य वेदनिनदव्याजात् तुषाराचल—
स्थानस्थावरमीश्वरं सुरनदीव्याजात् तथा केशवम् ।
अप्यम्भोनिधिशायिनं जलनिधिध्वानोपदेशादहो,
फूत्कुर्वन्ति धनञ्जयस्य च भिया शब्दाः समुत्पीडिताः ॥[1]

नाममाला-परिचयः

श्रीधनञ्जयस्यास्यां नाममालायां द्विशतश्लोकेषु संस्कृतभाषाया आवश्यकानां प्रायः सप्तदशशत-शब्दानामर्थाः सङ्गृहीताः । अत्रैकां विशिष्टां प्रणालीं निर्माय महाकविरयमेकस्माच्छब्दाच्छब्दान्तरनिर्माणकलामप्यबोधयत् । अस्याः पद्धतेः सर्वाधिको लाभोऽयमप्यस्ति यदेकस्य प्रकारस्य पर्यायवाचिनां शब्दानां परिज्ञानादन्यविधानां पर्यायवाचिनां शब्दानां ज्ञानं सुलभं भवति । यथा—पृथ्वीवाचिशब्दानामग्रे 'धर'—शब्दयोजनेन पर्वतवाचिनां शब्दानाम्, 'पति'—स्वाम्याद्यर्थक-शब्दयोजनेन राजवाचि-शब्दानां तथा 'रुह'शब्दयोजनेन वृक्षाणाम् । सेयं वैज्ञानिकी शैली केनाप्यन्येन कोश-कारेण पूर्वं नाविष्कृतेति कृत्वा सत्यमेवास्य माहात्म्यं कोशकृत्सु शिरोभूतमेव । पञ्चदश्यां शत्यामुत्पन्नेनामरकीर्तिनाऽस्या भाष्यं विरचितं यत्र प्रत्येकं शब्दस्य व्युत्पत्तिः पर्यायवाचि-शब्दानां संख्या सूत्रनिर्देशः क्वचित् क्वचिच्चेतरे पर्याया अपि निर्दिष्टाः । अमरकोशस्य क्षीरस्वामिकृतायाष्टीकाया आदर्शोऽत्र स्वीकृतः । अत्र प्रदत्ताभ्यो व्युत्पत्तिभ्यश्च शब्दानां सांस्कृतिकमितिवृत्तमप्यवबोद्धुं सुशकं भवति ।

धनञ्जयेन नाममालाऽतिरिक्तं कोशप्रक्रियायाम् **अनेकार्थ-नाममाला'** ४६ पद्यात्मिका 'अनेकार्थनिघण्टुः १५४ पद्यात्मकस्तथा 'एकाक्षरीकोशो'ऽपि निर्मितः । एते कोशा अपि सुबहु स्पृहणीयाः सन्ति ।

---

१. धनञ्जयरचित **'नाममालाया'** अन्तिमं पद्यमिदम् ।

२—श्रीधनपालः

जैन-सम्प्रदाये भगवत उपदेशा अर्धमागध्यामेव सन्ति । तद्विषये च श्रीहरिभद्रसूरिणा 'दशवैकालिक-टीकायां' कथितमस्ति ।[1] अत एव ततः परं प्राकृत-भाषायां धनपालः (वि० सं० १०२९) **'पाइअ लच्छी-नाममालां'**[2] रचितवान् । अस्मिन् कोशे २७५ गाथाः सन्ति । अत्र संस्कृत-व्युत्पत्तिसिद्धाः प्राकृतशब्दास्तथा देशीशब्दाः सङ्कलिता विद्यन्ते । प्रान्ते प्रत्ययानामर्था अपि सूचिताः । एवं प्राकृत-कोशकारेषु धनपालस्याप्याद्यकोशकर्तृत्वेन सुबहु सम्मानं वर्तते । एतयोरेवाद्य कोशनिर्मात्रोर्जैनकोशसाहित्ये दायं स्वीकृत्य पुरोवर्तिनः कोशकाराः स्व-स्वकोशान् निरमापयन् ।

कलिकालसर्वज्ञः श्रीहेमचन्द्राचार्यः

कालक्रमानुसारं जैनकोशकारेषु धनञ्जय-धनपालयोरनन्तरं श्रीमतो हेमचन्द्राचार्यस्याभिधानमायाति । साहित्यस्य प्रत्येकं शाखायां—'व्याकरण-कोशच्छन्दोऽलङ्कार-काव्य-न्याय-तत्त्वज्ञान-योग'-प्रभृति-विषयानधिकृत्य प्रौढग्रन्थानां निर्मातृत्वेन सुप्रसिद्धः श्रीमानयमाचार्यो गूर्जरप्रदेशस्य 'धुन्धुका'नाम्नि ग्रामे वि० सं० ११४५ तमवर्षस्य कार्तिकशुक्लपूर्णिमायां जनिमलभत । अस्य मातुर्नाम **'चाहिणी'** (पाहिणी, चंगी) पितुर्नाम च **'चच्च'** (चाचिग, चाच) इत्यास्ताम् । मोढ़जातीयवणिग्वंशे समुत्पन्नस्यानयोर्बालकस्य नाम **'चङ्गदेवः 'चांगदेव'** इति वा निर्धारितमभूत् ।

वि० सं० ११५४ (अथवा ११५०) तमे वर्षे श्रीदेवचन्द्रसूरेर्दीक्षां गृहीत्वा चंगदेवः **'सोमदेव'**नाम्नाऽऽम्नातः । वि० सं० ११६२ (अथवा ११६६) तमे वर्षे च सूरिपदं प्राप्य **'हेमचन्द्राचार्य'**नाम्ना विख्यातोऽभूत् । श्रीहेमचन्द्राचार्यस्य वैदुष्येण श्रीसिद्धराजजयसिंहस्तथा कुमारपाल उभावपि प्रभावितावभूताम् । स्वस्यागाध-पाण्डित्यवशादेवाचार्यवर्यमिमं जनाः **'कलिकालसर्वज्ञ'** इति सम्मानपदेन परिचाययन्ति ।

श्रीमतो हेमचन्द्राचार्यस्य कोशसाहित्ये चत्वारः कोशाः सुप्रसिद्धाः सन्ति । ते च **१ - अभिधान-चिन्तामणि- २ - अनेकार्थसङ्ग्रह-३-निघण्टु-४-देशीनाममालाश्चेति** नामभिः प्रथितानि विद्यन्ते । एतेष्वाद्यास्त्रयः संस्कृतभाषाया अन्त्यश्च देश्यशब्दानां सङ्ग्रहात्मकः । **'अनेकार्थ-सङ्ग्रहे'** सप्तकाण्डेषु क्रमश एक-द्वि-त्रि-स्वरक्रमेण षट्काण्डाः प्रान्तेऽव्ययैः सप्तमः काण्ड एवं १९२९ पद्यानां सङ्ग्रहोऽस्ति । अस्योपरि चतस्रष्टीकाः

---

१. बालस्त्रीमन्दमूर्खाणां नृणां चरित्रकाङ्क्षिणाम् । अनुग्रहार्थं सर्वज्ञैः सिद्धान्तः प्राकृते कृतः ॥ इति ।

२. अस्या नाममालाया निर्माणकारणं कवेर्धनपालस्य कनिष्ठा भगिनी सुन्दरी विद्यते यस्या अध्ययनाय रचनेयं निर्मिता ।

सन्ति। '**निघण्टोः**' षट्सु काण्डेषु वृक्ष-गुल्म-लता-शाक-तृण-धान्यानां शब्दाः ३९६ पद्यैः सङ्गृहीताः। अस्योपरि श्रीवल्लभस्यैका टीकाऽस्ति। '**देशीनाममाला**'यां देश्य-(देशी) ३९७८ संख्यकशब्दानां सङ्कलनं वर्तते। येषां प्राकृतशब्दानां व्युत्पत्तिः प्रकृति-प्रत्ययविधानं वा सम्भवं न भवेत् तथा येषामर्थाः केवलं रूढावेवावलम्बिता भवेयुस्ते शब्दा देश्याः (देशी वा) कथ्यन्ते।[1] वर्णक्रमेण लिखितायामस्यां ७८२ गाथाः सन्ति। उदाहरणाय काश्चनान्या गाथा अपि समुद्धृताः। तत्सम-गर्भित-तद्भव-संशययुक्ततद्भवाव्युत्पादित-प्राकृतशब्दा अत्र सङ्गृहीता। धनपालस्य 'पाइयलच्छी-नाममाला' यत्र प्रारम्भिकाध्ययनशीलानामभ्यासाय हितावहाऽस्ति तत्रेयं प्रौढविद्वद्भ्योऽपि नितरामुपादेया विद्यते। एवं हेमचन्द्राचार्यस्येयं रचनाऽपि वर्तमानार्यभाषायाः शब्दानामात्मकथानिकां प्रस्तोतुं सर्वेषोपयोग्या महत्त्वपूर्णा चास्ति।

अभिधान-चिन्तामणि-नाममाला

पूर्वोक्तेषु चतुर्ष्वपि कोशेष्वियम् 'अभिधान-चिन्तामणि-नाममाला'ऽतीव महत्त्वपूर्णा विद्यते। संस्कृतस्योपलब्धे समस्तेऽपि जैनकोशसाहित्येऽभिधानचिन्ता-मणिरेवैतादृशः कोशोऽस्ति यस्मिन् जैनत्वं पूर्णरूपेण सुरक्षितं वर्तते। अस्मिन् तीर्थङ्कराणां नामानि, तेषां पर्यायवाचिनः शब्दाः, तीर्थङ्कराणां मातृपितृनामानि, तेषामतिशयानां नामावली, भूत-भविष्यद्-वर्तमान-कालिक-चतुर्विंशी, गणधराणां नामानि, तीर्थपानां ध्वजचिह्नानि, अन्तिमकेवली, श्रुतकेवली, तीर्थेशानां जन्मभूमय-स्तथा जैनाम्नाय-सम्मतानां देवगति-तिर्यग्गत्योर्जीवानां वर्णनानि च प्रस्तुतानि। एवमेव पृथ्वीकायिक-अप्कायिक-तेजस्कायिक-वायुकायिक-वनस्पतिकायिक-जीव-पर्यायाणां विशदेन निरूपणेन सह द्वि-त्रि-चतुः-पञ्चेन्द्रियजीवानां विस्तृता नामा-वल्यप्यत्र निरूपिता। एवमूहापोहाद् गदितुं पार्यते यदेवंविधानां पर्यायवाचिशब्दा-नामन्यत्र कुत्रापि कथनं न विद्यते।

अस्य कशोस्य योजना रूढ-यौगिक-मिश्रशब्दानां पर्यायवाचिशब्दानां पर्यायवाचिशब्द-लेखनायामरकोशवदेवाचार्यवर्येण विहिता। आदिमश्लोके यथोक्तम्—

प्रणिपत्यार्हतः सिद्ध-साङ्गशब्दानुशासनः।
रूढ-यौगिक-मिश्राणां नाम्नां मालां तनोम्यहम् ॥१॥

एतेषां नाम्नां परिभाषा अपि तत्रैवाग्रे —

---

१. जे लक्खणे ण सिद्धा ण पसिद्धा सक्कयाहिहाणेसु।
ण य गउण लक्खणसत्ति संभवा ते इह णिबध्दा ॥३॥

—देशीनाममाला।

व्युत्पत्तिरहिताः शब्दा रूढा आखण्डलादयः ।
योगोऽन्वयः स तु गुणक्रियासम्बन्धसम्भवः ॥२४॥
गुणतो नीलकण्ठाद्याः क्रियातः स्रष्टृसन्निभाः ।

इति वर्णयित्वा क्रमेण (१)-देवाधिदेव-(२)-देव-(३)-मर्त्य-(४)-तिर्यक् (भूमि) (६)नरक(६)साधारणाख्येषु षट्सु काण्डेषु १५४२ मितैः पद्यैः कोशः सम्पूरितः । सम्बन्धदृष्टया स्वस्वामिभाव-जन्य-जनकभाव-कार्यकारकभाव-भोज्यभोजकभाव-पति-कलत्रभाव-वाह्यवाहकभाव-आश्रयाश्रयिभाव-वध्यवधकभावप्रभृतयः सम्बन्धा अत्रो-रीकृताः । काण्डविभागेषु प्रत्येकं काण्डे क्रमेणैते विषया महत्त्वपूर्णाः सन्ति —

१—**देवाधिदेवकाण्डे**—ऋषभादिचतुर्विंशतितीर्थङ्कराणां नामानि लाञ्छनानि तत्तद्यक्षनामानि तेषामतिशयाश्च वर्णिताः ।

२—**देवकाण्डे**—देवसम्बन्धिज्ञानपूर्वकाः शब्दा निवेशितास्तथा कालचक्र-सम्बन्ध्युत्सर्पिण्यवसर्पिण्योः षट् षड् अराणां वर्णनं कृतम् । १४७ तमे पद्ये बुद्धस्य पर्यायः '**चतुस्त्रिंशज्जातकज्ञ**' इति प्रदत्तः ।

३—**मर्त्यकाण्डे**—मनुष्यवाचकाः शब्दाः, मनुष्यस्य शिशुत्वाद्यवस्था—खाद्यादिपदार्थाः रोग-विवाहादिसम्बन्धरूपाः शब्दाश्च वर्णिताः ।

४—**तिर्यक्काण्डे**— पृथ्वीकायादि-पञ्चविधैकेन्द्रियाणां त्रिविधविकलेन्द्रि-याणां तथा त्रिजातिकानां पञ्चेन्द्रियाणां तिरश्चां शब्दाः सङ्गृहीताः ।

५—**नरककाण्डे**—नरकसम्बन्धिनः शब्दा वर्णिताः ।

६—**साधारणकाण्डे**—भुवन-जीव-रूपप्रभृतिपञ्चविधविषयैः सम्बद्धाः शब्दाः सङ्कलिताः प्रान्ते चाव्ययानां सूची प्रदत्ता ।

अस्यां नाममालायां केचनाऽमरकोशस्य श्लोका यथावदेव ग्रथिताः । अत एवमपि कल्पितुं शक्यते यदत्र व्याडि-प्रभृति-प्राचीन-कोशकाराणामप्युपयोगः कृतो भवेत् । आसीदिदं वैशिष्ट्यं श्रीमतो हेमचन्द्रसूरेर्यदेते स्वपाण्डित्यख्यापनाकामनया ग्रन्थनिर्मितौ न प्रवृत्ता अपि तु वात्सल्यभावेन सर्वोपयोगिवस्तु सकलस्य जगतः समक्षं संस्थापयितुं वाञ्छन्ति स्म ।

अस्या रचनायाः 'सिद्धसाङ्गशब्दानुशासनः' (अभि० चि० १) इति सूचनात् तथा तस्यैव स्वोपज्ञवृत्तौ सिद्धशब्दस्य प्रतिष्ठाप्राप्त इत्यर्थकरणादनुमीयते यत् 'पञ्चाङ्गव्याकरण'स्य प्रसिद्ध्यनन्तरमेवास्य निर्माणमभूदिति । किञ्च तृतीयकाण्डस्य

कुमारपालश्चौलुक्यो राजर्षिः परमार्हतः ॥३७६॥
मृतः स्वभोक्ता धर्मात्मा मारिव्यसन-मारकः ।

इति पद्यानुसारं वि० सं० ११७७ वर्षेऽथवा १२०७-८ तमे वर्षे रचनेयं सम्पन्नेत्यप्यनुमीयते ।

रचनाया महत्त्वम्

पूर्वनिर्मितेभ्यः कोशेभ्योऽस्या रचनायाः किं महत्त्वमिति विचारणायां सत्यामत्र कानि चिन्महत्त्वानि प्रदर्श्यन्ते—

(१) अत्र धनञ्जयवदेव समानशब्दयोगेनानेकेषां पर्यायवाचिशब्दानां निर्माण-विधिः प्रदर्शितः परं विधानेऽस्मिन् '**कविरूढ्या ज्ञेयोदाहरणावली**'ति दिशा त एव शब्दाः सङ्कलिता ये कविसम्प्रदाये प्रचलिताः सन्ति । अत एव गौर्याः पर्यायवाचि-शब्दानां निर्माणे 'शिवपरिग्रह'स्य, शिवनाम्नां पर्यायनिर्मितौ 'गङ्गाधर'स्य, तत्सदृशा-नामन्येषां कविसम्प्रदायबहिर्भूतानां शब्दानां ग्रहणं न कृतम् ।

(२) अत्रानेक ईदृशा अपि शब्दाः सङ्गृहीताः सन्ति येऽन्येषु कोशेषु नैवोप-लभ्यन्ते । यथाऽमरकोशे सुन्दर शब्दस्य पर्यायेषु —

सुन्दरं रुचिरं चारु, सुषमं साधु शोभनम् ।
कान्तं मनोरमं रुच्यं, मनोज्ञं मञ्जु मञ्जुलम् ॥

एते शब्दाः परिगणिताः । श्रीहेमचन्द्राचार्याः सुन्दरस्य पर्यायान् २६ षड्विंशत्या शब्दैर्वर्णयन्ति । इयदेव न हि, स्वोपज्ञवृत्तौ 'लडह'—इति देशीशब्दमपि सौन्दर्यवाचकं प्रदर्शयन्ति । एवमत्रैकस्य शब्दस्य बहुशः पर्यायान् सङ्गृह्य नाममालेयमतीव समृद्धि-मती सम्पादिता ।

(३) केचनात्रेदृशा अपि नवीनाः शब्दा विद्यन्ते ये कस्मिन्नपि कोशे पूर्वं नायाताः । यथा—गोधूमस्य पिष्टनाम 'समिता' (३।६७), उच्छिष्टपर्यायः 'फेला' (३।२५), पिण्डोलि (३।६०) श्च, ज्येष्ठायै श्यालिकायै 'ज्येष्ठश्वसा' 'कुली' च, कनिष्ठायै 'हाली, यन्त्रणी केलिकुञ्चिकेति (३।२१८-२१९), बहुसन्ततिमत्यै मात्रे 'कुमिला' शब्दाः ।[२]

(४) अत्राचार्यश्रीसूरिवर्यैर्येषां शब्दानां सङ्ग्रहः कृतस्तत्र प्राकृतापभ्रंशदेश्य-

---

२. अयं शब्दः साम्प्रतिके परिवारनियोजन विषये कियतीमुपयोगितां धारयतीति विचारास्पदमस्ति ।

शब्दानां प्रभावोऽपि पूर्णरूपेण लक्ष्यते । अनेके शब्दास्तु तादृशाः सन्ति येषामन्यास्वाधुनिकभाषासु दर्शनं सुलभमेव विद्यते । यथा—पोलिका-लड्डुक-चोटी-गेन्दुक-हेरिक-तरवारि-जंगल-सुरंग-चालनी-पेटा-प्रभृतयः ।

एवमभिधान-चिन्तामणि—नाममालेयं सर्वाङ्गपूर्णः कोश इति वक्तुं शक्यते । अत एवास्य **टीकासाहित्यमपि** पर्याप्तं मिलति । यथा—

(१) **स्वोपज्ञविवृत्तिः**—इयं विवृत्तिः स्वयमाचार्यप्रवरैरेव निर्मिता । अस्या नाम—'तत्त्वाभिधायिनी' ति भवेदिति रत्नप्रभा-टीकासहितेऽस्याः प्रकाशने प्रतिकाण्डं पुष्पिकायाम्—'इति परमार्हत० नाममालायां **स्वोपज्ञतत्त्वाभिधायिनीवृत्त्यनुसारिणी**-रत्नप्रभाव्याख्याया'मित्यादि वाक्यकदम्बेनानुमीयते । सार्धसप्तसहस्रश्लोकपरिमाणेयं विवृत्तिर्मूलस्य विशदीकरणे तत्तत्क्लिष्टपदार्थावबोधने मूलानुक्तविषयाणां परिस्तरणे च पर्याप्तं साहाय्यमाचरति । अत्र नैके ग्रन्थाः प्रमाणरूपेणाप्युपन्यस्ताः सन्ति ।

(२) कुशलसागरनिर्मिता टीका ।

(३) **'सारोद्धारः'** इयमस्ति खरतरगच्छीय-श्रीज्ञानविमलशिष्यश्रीवल्लभ-गणिविरचिता टीका । इयमेव **दुर्गपदप्रबोध**-टीका स्यादिति सम्भाव्यते ।

(४) **व्युत्पत्तिरत्नाकरः**—टीकेयमञ्चलगच्छीयरविचन्द्रस्य शिष्येण श्रीदेव-सागरगणिना वि० सं० १६८६ तमे वर्षे रचिता ।

(५) भानुचन्द्रगणिरचिता टीका ।

(६) साधुरत्नरचिता टीका ।

(७) अज्ञातनाम्नः कस्यापि ४५०० श्लोकप्रमाणा पाटनस्थभाण्डागारे सुरक्षिताऽवचूरिः ।

(८) **रत्नप्रभा**—इयं टीका पं० वासुदेवरावजनार्दनकशेलीकरेण निर्मिता ।

बीजकत्रयम्— अभिधानचिन्तामणि-नाममाला-बीजकनाम्नाऽप्येताः कृतयो लभ्यन्ते —

(१) तपागच्छीय-श्रीहीरविजयसूरिशिष्य—श्रीशुभविजयगणिवरेण (वि० सं० १६६१) विरचिता कृतिः ।

(२) देवविमलगणिविहिता कृतिः ।

(३) अज्ञातकर्तृकस्य ।

अभिधान-चिन्तामणि-नाममाला-प्रतीकावली-नाम्नैका पाण्डुलिपिर्भाण्डारकर-प्राच्यग्रन्थसङ्ग्रहे'ऽज्ञातकर्तृ'नाम्नी विद्यते ।

शेषनाममालाऽथवा **शेषसङ्ग्रहनाममाला**—

अभिधान-चिन्तामणौ न सङ्ग्रहीता ईदृशाः कतिपये शब्दा अत्र स्वयं ग्रन्थकर्त्रैव सङ्कलिताः । अस्यां २०४ श्लोकाः सन्ति । अस्या अपि द्वे टीके श्रीवल्लभगणिना केनाप्यन्येन च रचिते स्तः ।

शिलोञ्छः— अभिधानचिन्तामणिनाममालाया एवावशिष्टानां केषाञ्चिदन्येषां सङ्ग्राह्यशब्दानामत्र १३९ श्लोकैः सङ्ग्रहो विद्यते । अस्य रचयिता श्रीजिनदेवसूरिः किल 'वृद्धेतरखरतरगच्छालङ्कार-श्रीमज्जिनप्रभसूरिशिष्यमुख्य आसीत् । अस्योपरि श्रीज्ञानविमलशिष्यः श्रीवल्लभः (वि० सं० १६५४ वर्षे) टीकां रचितवान् ।[1]

आचार्यः श्रीजिनभद्रसूरिः

एतदनन्तरं त्रयोदश्या शत्या जिनभद्रसूरिणा '**अपवर्गनाममाला**' नामकस्यैकस्यां शिककोशस्य रचना विहिता । अस्यां रचनायां केचनावश्यकाः शब्दा एवांशरूपेण संगृहीताः ।

आचार्यः श्रीपद्मनन्दिः

त्रयोदश्याः शत्या एवान्तिमे चरणे (१२८०–१३३० ई०) जैनाचार्य-श्रीपद्मनन्दिवर्येण वैद्या-विद्या-विद्योतितान्तःकरणेना जैनकोश-साहित्येऽभिनवो विषयः स्वीकृतः किञ्च '**निघण्टु**'नाम्ना वैद्यकस्यैकः कोश आरचितः । इयं निघण्टु-निर्माण-परम्परा वैद्य-विद्वद्भिः पूर्वमेवाविष्कृताऽऽसीत् सा चात्रापि स्वीकृतेति प्रमोदायैव ।

अन्ये कोशकर्तारो जैनाचार्याः

चतुर्दश्यां शत्यां सेनसंघस्याचार्येण श्रीमता श्रीधरसेनेन '**विश्वलोचन-कोशः**' किंवा मुक्तावली-कोशस्य निर्माणं कृतम् । हेमचन्द्रस्य अभिधानचिन्तामणेरेव नाम्ना '**शिलोञ्छनाममाला**' (१३८३ई०) तथा राजशेखरसूरिशिष्येण सुधाकलशेन '**एकाक्षर-नाममाला**', सम्राजोऽकबरस्य शासनकालिकेन जैनविदुषा पद्मसुन्दरेण '**सुन्दरप्रकाशः**'

---

१. अस्या नाममालायाः प्रामुख्येन श्वेताम्बरजैनसम्प्रदाये भूयान् प्रचारो विद्यते, तस्मादेवास्या नानाविधानि प्रकाशनान्यपि सम्पन्नानि सन्ति ।

(पदार्थ-चिन्तामणिः शब्दार्णवो वा), तत्सम्राट्सम्मानितोपाध्याय-श्री भानुविजय-गणिना '**विविक्तनामसंग्रहः**' (नामसंग्रहो नाममालासंग्रहो वा) कोशसम्पत्परिपूर्तये कोशा आरचिताः ।

षोडश्यां शत्यां नागपुरी-तपागच्छस्य हर्षकीर्तिसूरिः '**शारदीयनाममालां**' (मनोरमानाममालां वा) विमलसूरिश्च '**देश्यशब्दसमुच्चयं**' विरचितवन्तौ । सप्तदश्यां च शत्यां श्रीमथुरेशेन '**शब्दार्थरत्नावली**' (शब्दरत्नावली वा), सम्राजोऽकबरस्यैव सभायां वादविजयकर्त्रा खरतरगच्छीयोपाध्यायेनैकेन '**शेषनाममाला**', साधुकीर्तेः शिष्येण सुन्दरगणिना '**शब्दरत्नाकरः**' (धातुरत्नाकरो वा) खरतरगच्छीयेनोपाध्याय-श्रीसहजकीर्तिना च 'सिद्धशब्दार्णव' इत्येते कोशा निर्मिता ।

एतदतिरिक्तं जैनाचार्यैः 'संग्रहात्मकाः' कोशा अपि विरचिताः सन्ति । एतेषु कोशेषु शब्दानामर्थाः पर्याया लिङ्गादिपरिचयाश्च न सन्ति परं तत्र कस्यापि विषय-विशेषस्य संग्रहो विद्यते । ईदृशेषु कोशेषु चतुर्दश्याः शत्याः श्रीराजशेखरसूरेः (१३४८ ई०) '**प्रबन्धकोशः**'[1] प्राथम्यं बिभर्ति । ततः परमज्ञातकर्तृकयोः '**वस्तुरत्न-कोश**'[2] '**एकादिसंख्यासंज्ञाकोश**'**श्च** स्मरणीयौ स्तः ।

परं कथासाहित्यमधिकृत्य संग्रहकोशदृष्ट्या एतेभ्यः पूर्वमेवाचार्य-श्रीहरिषेणेन (८३६) '**बृहत्कथाकोश**'**स्य** निर्माणं कृतमासीत्, अस्मिन् त्रिसप्तमितानां कथानां संग्रहो विद्यते । इयमेव पद्धतिरग्रेतनैराचार्यैरपि स्वीकृता तत्पूर्तये च—प्रभाचन्द्राचार्य-(६२५ ई०) स्य '**गद्यकोश**' '**आराधनाकोशो**' वा । नेमिचन्द्रसूरेः (१०८१ ई०) '**आख्यानमणिकोशः**', गुणचन्द्रगणि-देवभद्रसूर्योश्च (११०१ ई०) '**कथारत्नकोशः**' ब्रह्मदेवाचार्यस्य '**कथाकोशः**' श्रुतसागरस्य '**व्रतकथाकोशः**' '**बृहत्कथाकोशश्च**', नेमिदत्त-स्य '**आराधनाकथाकोशः**' प्रसिद्धिं गताः ।

जैनसम्प्रदाय उपदेशपराणां कथानामस्ति नितरां बाहुल्यम् । तासामेकत्र दर्शनाय कथाकोशानां निर्मितिपरम्परेयं सर्वथा श्लाघनीया विद्यते ।

---

१. कोशेऽस्मिन् चतुर्विंशति कथानां संग्रहो विद्यते ।

२. अत्र कोशे प्रत्येकं विषयस्य समूहवाचकशब्दानां प्रथमं संख्या सूचिता ततः परं तस्या व्याख्यारूपेण तेषां सर्वेषां शब्दानां सङ्कलनं विहितम् । एवमत्रै कोत्तरं शतमितानि सूत्राणि सन्ति ।

अयमेव कोशनिर्माणानुरागो मुनि'श्रीशान्तिचन्द्रं प्रेरयन् तदीयमाध्यमेन **'कृपारसकोश'** नाम धारयित्वा प्रकटितः। अस्मिन्नष्टाविंशत्युत्तरशतमितानि पद्यानि सन्ति। येषु सम्राजोऽकबरस्य जैनधर्मं प्रति तदीयानुरागस्य तं प्रति समादरस्य च यथावसरं विहितानां कृपानां वर्णनं विद्यते।

इत्थं जैनाचार्याणां साहित्य-साधना-पक्षः पूर्णरूपेण स्पृहणीयो विद्यते। तैर्न केवलं संस्कृतभाषाया अमरकोशादि-परम्परायामेव कोशरचना विहिता अपि त्वन्यस्यां दिश्यपि भूयान् प्रयास आहितः। श्रीमतो राजेन्द्रसूरेः 'अभिधान-राजेन्द्रकोशः' सप्तसु भागेषु महता प्रयासेन साधितः सर्वानपि जैनागमगतशब्दानावर्जयति। एवमेव श्रीमत आनन्दसागरसूरेः 'अल्पपरिचितसैद्धान्तिकशब्दकोश'प्रभृतयोऽपि नितान्तं सम्मानार्हाः सन्ति।

एवमेवान्यैर्जैनाचार्यैः प्राकृतार्धमागधीसंवलिताः कोशाः, लक्षणकोशाः, विशिष्ट-शैली-संवलिताः कोशा अपि बहवो विरचिताः सन्ति। येषां पर्यालोचनेन तेषां कोश-निर्माणकौशलं सर्वथा स्पृहणीयतां भजत 'इति'।

---

१. श्रीमद्भिर्लावण्यसूरिवरैश्च 'धातुकोश'नाम्ना हैमशब्दानुशासने पठितानां सर्वेषां धातूनां रूपाणि संगृहीतानि सन्ति।

सोमयागस्य वैज्ञानिको विवेकः

—श्री उपेन्द्र झा

सोमयागाधिकारी —

कूष्माण्डैः (**यथेवादेवहेडनम्** तै०आ० २।२ इत्यादयो मन्त्राः कूष्माण्ड-संज्ञकाः) पवित्रेष्ट्यादिभिर्जपः पुण्यतीर्थस्नानादिभिर्वा पावनैः कर्मभिरात्मानं शोधयित्वा रागद्वेषरहितोऽपि भवति, स एव सोमयागाधिकारी भवति। तत्रापि यस्य पिता पितामहो वा सोमयागं नान्वतिष्ठतां सोऽपि सोमयागानुष्ठाने नाधिकारीति। अत एवोक्तम् —

"यस्य पिता पितामहः सोमं न पिबेत् स दुर्ब्राह्मण" इति श्रुतिः। उक्तञ्च कात्यायनेन—**"ऐन्द्राग्नं पुनरुत्सृष्टमालभ्य द्विपुरुषाः सोमपीथिनः"** (का० श्रौ० सू० ८।१।६ इति)। अन्यत्रापि दृश्यते **"दुर्ब्राह्मणत्वनिवृत्तये ऐन्द्राग्नपशुयागं आश्विनः पशुयागञ्चानुष्ठाय ततः सोममनुतिष्ठेत्"**। कात्यानोपि त्रिपुरुष सोमपानाभावे ऐन्द्राग्नपशुयागोऽनुष्ठेयः। पशुयागद्वयं सोमयागात् पूर्वमेवानुष्ठाय तेन चात्मानं पवित्रीकृत्य तदनन्तरं सोमार्थं सङ्कल्पं कुर्यादिति।

अथवा मध्य एव चतुर्थे दिनेऽनुष्ठीयमानेन अग्निषोमीयेन पशुयागेन सह तन्त्रेणानुष्ठानमिति, अन्येषां विचारः। यद्यप्यत्र बहूनामिष्टीनां भवत्यनुष्ठानं तथापि तेषामङ्गत्वात् सोमद्रव्यप्राधान्याच्च सोमयाग एवेति व्यवहारः।

सोमयागावश्यकता —

सोमलतायाः वैशिष्ट्यं सुश्रुतसंहितायां महर्षिसुश्रुतेन विस्तरेण वर्णितम्। सोमद्रव्यस्य मुख्यरसायनरूपेण वर्णनं सुश्रुतसंहितादौ दृश्यते। **"अथातः स्वभाव-व्याधि-नियम-रसायनं व्याख्यास्याम"** इति सन्दर्भे भगवान् धन्वन्तरिः **"व्याधि-विनाशाय सोम-लता-सर्जनं ब्रह्मैव चकार"** इत्युक्तवान्।

(३) सोमलता-भेदाः —

एक एव खलु भगवान् सोमः स्थानानामाकृति-वीर्यविशेषैचतुर्विंशतिधा विधत्ते । तद्यथा —

अंशुमान् मुञ्जवाँश्चैव चन्द्रमा रजतप्रभः ।
दूर्वा सोमः कनीयांश्च श्वेताक्षः कनकप्रभः ॥ १ ॥
प्रतानवांस्तालवृन्तः करवीरोंऽशुमानपि ।
स्वयम्प्रभो महासोमो यश्चापि गरुडाहृतः ॥ २ ॥
गायत्रस्त्रैष्टुभः पांक्तो जागतः शाक्वरस्तथा ।
अग्निष्टोमो रैवतश्च यथोक्त इति संज्ञितः ॥ ३ ॥
गायत्र्या त्रिपदायुक्तो यश्चोडुपतिरुच्यते ।
एते सोमाः समाख्याता वेदोक्तैर्नामभिर्गुणैः ॥ ४ ॥
सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः ।
जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ॥

(ऋ० सं० ९।५।९६।५)

अर्थात् सोम एव मतीनां जनयिता एवं शरीरस्य पृथिवीतत्त्वस्याकाशतत्त्वस्य च उत्पादकः । अग्नितत्त्वानां च स एवोत्पादकः । इन्द्रस्य मनसोऽपि जनयिता सोम एव, "इन्द्रो वै प्रजापतिः प्रजापतिरेव मनः" इति श्रुतिः । (तथा विष्णोरात्मनश्च जनयिता)

अतो भगवता धन्वन्तरिणाऽपि मन्ये सोमलतारसेन कायाकल्पस्य विधानं कृतम् । च्यवनादिकथानकमपि सोमपरकमेवेति अस्माकं विचारः । "**च्यवनः ऋषिर्भवति**" इति सन्दर्भे यास्कोऽपि **'च्यावयिता स्तोमानामिति'** दुर्गोऽपि स्तोमानां पृष्ठ्यादि-संज्ञकानां स्तुतीनां प्रवर्तयितेति "**युवं च्यवानं सनयं यथारथं पुनर्युवानं चरथाय तक्षथुः ?** इति मन्त्रेणापि परोक्षवृत्त्या सोमलताया एव महत्त्वस्य प्रतिपादनं भवति । (अर्थात् हे अश्विनौ सनयं पुराणं च्यवानं स्तोमानां च्यावयितारम् ऋषिं भृगुपुत्रं जीर्णं रथमिव पुनर्युवानं तरुणं चरथाय चरणाय तक्षथुः कुरुतम् । यथा चिरन्तनं रथं गमनासमर्थं कश्चित् शिल्पी गमनसमर्थं कुर्यात् तद्वत् । महाभारतेऽपि वनपर्वणि (१२४) अध्याये श्रूयते यद् जीर्णः सन् अश्विभ्यां पुनर्युवा कृत इति । विचारणीयोऽयं सन्दर्भः युवकरणस्य को हि प्रकार आसीदिति कश्चोपायः ? अस्मन्-

मते तु च्यवनस्य कायाकल्पसमयेऽपि सोमलताया एव प्रयोगः समभवत्। आमलक्या अपि गुणवर्णने द्रव्यगुण-संग्रहादौ यत् च्यवनोपाख्यानं वर्णितमस्ति तत्तु अर्थवादमेव। कारणं च अत्र "**च्यावयिता स्तोमानामिति**" यास्कोक्तिः पूर्णरूपेण विचारणीयाऽस्ति। स्तोमानां पूर्णतया सङ्घटनं सोमयागे एव भवति। अतोऽस्य अग्निष्टोम इति व्यवहारः। सुश्रुतसंहितायां च सोमलताविमर्शप्रकरणे अग्निष्टोमादौ सोमलता व्यवहरणीयेति दृश्यते। अतः च्यवनस्य कायाकल्पेऽपि सोमलताया एव चामत्कारिकः प्रभावः आसीदिति।

सोमलतयाः कायाकल्पप्रयोगस्तु आयुर्वेदे सर्वत्रोपलभ्यते प्रायशः। तद्यथा—

सर्वेषामेव चैतेषामेको विधिरुपासने।
सर्वे तुल्यगुणाश्चैव विधानं तेषु वक्ष्यते॥ सु० सं०।

सोमोपयोक्तुमिच्छुः सर्वोपकरणपरिचारकोपेतः प्रशस्ते देशे त्रिवृत्तमागारं कारयित्वा हृतदोषः प्रतिसंसृष्टप्रतिसंसृष्टभक्तः।

प्रशस्तेषु तिथिकरणमुहूर्त्तनक्षत्रेषु अंशुमन्तमादाय अध्वर-कल्पेनाहृतं (अग्निष्टोम-विधानेनानीतम्) (अभिषुतं ऋत्विग्भिः पीडितम्) वह्नौ प्रक्षिप्तं, अन्तरागारे कृतसङ्कल्पस्वस्तिवाचनः सोमकन्दं सुवर्णसूच्या विदार्य सौवर्णे राजते वा पात्रे अञ्जलिमात्रं पयो गृह्णीयात्। ततः सकृदेव उपयुञ्जीतानास्वादयन्। तत उपस्पृश्य शेषमप्सु अवसाद्य यमनियमाभ्यामात्मानं संयोज्य वाग्यतोऽभ्यन्तरतः सुहृद्भिरुपास्यमानो विहरेत्।

रसायनं पीतवाँस्तु निवाते तन्मनाः शुचिः।
आसीत तिष्ठेत्क्रमेच्च न कथञ्चन संविशेत्॥

पात्रभेदनिर्देशः —

अंशुमन्तं सौवर्णपात्रेऽभिषुणूयात् चान्द्रमसं राजते चोपयुज्य अष्टगुणमैश्वर्यमवाप्य ईशानं देवमनुप्रविशति। शेषांस्तु ताम्रमये मृण्मये रोहिते चर्मणि वा। सोमरसोपयोगः त्रिभिर्वर्णैरेव कर्त्तव्य इति "**शूद्रवर्जं त्रिभिर्वर्णैः सोमा उपयोक्तव्येति**", सुश्रुतः।

